

M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 5
Title: Smrityartha Satam

Smrityartha-Sāram. : Title

: Author

: Editor

: Year, Vols.

: Publisher

5 : Remarks

केविगोवादापद्मपेप्रजाच्युक्रममाजिनाः। वाधोन्टहसानिःश्रीपुःशा
खगेविगपेचपैः॥१॥

शं च के प ग	प शं वि ग च	ग प गो च शं	च ग वा शं प	शं ग दा प च	प शं प च ग	च प ह ग शुं	ग चं उपें शं प
शं ग प्र च प	च शं जा प ग	प चं अच्यु ग शं	ग प क्र शं च	शं प म च ग	च शं मा ग प	ग च जि प शं	प ग ना शं च
शं च वा ग प	ग शं अधो प च	प ग न्ट च शं	च प ह शं ग	शं प स ग च	ग शं अनि च प	च ग श्रीः प शं	प च पुः शं गः

श्रीगणेशायनमः॥ गणेशंब्रह्मविष्णीशान्वाऽम्भोमालोकपान्ग्रहान्॥ दुर्गामन्वा
दिकान्वंदेव्याख्यातॄंश्चमहागुरून्॥ श्रीकंठश्रीकराद्यैश्चश्रुतिस्मृतिपुरा
णगैः॥स्मृतिशास्त्रेष्वनेकेषुविप्रकीर्णेष्वनेकधा॥अनुष्ठानुपकारार्थंस्मृति
छिद्रंप्रयत्नतः॥पुराणन्यायमीमांसासांगवेदैःप्रपूरितंकामधेनौप्रदीपा
ख्येकल्पवृक्षलतादिषु॥शंभुद्रविडकेदारलोल्लटाद्यैश्चभाषितं॥मंन्वा
द्यनेकस्मृतिषुव्याख्यातंप्रतिपादितं॥स्मृत्यर्थसारंवक्ष्यामिसुखानु
ष्ठानसिद्धये॥प्राचीदिशामनुक्तौःस्यादुदीचीशानदिक्तथा॥तिष्ठत्प्र
ह्वतानुक्तावासीनत्वंस्वकर्मसु॥कर्त्रंगानामनुक्तौतुदक्षिणांगंभवेत्त
था॥कुष्ठितेवामहस्तःस्याद्दक्षिणःस्यादकुष्ठिते॥यज्ञोपवीतिनाकार्यं

सर्वकर्मप्रदक्षिणं॥मनःप्रसादात्तस्योक्त्यातपसास्नानकर्मण॥आचांत्यावा
त्मनःशुद्धिंकृत्वाकर्मसमाचरेत्॥कर्मायथाकृतंज्ञात्वातावदेवपुनश्चरेत्।
१ प्रधानःस्यात्क्रियायांतुसांगंतत्क्रियतेपुनः॥तदंगाकरणेकुर्यात्प्रायश्चित्तंन
कर्मतत्॥प्रभुःप्रथमकल्पस्ययोनुकल्पेनुवर्त्तते।सनाप्नोतिफलंतस्यप
रत्रेतिश्रुतिःस्मृतिः।कर्मणामनसावाचायत्नाद्धर्मंसमाचरेत्।अस्वर्ग्यंलो
कविद्विष्टंधर्ममप्याचरेन्नतु।बद्धकल्पंवास्वगृह्योक्तंयस्यकर्मप्रचोदितं॥त
स्यतावतिशास्त्रार्थेकृतेसर्वःकृतोभवेत्।श्रौतेषुसर्वशास्त्रोक्तंसर्वस्यैव
यथोचितं।स्मार्त्तंसाधारणंतेषुग्राह्यंश्रौतेषुकर्मसु।समयाचारिकाधर्मा १
जातिदेशकुलोद्भवाः।ग्रामाचाराःपरिग्राह्यायेचविध्यनुरोधिनः।युगध

र्माःपरिग्राह्याःसर्वत्रैवयथोचितं।यत्कृतेदशभिर्वर्षैस्त्रेतायांहायनेनतत्।द्वापरे
तच्चसंमासेनअहोरात्रेणतत्कलौ।देवराच्चसुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः।दत्ता
क्षतायाःकन्यायाःपुनर्दानंपरस्यहि।समुद्रयानस्वीकारेकमंडलुविधारणं।
महाप्रस्थानगमनंगोपशुश्चसुराग्रहः।अग्निहोत्रहवण्याश्चलेहोलीढाप
रिग्रहः।असवर्णासुकन्यासुविवाहश्चद्विजातिषु।वृत्तस्वाध्यायसापेक्षमघ
संकोचनंतथा।अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवच।प्रायश्चित्तविधानं
चविप्राणांमरणांतिकं।संसर्गदोषःपापेषुमधुपर्केपशोर्वधः।दत्तौरसेतरे
षांतुपुत्रत्वेनपरिग्रहः।शामित्रंचैवविप्राणांसोमविक्रयणंतथा।दीर्घकाले
ब्रह्मचर्यंनरमेधाश्वमेधकौ।कलौयुगेत्विमान्धर्मान्वर्ज्यानाहुर्मनीषिणः
॥ ॥ ७ ॥विप्रक्षत्रियविट्शूद्राश्चत्वारोवर्णाः।तत्रविप्रक्षत्रियवैश्या

स्मृत्य॰सा॰ द्विजा स्त्रिजाश्च तेषां मातुः प्रथमं जन्म॥ उपनयनाद्द्वितीयं जन्म॥ तृतीयं यज्ञिय
दीक्षायामुत्तमं जन्म स्त्रीणां विवाह उपनयनस्थाने द्विजानां गर्भाधानादिका अं
२ त्याः क्रियाः मंत्र एव कार्याः॥ तत्र संस्काराः॥ गर्भाधानं पुंसवनानवलोभनसी
मंतोन्नयन जातकर्म नामकरण निष्क्रमणान्नप्राशन चौलोपनयन सावित्रीव्र
तदेवव्रता — — — कव्रतानि गोदानिक स्नातक विवाहाश्चेत्यावश्यकाः षोडश प्रायः
संस्काराः॥ तत्र ऋतौ गर्भाधानं कार्यं॥ रजःप्रभृति षोडशरात्रांत ऋतुकालः
।गर्भचलनात्पुरा तृतीये चतुर्थे वा मासि पुंसवनं कार्यं। अनवलोभनं च चतुर्थे ष
ष्ठेऽष्टमे मासे वा सीमंतोन्नयनं॥ जाते सुते पिता स्नात्वा रात्रौ संध्ययोर्ग्रहणे वाप्य
छिद्राद्ध्यं सुवर्णेन कृत्वा जातकर्म दानानि दुरितक्षयाय प्राजापत्येष्टी चैव कुर्या २
त्। जाताशौचांतरमध्ये वा कुर्यात्। मृताशौचमध्ये जाते तु तदा वाशौचांते

वा कुर्यात्। निष्क्रमणं चंद्रदर्शनं देवता नमस्कारं वा द्वादशेऽह्नि वा तृतीये मासे वा चतुर्थे मा
से वा कुर्यात्। अन्नप्राशनं ष×सूर्यदर्शनं×षष्ठे मासेऽष्टमे दंते जाते वा कार्यं। चौलं प्रथमे तृ
तीये वर्षे वा कार्यं। बहुमतत्वाद्यथाकुलधर्मं वा कार्यं। एते संस्कारा गर्भबीजदुरितक्ष
यार्था यथास्वाचारं कार्याः। स्त्रीणाम होमकास्तूष्णीं स्युर्विवाहस्तु समंत्रकः। एतेका
लातिक्रमे व्याहृतिहोमं कृत्वा कार्याः। एतेष्वेकैकलोपे पादकृच्छ्रः कार्यः। चौले त्वर्धकृ
च्छ्रः। मत्या लोपे अनापदि वा द्विगुणं। उपनयनात्प्राग्बालकाउच्छिष्टदोषप्रत्यवायताः
स्युः। कामचारकामवादभक्षणास्युर्महापातकवर्ज्यं। तेषां च चंडालादिस्पर्शे सचैलं
स्नानं। प्रागन्नप्राशनादभ्युक्षणं। प्राक्चौलादाचमनं। पश्चात्स्नानमित्येके। पित्रोः स्व
धानिनयनाद्दृते मंत्रान्न ब्रूयुः। उपनयनं जन्मप्रभृति गर्भप्रभृति वा अष्टमे वर्षे ए
कादशे द्वादशे विप्रादीनां क्रमात्कार्यं। अत ऊर्ध्वं सावित्रीपतिता व्रात्याः स्युः। तेषाम
चीर्णप्रायश्चित्तानामुपनयनाध्ययनयाजनविवाहादि केन कार्यं। व्रात्यानां गुरुप्रा

३ यश्चित्तंवक्ष्यति।षंढांधबधिरस्तब्धजडगद्गदपंगुषु।कुब्जवामनरोगार्तशुष्कांगविकलां
गिषु।मत्तोन्मत्तेषुमूकेषुशयनस्थेनिरिंद्रियेध्वस्तपुंस्त्वेपिचैतेषुसंस्काराःस्युर्यथोचितं।मूको
न्मत्तौनसंस्कार्याविल्येके।कर्मस्वनधिकारात्पातित्यंनास्ति।तदपत्यंसंस्कार्यं।ब्राह्मण्यां
ब्राह्मणोत्पन्नोब्राह्मणएवेतिस्मृतेः।अन्येसंस्कार्याइत्याहुः।होमंतावदाचार्यःक
रोति।उपनयनंचविधिनाचार्यसमीपनयनंवा।सावित्रीवाचनंवा।अन्यदंगंयथा
शक्तिया।कार्यं।विवाहश्चकन्यास्वीकरोन्यदंगकर्मेति।औरसःक्षेत्रजास्तेषांसंस्का
र्यभागहारिणः।औरसःपुत्रिकापुत्रःक्षेत्रजोगूढजस्तथा।कानीनश्चपुनर्भूजो
दत्तक्रीतश्चकृत्रिमः।दत्तात्मावसहोढाजस्तथापविद्धसुतस्तथा।पिंडदोंशहरस्तेषांपूर्वा
भावेपरःपरः।एतेवैदशपुत्राश्चसंस्कार्याःस्युर्द्विजातयः।केचिदाहुर्द्विजैर्जातोसं ३
स्कार्यौकुंडगोलकौ।कार्पासक्षौमगोवालशणवल्कतृणादिकं।सदासंभवतोधा
र्यमुपवीतिंद्विजातिभिः।शुचौदेशेशुचिःसूत्रंसंहतांगुल्किमूलके।आवेष्ट्यषण्ण

वत्यात्तत्त्रिगुणीकृत्ययत्नतः।अब्लिंगकैस्त्रिभिर्मंत्रैःप्रक्षाल्योर्ध्ववृत्तंतुयत्।अप्रद
क्षिणमावृत्तंसावित्रीत्रिगुणीकृतं।अधःप्रदक्षिणावृत्तंसमंस्यान्नवसूत्रकं।त्रिरा
वेष्ट्यदृढंबध्वाहरिब्रह्मेश्वरान्नमेत्।ततश्चयज्ञोपवीतमितिमंत्रेणधारयेत्।सू
त्रंसलोमकंचेत्स्यात्ततःकृत्वाविलोमकं।सावित्र्यादशकृत्वाद्भिर्मंत्रिताभिस्त
दुक्षयेत्।विच्छिन्नंवाप्यधोयातंभुक्त्वानिर्मितमुत्सृजेत्।यद्वापृष्ठवंशेचनाभ्यां
चधृतंयद्विंदतेकटिं।तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं।स्तनादूर्ध्वमधो
नाभेर्नधार्यंतत्कदाचन।ब्रह्मचारिणएकंस्यात्स्नातस्यद्वेबहूनिवा।तृतीयमुत्त
रीयार्थंवस्त्राभावेतदिष्यते।ब्रह्मसूत्रेपसव्येंसेस्थितेयज्ञोपवीतिना।प्राची
नावीतीनासव्यकंठस्थेतुनिवीतिना।वस्त्रयज्ञोपवीतार्थेत्रिवृत्सूत्रंकर्मसु।कु
शमुंजवालतंतुरज्जावासर्वजातिषु॥ ॥इतियज्ञोपवीतविधिः॥ ॥का
र्ष्णरौरववास्तानिविप्रादेरजिनानितु।अहतंवस्त्रयुग्मंचश्वेतंवस्त्रमथापि

४ वा। मौंजी त्रिवृत्समा श्लक्ष्णा दक्षिणावृत्तमेखला। मुंजाभावे तु कर्तव्या कुशाश्मं
तकबल्बजैः। पालाशा धास्त्वसर्वेषां दंडा याज्ञिकवृक्षजाः। ते केशभालनासां
तप्रमाणाश्च क्रमात्त्रिमिः। धार्याः श्लक्ष्णाः सदा धार्यं कौपीनं कटिसूत्रकं। कौ
पीनमहतं धार्यं खंडं वा वस्त्रपार्श्वकं। यज्ञोपवीतमजिनं मौंजीं दंडं च धारयेत्।
त्रिरंगुलं बहिर्लोम यद्वा तु चतुरंगुलं। एकखंडं त्रिखंडं वा धारयेदुपवीतवत्। न
ष्टे भ्रष्टे नवं मंत्राद्धृत्वा भ्रष्टं जले क्षिपेत्। उपनयनानंतरं त्रिरात्रं द्वादशरात्रं वर्षं
वाक्षारलवणाशी अधःशायी ब्रह्मचारी व्रतं चरेत्। सर्वव्रतांते नवानि यज्ञोपवीतानि
धृत्वा जीर्णानि त्यजेत्। वस्त्राणां त्यागे तु नियमः। नित्यं स्वाध्यायाग्निकार्यब्रह्म
यज्ञतर्पणानि कुर्वन्ननिंद्यो विप्रगृहे भैक्षं गुर्वनुज्ञया याचयित्वा भोजनविधि
ना भुंजानो द्वादशाब्दं पंचाब्दं वेदग्रहणांतं वा ब्रह्मचारी व्रतं चरेत्। गुरुशुश्रूषा ४
छंदसां साधनार्थं कार्या। उपाकर्मांतं सर्वेषां वेदाब्दव्रतं। ततः स्त्रीमधुमांसोच्छि

ष्टशुक्लपर्युषितताम्बूलदंतधावनावसिक्तकादिवास्वापछत्रपादुकागंधमाल्योद्वर्तनानुले
पनांजनाजलक्रीडाद्यूतनृत्यगीतवाद्यालापाश्लीलपरिवादादीन्यासमावर्तनाद्वर्जं
येत्। तदेव वैद्येव्याधौ मधुमांसं गुरूच्छिष्टं भक्ष्यं। श्राद्धे तु वर्ज्यमेव। उपनयनव्रतानंतरं सा
वित्रीव्रतमुपाकर्मांतं। आरण्यकव्रतानि तथैव उपाकरणमोषधिजनने सति। श्रावण्यां
पौर्णमास्यां कार्यं। श्रावणमासस्य श्रवणे वा। पंचम्यां हस्तेन वा। पंचमीहस्तयोगे वा का
र्यं। भाद्रपदमासस्य पौर्णमास्यां वा। श्रवणे हस्ते वा। आषाढ्यां पौर्णमास्यां वा। यथास्व
चारं कार्यं। श्रवणे आदौ घटिकाचतुष्टयमभिजिन्नक्षत्रांशं वर्ज्यं वा तिथिखंडे सति उद
यव्यापिनी प्रयोगपर्याप्ता तिथिरुपाकरणे ग्राह्या। श्रवणे खंडे सति। धनिष्ठासंयुक्तं
प्रयोगपर्याप्तं ग्राह्यं। नोत्तराषाढासंयुतं। हस्तादिष्वन्यनक्षत्रेषु शुक्लपक्षे उदयव्यापिनी ग्रा
ह्या। कृष्णपक्षेऽस्तमयव्यापि प्रयोगपर्याप्तं ग्राह्यं। सूतकादिविघ्नसंभवे दोषेष्वसत्य
भावे तु श्रावणभाद्रपदयोः कस्मिंश्चिद्दिने ग्रहणसंक्रांतिवर्जिते कार्यं। कर्मणो न लो
पोत्कर्षः। न लनब्रह्मचारिणो विशेषः। श्रवणे तु चतुर्दश्यां श्रावण्यां तु विशेषतः। उत्स

र्जनंतुपर्वण्यामुपाकर्मनकारयेत्‌।मौंजीयज्ञोपवीतादिनवंदध्याद्धारयेद्वा।कटिसूत्रं
वेनवंवस्त्रंतथैवच।उपनयनादुपाकर्मांतंसावित्रीव्रतंतत्संपूर्त्यर्थंविप्रसंबंधिबांध
५ वभोजनंशक्त्याकार्यं।ततोवेदाद्यव्रतंप्रारभेत्‌।ततआरण्यकवेदव्रतानि।ततिव्रतं
वपनं।व्रतांतेभोजनेनभैक्ष्यमहाव्रतंचर्यं।एतेषुव्रतेषुलोपेतारतम्येनत्रीन्षड्द्वादशकृच्छ्रां
श्चरित्वापुनर्व्रतंप्रारभेत्‌।ततोनंतरंवा।उदगयनेवाशुक्लपक्षेशुभेहनिस्वाध्यायंप्रा
रभेत्‌।पूर्वोक्तगणेशंसरस्वतीमिष्टदेवंसंतंवसंपूज्यब्रह्मचारिणोविप्रान्सुवासिनी
रच्यश्चाशिषोगृहीत्वाब्रह्मयज्ञवद्दर्भान्धारयमाणः।प्रणवव्याहृतीसावित्रीरुक्त्वा
प्रणवपूर्वंस्वाध्यायंप्रारभ्यकिंचिदधीत्यप्रणवेनसमाप्यविरामोस्त्वित्युक्त्वाभू
मिंस्पृष्ट्वागुरून्वृद्धान्नमेयुः।ततोपरेद्युः।प्रभृतिगणेशादीन्नत्वागुरुंश्चनत्वाप्रण
वेनप्रारंभंसमाप्तिंचकुर्युः।जात्यावारसंशयेनाध्याप्या।ब्रह्मचारीसंध्यामुपास्या ५
ग्निकार्यं।कृत्वागुरुषूपसंग्रहणंवृद्धतरेष्वभिवादनंवृद्धेषुनमस्कारंकुर्यात्‌।उप
संग्रहणंनाम अमुकगोत्रोदेवदत्तशर्मा अहंभोअभिवादयइत्युक्त्वाकरणोस्पृ

ष्ट्वादक्षिणोत्तरपाणिदक्षिणेनगुरोर्दक्षिणंपादंसव्येनसव्यंगृहीत्वाशिरोवनमनंअ
भिवादनेपादग्रहणंनास्ति।पादस्पर्शनंकार्यंनवा।आयुष्मान्भवसौम्यदेवदत्ता३इ
तिप्लुतांतमुक्त्वाअमुकशर्मन्नितिप्रत्यभिवादःकार्यः।आयुष्मान्भवसौम्यदेवदत्त
शर्मन्न।इतिवाप्रत्यभिवादः।आयुष्मान्सौम्येतिवा।प्रत्यभिवादः।अत्रगुरवोमाता
तान्यधात्रीचपितापितामहादयोमातामहादयोन्नदाताभयत्राताचाचार्यश्चोप
नेतामंत्रविद्योपदेष्टा।चतेषांपत्न्यश्चोपसंग्राह्याः।समाहत्तेनच।बाल्येसमवयस्के
ध्यापकेगुरुवद्वरेत्‌।मातुलाश्चपितृव्याश्चश्वशुराश्चवयीयांसोपिप्रत्युत्थेया
भिवाद्याः।उपाध्यायर्त्विजोज्येष्ठभ्रातरश्चसर्वेषांपत्न्यश्चैवंमातृष्वसापितृ
ष्वसाचसवर्णाभ्रातृभार्याचनित्यमभिवाद्याः।विप्रोष्यतूपसंग्राह्याज्ञातिज्ञा
तिसंबंधियोषितः।विप्रोष्यविप्रंकुशलंपृच्छेन्नृपमनामयं।वैश्यंक्षेमसमाग

६ ष्यशूद्रमारोग्यमेवच। नवाच्योदीक्षितोनाम्नायवीयानपिसर्वदा। पूज्यैस्तमभिभाषे
तभोभवत्कर्मनामभिः। परपत्नीमसंबंधांभगिनीमभिभाषयेत्। त्रिवर्षपूर्वःश्रोत्रि
योभिवाद्यः। अत्रिवर्षासंबंधिनश्चस्वल्पेनापिस्वयोज्याः। अन्येसानदृष्टासदाचा
रास्त्वभिवाद्याः। उदक्यांसूतिकांनारींभर्तृघ्नींभि×नि×र्तृपातिनीं। पाषंडंपतितंव्रा
त्यंमहापातकिनंशठं। नास्तिकंकितवंकृतघ्नंनाभिवादयेत्। मत्तंप्रमत्तमुन्मत्तंधा
वंतमशुचिंनरं। वमंतंजृंभमाणंचकुर्वंतंदंतधावनं। अभ्यक्तशिरसंस्नानंकुर्वंतं
नाभिवादयेत्। जपयज्ञांगणस्थंचसमित्पुष्पकुशादिकान्। उदपात्रार्घभिक्षा
न्नंवहंतंनाभिवादयेत्। अभिवाद्यद्विजश्चैतानहोरात्रेणशुध्यति। क्षत्रियवै
श्याभिवादनेचविप्रस्यैवं। शूद्राद्यभिवादनेत्रिरात्रंकार्यं। रजकादिषुचंडाला ६
दिषुतुचंद्रस्यादिसंग्रहकृन्मतं। देवताप्रतिमांदृष्ट्वायतींचैवतपस्विनं। नमस्का

रंनकुर्याच्चेदुपवासेनशुध्यति। सर्वैवापिनमस्कार्याःसर्वावस्थासुसर्वदा। अभिवा
दोनमस्कारस्तथाप्रत्यभिवादनं। आशीर्वाद्यानमस्कार्यैर्वयस्यंतुपुनर्नमेत्।
स्त्रियोनमस्याद्वृद्धाश्चवयसापत्सुरेवताः। ततोधीयीतवेदांश्चस्वाध्यायेगुरुशि
क्षितः अथानध्यायाः अनध्यायेष्वध्ययनेआशासामायुःप्रजांतथा। ब्रह्म
वीर्यंश्रियंतेजोनिकृंततियमःस्वयं। मंत्रवीर्यंक्षयभयादिंद्रोवज्रेणहंतिच॥
ब्रह्मराक्षसतांयांतेनरकंचभवेद्ध्रुवं। अष्टमीचतुर्दशीपर्वप्रतिपत्सुनित्यहोमो
रात्रमनध्यायाः। अष्टकासुचंद्रश्रवणद्वादशीमहाभरण्योश्च। सोपपदति
थोच। ज्येष्ठशुद्धद्वितीयाश्विनदशमीसिता। चतुर्थीद्वादशीमाघेह्येताःसो
पपदाःस्मृताः। शयनोत्थानद्वादश्याश्चद्विपार्श्वपरिवर्तनद्वादश्यांच। आ
षाढीकार्तिकीफाल्गुनीसमीपस्थद्वितीयासुच। अयनपक्षां

७ तेप्रेतद्वितीयायां च। महानवम्यां रथसप्तम्यां वा युगादिषु च। शुक्लपक्षे द्वितीया वैशा
खे प्रेतपक्षे त्रयोदशी कार्तिके नवमी शुक्ला माघे दर्शश्च पौर्णिमा। एता युगादयः
प्रोक्ता दत्तस्याक्षयकारकाः। मन्वंतरादयः सर्वेनध्याया इति केचन। आश्वियुक्
शुक्लनवमी कार्तिके द्वादशी सिता। तृतीया चैत्रमासस्य सिता भाद्रपदस्य च।।
आषाढे शुक्लनवमी माघेस्याच्छुक्लसप्तमी। श्रावणस्याष्टमी कृष्णा तथाषाढी च
पूर्णिमा। फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता। कार्तिकी फाल्गुनी चै
त्री ज्येष्ठी पंचदशी सिता। मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः। शवानुगमने
परिचरणे वा काशशब्दे वर्षणे वाहोरात्रं। श्राद्धिकं प्रतिगृह्य वारण्यकमधीत्य
वा। मनुष्यप्रभृतीनां नागादीनां च भुक्त्वा वाहोरात्रं। स्वप्नांतमित्येके। नवश्राद्धं ७
भुक्त्वान्नजरणांतं सूतकान्नभोजने चैवं। महदेकोद्दिष्टे त्रिरात्रं। गंधलेपक्षयां

तं वा। महागुरुनिपाते द्वादशरात्रं। आचार्ये चोपाध्याये च पक्षिणी। समानविद्ये सब्रह्म
चारिणि वाचार्यभार्यापुत्रशिष्येष्वहोरात्रं। ऋत्विग्याज्ययोनिसंबंधेष्वेवं। विद्युत्सा
तेग्न्युत्साते गोविभ्रमतो त्रिरात्रं। स्वशाखश्रोत्रियमरणे वाहोरात्रं। वेदसमाप्तौ प्रथ
मसंस्कासु तदाहोरात्रं। अपरेद्युश्चानध्यायः। ग्रहणे तु रात्रौ मोक्षे त्रिरात्रं। दिवामो
क्षे त्र्यहं। उपाकर्मणि चोत्सर्गे त्र्यहं। अयने विषुवे तु पक्षिणी। निर्घात भूकंपो
ल्कापातादिसर्वाद्भुतेषु। अकालिकोनध्यायः। अग्न्युत्साते च कालवृष्टौ च
आर्द्रादिज्येष्ठांता स्वकालादन्यत्र काले अकालवृष्टिः। सायंसंध्यागर्जने उदया
तो नध्यायः। अर्धरात्रादूर्ध्वं गर्जने अर्धरात्रे वा कालिकोनध्यायः। प्रातः सं
ध्यागर्जने वाहोरात्रं। काकोलूककुक्कुटमूषकमंडूकाश्व्या ध्यंतरागमने सति
दिने चेद्दिनांतो रात्रौ चेद्रात्र्यंतमनध्यायः। गवाश्वमहिषीपशुस्त्रीशूद्रावहोरा

८ त्रं। श्वमार्जारयोश्च। आरण्यमार्जारसर्पनकुलकपंचनखादौ त्रिरात्रं। आरण्यश्वसृगा
लवानरखजकादौ द्वादशरात्रं। खरवराहोष्ट्रादिश्वांडाकादिसूतकोदक्याशवादौ मा
सं। गोरगवयाजादिब्रह्महनास्तिकादौ त्रिमासं। शशमेषश्वपाकादौ षण्मासं। गज
दंडभासससिंहव्याघ्रमहापापीकृतघ्नादावब्दमनध्यायः। स्वाध्याये वा प्रवचने व
र्तमाने तरागतो आधिव्याधिमत्सु विप्रपापानि गुरुशिष्ययोर्भवंति। शोभनग
हे शोभनदिने वानध्यायः। विवाहमौंजीबंधप्रतिष्ठोद्यापनादिष्वाकर्मसमाप्तेः।
सपिंडसगोत्राणामनध्यायः। यज्ञे वानुबंधांतकृत्विजामाचार्याणां। श्वोन
ध्याये सति आद्यरात्रावनध्यायः। एकानध्याययुग्मं त्वेत्यापररात्रेनानध्या
यः। अनध्याययुग्मात्पूर्वदिनास्तररात्रावित्येके। श्वक्रोष्टृगर्दभोलूकमास ८
वीणार्त्तनिस्वने। अमेध्यशवशूद्रांत्यश्मशानपतितांतिके। देशेषुवोवात्म

नि च विद्युत्स्तनितसंप्लुवे। भुक्त्वार्द्रपाणिरंभोंऽर्द्धरात्रेतिमारुते। पांसुप्रवर्षे दिग्दाहे
संध्यानीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते। खरोष्ट्रयानहस्त्यश्वनौ
वृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतान्ताल्कालिकान्विदुः। सर्वकुत्सितगंधे
षु परिवेषसभासु च। अभ्यक्तस्नानकालेषु महास्वेदेतिकंपने। गोविप्ररोधने सर्व
शब्देषु श्राद्धपंक्तिषु। शाल्मलस्य कपित्थस्य कोविदारमधूकयोः। श्लेष्मातकस्य
छायायामेतांस्तात्कालिकान्विदुः। चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदा। दुर्मेधा
नामनध्यायस्त्वंतरागमनेषु च। तथा विस्मृतशीलानां बहुवेदप्रपाठिनां। चतुर्दश्य
ष्टमीपर्वप्रतिपद्वर्जितेषु च। वेदांगन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेत्। उदयेस्त
मये वापि मुहूर्त्तत्रयगामि यत्। तद्दिनं तदहोरात्रं अनध्याय विघ्नो विदुः। केचित्त
ढुः कश्चिद्दृशेयावत्तद्दिनं नाडिकाः। तावदेव त्वनध्यायो न तस्मिंश्च दिनांतरे।।

९ उपवासव्रतादीनां तिथिमाङ्गस्तथैव तु । चतुर्थ्यां पूर्वरात्रे तु न वनाध्यायं प्रदर्शने । नाध्येयं
पूर्वरात्रे स्यात्सप्तमी च त्रयोदशी ॥ अर्धरात्रात्पुरस्ताच्च नाध्येयं पूर्वरात्रकं । प्रणवव्याहृ
तीनां च सावित्र्याः शिरसस्तथा । नित्यनैमित्तिके कार्ये व्रते यज्ञे क्रतौ सदा । प्रवृत्ते का
म्यकार्ये च नानध्यायाः स्मृतास्तथा । देवतार्चनमंत्राणां नानध्यायाः स्मृताः सदा ।
॥ अथोत्सर्जनं ॥ ततः सार्धचतुर्मासान्षण्मासान्वाधीत्य पौषमासे रोहिण्यामष्टका
यां पौषे माघे फाल्गुने वा शुक्लपक्षप्रतिपद्यन्यस्मिन्वाह्नि पौर्णमास्यां वा सह शि
ष्यैर्ग्रामाद्बहिर्जलांते उत्सर्जनं कार्यं । तर्पणं च वर्षवाधीत्योपाकर्मदिने उत्सर्जनं का
र्यं न वा । तर्पणं तु कार्यमेव । एवं व्रतानि उभयं वा पारं नीत्वाऽप्लुतब्रह्मचर्यो विप्लवे
कृतप्रायश्चित्तो गुरुं संपूज्य तदनुज्ञया समावृत्तो विवहेत् ॥ ॥ इति ब्रह्मचारिप्र ९
करणम् ॥ ॥ अथ विवाहः ॥ ॥ मातृतः पितृतः शुद्धामभिन्नरूपां गुणान्वि
तां अदीर्घरोगसंचारी रोगपातित्यवर्जितां । असपिंडां तु पितृतः सप्तमात्पुरुषात्परां । मातृतः पंच

माद्दूर्ध्वमसमानार्षगोत्रजां । अनन्योढां भ्रातृमतीं स्त्रियं कन्यां यवीयसीं । पुमान्धीमा
न्वेदाधीतो द्विजो वर्णानुपूर्वतः । विवहेद्धर्ममार्गेण ब्राह्मादिषु यथाविधि । मातुलस्य सु
तां केचिदिच्छन्ति स्वसुः सुतादिकं । विवहंति क्वचिद्देशे संकोच्यापि सपिंडतां । दद्याद्ब्र
प्रतिगृह्णीयात्स्नातव्रतवस्त्रसमाहितः । ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता । दैवो वि
वाहः कन्याया ऋत्विजे दानमुच्यते । आर्षो गोमिथुनं दत्त्वा कन्यादानं यदा तदा । प्राजा
पत्यः सहधर्मं चरतामिति दानतः । आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः
। राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात् । ब्राह्मदैवार्षप्राजापत्या धर्म्याः ।
आसुरगांधर्वराक्षसपैशाचा अधर्म्याः । तत्राद्याश्चत्वारो विप्रस्यैव राक्षसः क्ष
त्रियस्यैव इतरे त्रयः सर्वेषां । ब्राह्मादिषु पूर्वं होमः कार्यः । पश्चात्कन्यास्वीका
रः । आसुरादिषु पूर्वं कन्यास्वीकारः पश्चाद्धोमः कार्यः । पितापितामहो भ्रा

श्री ॥१०॥ तापितृव्यो गोत्रजो गुरुः। मातामहो मातुलो वा कन्यादा बांधवाः क्रमात्। पित्रादौ द्वित्रा
भावे तु कन्या कुर्यात्स्वयंवरं। शुल्कं दत्वा वरेयाते पंच वर्तून्संप्रतीक्ष्य तु। कन्यान्यस्मै प्र
दातव्या वाग्दाने तु कृते वरे। मृते न्यस्मै तथा देया मृते सप्तपदात्पुरा। पूरा पुरुषसं
भोगान्मृते देयेति केचन। क्षतावदुष्टे कन्यैव पुनर्देयेति केचन। आगर्भधारणात्क
न्या पुनर्देयेति चापरे। देशकालादिमे धर्मा अनुष्ठेया विजानता। कुष्ठशीलविही
नस्य षंढादेः पतितस्य च। अपस्मारविकर्मस्थ रोगिणां वेषधारिणां। दत्तामपि ह
रेत्कन्यां सगोत्रोढां तथैव च। मंत्रसंस्कार रहिता देयान्यस्मै वराय सा। कन्या
दूषिता वर्ज्या देयान्यस्मै वराय सा। अन्यस्मा वहरन्दंड्यो न्ययं दद्याद्वसो ॥१०॥
दर्यां षंढांधबधिरादीनां विवाहोस्ति यथोचितं। विवाहासंभवे चैषां कनिष्ठो वि
वहेत्तदा। षंढांधबधिरस्तब्ध जडगद्गद पंगुषु। कुब्जवामनरोगार्त्त शुष्कांगविकलां

गिषु। ध्वस्तपुंस्त्वे च मत्ते च शयनस्थे निरिंद्रिये। मूकोन्मत्तेषु सर्वेषु न दोषः परिवेदने। पितृव्य
पुत्रे सापत्ने परदार सुतादिषु। विवाहाधानयज्ञादौ परिवेद्याद्यदूषणं। ज्येष्ठभ्रात्रा त्वनु
ज्ञाते परिवेद्याद्यदूषणं। पितुः सत्यप्यनुज्ञाते नादधीत कथंचन। आधानं न कुर्यादेव
पा ग्रास्तुः सवर्णासु गृह्णीयात्क्षत्रियाशरं। वैश्या प्रतोदमादद्याद्विवाहे ब्राह्मण
स्य तु। सवर्णेभ्यः सवर्णासु जायते हि सजातयः। अनिंद्येषु विवाहेषु पुत्राः संता
नवर्धनः। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अंबष्ठः शूद्र्यां नि
षादो जातः पारसीवोपि वा। वैश्याः शूद्रस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्या
त्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः। एते न्वनुलोमजाः पुत्राः संस्कार्यास्तु
द्विजातिजाः। तथा मूर्द्धावसिक्तादि जातिजाश्च द्विजातयः। ब्राह्मण्यां क्षत्रि
यात्सूतो वैश्या द्वैदेहिकस्तथा। शूद्राज्जातस्तु चांडालः सर्वधर्मबहिष्कृताः

क्षत्रियामागधंवैश्याश्छूद्रात्क्षत्तारमेवच।शूद्रादायोगवंवैश्याजनयामासवैसु
॥११॥ तं।माहिष्येणकरण्यांतुरथकारःप्रजायते।इत्याद्याःप्रतिलोमास्युर्द्विजधर्मब
हिष्कृताः।विवाहात्परमाधायजुहूदेवाग्निहोत्रकं।दर्शपौर्णमासाग्रयणसो
मयागान्क्रमाच्चरेत्।सर्वथाप्रथमःसोमयागःकार्योद्विजोत्तमैः।यथासंभवि
नांगेनफलंदत्वावदक्षिणां।ज्ञात्वदुर्ब्राह्मणत्वादिमहादोषोपशांतये।सूर्यग्रहे
कुरुक्षेत्रेमेषीकृष्णाजिनादिकं।चांडालात्प्रतिगृह्यापियजेतावश्यकैर्मखैः।
अथवौपासनंधृत्वाजुहूज्ञार्हाणिवाचयेत्।अर्द्धाधानेमहच्छ्रेयोगार्हश्रौतो
भयात्मकं।एकस्त्वंस्त्रीगताभर्त्तुःपिंडेगोत्रेचसूतके।सत्यामन्यासवर्णायांध
र्मकार्यंनकारयेत्।सवर्णासुविधौधर्म्येज्येष्ठयानुविनेतराः।आज्ञासंपाद ॥११॥
नीरक्षापुत्रसूश्चप्रियाशुचिः।निवेद्याधर्मकार्येषुनाधिवेद्याकथंचन।स

काभक्ताशुचिर्दक्षानियोज्याधर्मकर्मसु।अशुद्धाजारिणींशूद्रांदूषितांचविवर्जयेत्।
सुतरांव्याधिताधूर्त्ताविंध्यार्थघ्न्यप्रियंवदा।स्त्रीप्रसूश्चाधिवेत्तव्यापतिद्विड्मृतप्र
जा।गृहस्थस्तुषडग्निःस्यात्संचाग्निश्चतुरग्निकः।स्याद्वाह्याग्निरथैकाग्निनाग्नि
हीनःकथंचन।गार्ह्यमौपासनेकुर्यात्सर्वाधानेतुलौकिके।स्मार्त्तंचलौकिकेकार्यं
श्रौतंवैतानिकाग्निषु॥ ॥अथात्रगोत्रनिर्णयोवर्ण्यतेंजसा।जमदग्नि
र्भरद्वाजविश्वामित्रात्रिगौतमाः।वसिष्ठकश्यपागस्त्यामुनयोगोत्रकारिणः
।एतेषांयोन्यपत्यानितानिगोत्राणिमन्वते।प्रियमाणातयावापिसत्रयावा
नुवर्त्तिनं।एकस्यदृश्यतेयत्रतज्ञोत्रंतत्रकथ्यते।समानमुनिभूयस्त्वमेक
प्रवरतामिति।समानप्रवरत्वंचदेवाबौधायनोब्रवीत्।मुनिप्रणीतप्रवरैस्तुन्
पंचाशतावयं।अनंतान्यपिगोत्राणिवर्गइत्याभिदध्महे।जामदग्न्यावत्सवि

दावार्ष्टिषेणाः परस्परं। नान्वीयुः प्रवरैक्येन स्वगोत्रत्वेन वादिमौ। यस्कामित्रयुवोवैन्याः
शुनकाः प्रवरैक्यतः। स्वस्वं हित्वा गणं सर्वे विवहेयुः परावरैः। उक्ताः सप्त भृगोर्वंशाव
क्ष्यतेंगिरसां गणः। गौतमाः सप्तवायस्याः शारद्वंशास्तथापरे। कौमंडादीर्घतमसस्त
लंकारेणुपाल्ल्यः। वामदेवा औशनसो गोत्रार्षैक्यात्र नान्वियुः। भरद्वाजाः सकपयोग
र्गारोक्षायणा इति। चत्वारोपि भरद्वाजा गोत्रैक्यान्नान्वयुर्मिथः। केवलांगिरसस्त्व
ते विष्णुवृद्धाः सकण्वकाः। हरितारा थीतरा श्च मुद्गलाः। प्रवरैक्यतः। स्वं स्वं हित्वा ग
णं सर्वे विवहेयुः परावरैः। षोडशांगिरसस्त्वेतो याप्रोप्ताः संकृतयस्तथा। संकृतीनां
द्विश्यत्वाद्वसिष्ठैश्च चतुर्विधैः। स्ववर्गीयैः स्वगोत्रत्वात्प्रवरैक्याच्च नान्वयः। चत्वारो
त्रय आद्यास्त्रिबाह्लूतकगविष्ठिराः मुद्गलैश्चेति गोत्रैक्यात्प्रवरैक्याच्च नान्वयुः
त्रयश्च कश्यपगणा निध्रुवा रेभ शांडिलाः। गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्प

रं। वसिष्ठैः कश्यपैर्नित्यं लौगाक्षीणाम नन्वयः। अहर्वसिष्ठज्योत्तिस्तु प्रजास्यागादि
गोचराः। वसिष्ठाः कुंडिनश्चैव उपमन्युपराशराः। वसिष्ठा इति चत्वारो गोत्रैक्यान्नान्वि
युर्मिथः। कुशिका रोवित्तगणा रोस्थका कौमकायनाः। कताधनंजया आजा अ
घमर्षणपोरणाः। इंद्रकौशिकजाश्चेति विश्वामित्रगणा दश। नोद्वहेयुः सगोत्रत्वा
त्के चित्प्रवरैक्यतः। अगस्त्ययः सांबवाहाः सोमवाहा इति त्रयः। गोत्रैक्यात्प्रवरैक्याच्च नो
द्वहेयुः परस्परं। वर्णा एकोनपंचाशत्प्रसिद्धा मुनिभिः स्मृताः। अप्रसिद्धाः परे वंशा अंतर्भू
ता इहैव ते। विश्वामित्रात्रिगोत्रेश्च नोद्वहेयुर्धनंजयाः। अत्रेस्तु पुत्रिकापुत्रा वामरथ्याद
यस्तथा। तथैव जातूकर्ण्याश्च वसिष्ठैरत्रिभिः सह। भारद्वाजेन शुंगेन विश्वामित्र
स्य शैशिरेः। क्षेत्रजा नोद्वहेद्गोत्रर्षिः प्रोच्यते श्रोंगशैशिरिः विश्वमित्रभरद्वाजैस्त
छानांतेनन न्वयः। कपिजानां भरद्वाजैर्विश्वामित्रैश्च नान्वयः। गुरोः सगोत्रप्रव
रान्नोद्वाह्याः क्षेत्रविज्ञनैः। स्वगोत्राद्यनभिज्ञैश्च विप्रेराचार्यगोत्रजाः। दानादिना
न्यगोत्राः स्युरसातगुरुगोत्रिणः। समानप्रवरोद्वाहनिषेधः क्षेत्रवैश्ययोः। प्रवरा

न्मानवास्त्रख्याःप्रवराश्चान्यगोत्रतः। इत्थंसगोत्रसंबंधविवाहविषयेस्थिते। यदिकश्चिदज्ञा
१२ नतस्तांकन्यामुद्वोपगच्छति। गुरुतल्पव्रतंकुर्याद्गर्भस्तेजौंत्यतांव्रजेत्। भोगतस्तांप
रित्यज्यपालयेज्जननीमिव। अज्ञानाद्वैदैदवैस्यात्शुद्धोगर्भस्तुकश्यपः। महद्भिर्महतो
पत्रात्कृतः प्रवरनिर्णयः। जामदग्न्यावत्सविदाआर्ष्टिषेणास्तथैवच। पंचावत्तिन
एवान्येसर्वेचतुरवत्तिनः। छ विवाहेविततेतंत्रेहोमकालउपस्थिते। कन्यामृतु
मतींदृष्ट्वाकथंकुर्वंतियाज्ञिकाः। स्नापयित्वातुतांकन्यामर्चयित्वायथाविधि। युंजा
नआहुतिंहुत्वाततःकर्मप्रवर्त्तयेत्। यद्वा। विवाहहोमेप्रक्रांतेयदिकन्यारजस्वला।
त्रिरात्रंदंपतीस्यातांपृथक्शय्याशनासनौ। चतुर्थेहनिसुस्नातौतस्मिन्नग्नौयथाविधि।
विवाहहोमंयदिवैकुर्यादित्यादिस्मृतिसंग्रहः। विवाहेदंपतीस्यातांत्रिरात्रंब्रह्मचारि १२
णौ। अलंकृतावधूश्चैवसहसस्यासनाशनौ। अधर्म्येषुविवाहेषुतांबूलमनुमोदनं।

हायनंभोजनंचैववर्जयेत्सर्वथाद्विजः। आसुरेतूपवासस्याद्गांधर्वेतुत्रिरात्रकं। राक्षसेचैवपै
शाचेकार्यंचांद्रायणंतथा॥ गर्भाधानादिसंस्कारेष्विष्टापूर्त्तकृतेष्वपि। वृद्धिश्राद्धंपुराका
र्यंकर्माहेस्वस्तिवाचनं। वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजते। चूडाहोमावसानेषुबाहुमु
ख्याःप्रभुंजयेत्। वसवोरुद्राआदित्यास्त्र्यवरस्थाःकामरूपिणः। बालकायुवानोवृद्धाश्चपितृ
णामाश्रयाःस्मृताः। प्रेतानामाश्रयारुद्रायमश्चैवांतरस्मृतः। असंस्कृतप्रमीतानांब्रह्मवि
ष्णुशिवाश्रयाः। अनाश्रितानांजीवानांदत्तंनैवोपतिष्ठते। प्रारंभादूर्ध्वमाशौचेविवाहः
कार्यएवतु। प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः। नांदीश्राद्धंविवाहादौश्राद्धेपाकपरि
क्रिया। निमंत्रणंवाश्राद्धेषुप्रारंभःस्यादितिस्मृतिः। गणशःक्रियमाणानांमातृणांपूजनं
सकृत्। वृद्धिश्राद्धंचतंत्रंस्याद्धोमंकुर्यात्पृथक्पृथक्॥ ॥इति॰विवाहप्रकरणं॥ ॥
॥ ॥अथाह्निकमुच्यते॥ ॥तत्रप्रभातउत्थायइष्टदेवतांमनसाध्यात्वानदहःकृत्स

जातंस्मृत्वासंध्योपासनंकुर्यात्।तत्रमूत्रपुरीषोत्सर्गमेवंकुर्यात्।अथानस्यात्याज्ञिकादिशु
१४ ष्ककाष्ठतृणलोष्ठपर्णादिकंगृहीत्वाशिरःप्रावृत्यनिवीतंपृष्ठतःकंठलंबितंधृत्वाएकवस्त्र
श्चेत्कर्णेदक्षिणेनिधायदिगवलोकनंकृत्वाकाष्ठाद्यंतर्धानंमूत्रंकुर्वन्नवा।मौनंवाघ्राण
स्यपिधानंक्रमात्कृत्वादिवासंध्ययोरुदङ्मुखोवारात्रौदक्षिणामुखोवामूत्रपुरीषोत्सर्गंकुर्या
त्।फालकृष्टेजलेचित्यांवल्मीकेगिरिमस्तके।देवालयेनदीतीरेदर्भपुष्पकुशाद्वलेसे
व्यछायेषुवृक्षेषुमार्गगोष्ठांबुभस्मसु।अग्नौगच्छंश्चतिष्ठंश्चविष्ठांमूत्रंचनोत्सृजे
त्।वाय्वग्न्यर्केंदुगोसोमसंध्यास्त्रीद्विज — न्मनः।पश्यन्नभिमुखंचैतान्विष्ठांमूत्रंचनोत्सृ
जेत्।सर्वेनिषेधानैवस्युःप्राणबाधभयेषुवा।काष्ठादिनात्वपानस्थममेध्यंनिमृजीत
वारथ्यावलरतीर्थेषुस्मशानेगोमयेजके।अगारोद्धनसप्राणियज्ञभूमिषुनोत्सृजे १४
त्।कर्दमूककफांगारैर्नामेध्यंनिमृजीतवा। इतिमूत्रपुरीषोत्सर्गविधिः अथशौच

विधिः. शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः शौचाचारविहीनस्यसमस्तंकर्मनिष्फ
लं।शौचंतुद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा।मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिरथांतरं
।गृहीतशिश्नश्चोत्थाय — — — भ्दैर्जलैः।गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः।अं
तर्जलेदेवगृहेवल्मीकेमूषकस्थले।कृतशौचावशिष्टाश्चनग्राह्याःपंचमृत्तिकाः।मा
र्गोखरस्मशानस्थाःपांसुलामलिनास्त्यजेत्।कीटांगारास्थिरहितामाहरेच्छर्करा
न्विता।वापीकूपतडागेषुनाहरेद्बाह्यमृत्तिकां।अंतर्जलेगतायाह्योद्धरतोमणिबंध
नात्।आरण्यकेषुचैवंस्याद्ग्राम्येष्वाहरणंविदुः।मूत्रे।एकातुमृत्तिकालिंगेतिस्रःस
व्येकरास्मृताः।करद्वयेमृद्द्वयंस्यान्मेरुस्त्रमाणमनेकधा।त्रिपर्वपूरमात्रावामृत्तिका
क्षप्रमाणिका।आर्द्रामलकमात्रावामत्रशौचेतुमृत्तिका।मूत्रात्तुद्विगुणंशुक्रेमैथु
नेत्रिगुणंस्मृतं।पुरीषेतु।पंचापानेमृदःक्षेप्याःकरेवामेदशस्मृताः।करयोःसप्तदा
तव्याःपुरीषेमृत्प्रमाणकं।अर्द्धप्रसृतिमात्रावाथातदर्द्धार्द्धस्ततःपरः।यद्वापानेमृद

१५ त्तिस्त्रः प्रसृत्यर्द्धविभागिकाः॥ यद्वा प्रसृतिमात्रास्त्रिः पाण्योः पाण्योः पृथक् पृथक्॥ एतच्छौ
चं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणं॥ यद्दिवावि
हितं शौचं तदर्द्धं निशि कीर्तितं॥ तदर्द्धमातुरेष्वोक्तमातुरस्यार्धमध्वनि॥ स्त्रीशूद्रादेरशक्ता
नां बालकानां त्वोपनीतितः॥ गंधलेपक्षयकरं शौचं कार्यं न संख्यया॥ एके कुर्यान्मृदा पादौ ह
स्तौ प्रक्षालयेत्ततः इति शौचविधिः अथाचमनविधिः तत्र पादौ हस्तौ प्रक्षाल्य यज्ञो
पवीती पादौ भूमौ प्रतिष्ठाप्य निबद्धकच्छशिखः पुंडरीकाक्षमिष्टदेवं स्मृत्वा प्रकृतिस्थं फेन
बुद्बुदरहितं संहतांगुलिपाणिनांबु गृहीत्वांगुष्ठकनिष्ठिकाभ्यां शेषं वीक्षितं ब्रह्मतीर्थेन
त्रिश्चतुर्वा समाहितः पिबेत्॥ न पित्र्येण कदाचन॥ पीत्वा हस्तौ प्रक्षाल्य संहतांगुलिभिर्मु
खं सकृद्देवनिमृज्य हस्तौ प्रक्षाल्य पादौ शिरश्चाभ्युक्षेन्नेवा॥ संहतांगुलिभिरास्यप्रदेशं १५
सलोमप्रदेशं स्पृष्ट्वा हस्तौ प्रक्षाल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं स्पृशेत्॥ अंगुष्ठानामिका
भ्यां चक्षुषी श्रोत्रे च स्पृशेत्॥ अंगुष्ठकनिष्ठिकाभ्यां नाभिं हृदयं तलेन सर्वांगुलिभिः

शिरो बाहुमूले सर्वांगुल्यग्रैः स्पृशेत्॥ सर्वत्र मध्ये मध्ये जलं स्पृशेत्॥ अशक्तो त्रिः पीत्वा ह
स्तं प्रक्षाल्य मुखं प्रमृज्य खानि स्पृशेत्॥ अत्यशक्तोपि पीत्वा हस्तं प्रक्षाल्य श्रोत्रं स्पृशेत्॥ हृ
त्कंठतालुगाभिः स्युरद्भिः शुद्धाः क्रमाद्द्विजाः॥ स्त्रीशूद्रादयोंततः सकृत्स्पृष्टाद्भिः शुद्धाः॥
न वर्षधारास्वाचमेत्॥ न धाभिश्चाप्यकारणात्॥ कनिष्ठादेशिन्यंगुष्ठमूलेषु नके काय
पित्र्यब्राह्मतीर्थानि॥ कराग्रे दैवं॥ करमध्ये सौम्यमग्नितीर्थं च॥ निर्वापण संस्रवण जुहो
मनित्यहोमान् कायेन तीर्थेन कुर्यात्॥ दैविकं च॥ अर्चनबलिप्रक्षेपणपर्युक्षण भोजन
भोजननित्यहोमान्॥ दैवेन॥ दैविकं च॥ पैत्रिकं पित्र्येण॥ कमंडस्पर्शनं दधिप्राशनं च वान्न
प्राशनं मृद्ग्रहणं दैविकं सौम्येन कुर्यात्॥ आग्नेयेन प्रतिग्रहं कुर्यात् इत्याचमनविधिः
अथाचमननिमित्तानि॥ उच्छिष्टस्पर्शने पादावसेचने शिखामोक्षे॥ यज्ञोपवीता
गमे च उदकमुत्तीर्य॥ वतीर्य च सर्वेषु संदेहेषु आचमेत्॥ आस्यगतश्मश्रुस्पर्शने॥ बालो
मकोष्ठस्पर्शने दंतगमने च दंतसिक्तस्य जिह्वायां स्पर्शने च रथ्याप्रसर्पणे च रोदने च॥

अस्नेहपं वनखा स्थिस्पर्शनेच विण्मूत्ररेतःशोणितेच पीत्वा वावलीढ दन्तसिक्थं निष्ठीव्य दे
१६ वताविगमने चद्विराचामेत्। स्नात्वा पीत्वा वा वलीढे च निष्ठीव्य सुप्त्वाऽधोवासो विपरिधा
य संपरिधाय च अभ्यंगे कृते हविर्भक्षणे च कृते द्विराचामेत्। भोजने हवने दाने उपहारे प्रति
ग्रहे। संध्यात्रयां बुपानेषु पूर्वं पश्चाद्द्विराचमेत्। स्वाध्याये च वस्त्रादिसहित उच्छिष्टश्चे
त्तदालस्यांके निधाय वासःसहितः शुध्येत्। निधाय वा वम्य वस्त्रादिकं प्रोक्षेत्। अति
पानादिसहित उच्छिष्टश्चे निधायाचम्य प्रोक्षेत्। अन्नादिरक्षाशक्तो नु तदालीयांके
पि निधाय वा सेनं कुर्यात्। परिवेषणं कुर्वन्नुच्छिष्टस्पृष्टो अन्नपात्रं निधाय भूमावाच
म्याभ्युक्ष्य परिविष्यात्। परिवेषणं कुर्वन्मूत्राद्यशुचिश्चेदन्नादिकं निधाय शौचाच
मने कृत्वान्नादिकं प्रोक्ष्य अग्निमर्कं वा संस्मृत्य परिविष्यात्। परिवेषणे रजोदृष्टौ त
त्स्पृष्टस्यान्नस्य त्यागः। अन्नाधारे श्वांडालसूतिकोदक्यापतितादिस्पृष्टे त्याग एव। १६
रजकादिस्पृष्टे तु जलेनाप्लाव्याग्निकर्मं वा स्पर्शयेत्। उच्छिष्टोपहत स्त्रीशूद्रसं

भाषणे वास्पृश्यदर्शने वापित्र्यमंत्रानुश्रमणे। आत्मालंभे च मोक्षणे अधोवायुसमुत्स
र्गे आक्रंदे क्रोधने क्षुते। मार्जारमूषिकास्पर्शे प्रहासे ष्ठीवने तथा। अन्तेंत्यजसंभा
षणे दर्शने च कर्म कुर्वन्नाचमेत्। श्वकाकादिस्पर्शने चैवं। अकर्म कुर्वन्पूर्वेषु दक्षिणं श्र
वणं स्पृशेत्। अनुष्ठाने ग्निगोविप्रस्त्रीप्रच्युतकेशनखस्पर्शने नीवीस्रंसने वापः स्पृशे
त्। आर्द्रं तृणं गोमयं वा भूमिं वा ओषधीः स्पृशेत्। कर्णं वा स्पृशेत्। स्रणिकश्मश्रुरक्त
पूयस्वेदस्पर्शने तु प्रक्षाल्याबादिकं स्पृशेत्। आपत्सु नैमित्तिककर्मांगाचमनस्था
ने अबादिस्पर्शनस्याशुद्ध्यर्थे। अग्निस्तीर्थानि वेदाश्च वरुणार्केंदुवायवः। विप्र
स्य दक्षिणे कर्णे नित्यं तिष्ठंति पूजिताः। जपहोमप्रदानेषु पितृपिंडोदकादिषु। कृते
ष्वाचमनं कार्यं पितृकार्येषु सर्वदा। नास्पृश्यं स्पृशन्नाचमेत्। न फलकाद्यासन
मासीनो न त्रिपाद्यं नान्यार्थे आसने न भोजनार्थे आसने भुक्त्वाचमेद्बुधः। नान्यदाना

न्यासने।शयने।नपादुकोपानहस्थः।नदुर्देशेनपादाग्रस्थोनप्रह्वोनतिष्ठन्नव्रजन्नोप्र
१७ णतोनान्यमनानविलोकयन्।नहसन्नरुदन्नजल्पन्ननग्नोनैकवस्त्रोनाजलितोन
परंस्पृशन्नवामहस्तेननबहिर्जानुकरोनप्रौढपादोनप्रसारितपादोनबद्धासनोनग
केबद्धोनवेष्टितशिरायज्ञोपवीतमुत्तरीयंवान्यथाधृत्वानाचमेत्।तत्रसम्यग्धृत्वा
पुनराचमेत्।यज्ञोपवीतेनष्टेनसूत्रंवस्त्रंवोपवीयनाचमेत्।वामहस्तेकुशेन्यदर्भैवा
स्थितेदक्षिणेननपिबेत्।आपःकरनखैःस्पृष्टानपिबेत्।तत्सुरावद्दृष्टं।आचम
नाद्युच्छिष्टेषुदूर्वांदूरतोवर्जयेत्।नसांगुलिभिराचमेत्।नातीर्थेननशब्दवत्।ना
विनीता।नास्वभावेनोष्णंजलमकारणात्।वामेनपात्रमुद्धृत्यनपिबेद्दक्षिणेन
तु।सौवर्णरौप्यताम्रैश्चवेणुबिल्वाश्मचर्मभिः।अलाबुदारुपर्णैश्चनालिकेकैः १७
रैःकपित्थकैः।तृणकाष्ठैर्जकाधारैरन्यांतरितमृन्मयैः।वामेनोद्धृत्यवावामदत्त

दानुरसंभवे।विनाचांतोऽशुचिर्नित्यंबद्धकंठेशिरस्यपि।पवित्रकरआचामेच्छुचिःकर्मार्थ
मादरात्।कुशमात्रकरोवामिदर्भमात्रकरोपिवा।एतदोंकारेणाचमनंयद्वाव्याहृति
भिर्भवेत्।सावित्र्यावापिकर्तव्यंयद्वाकार्यममंत्रकं।तत्कुशंविधिवल्लूनंनत्यजेद
न्यथात्यजेत्।अन्येदर्भास्तुसंत्याज्यास्त्याज्यादूर्वापुरैवतु।नपादप्रक्षालनशेषमा
चमेत्।यद्वाजामेद्भूमौजलंस्रावयित्वाचामेत्।नपादप्रक्षालनशेषेणनाचमनशे
षेणनाग्न्युदकशेषेणकर्मकुर्याद्यदिकर्मकुर्याद्भूमौजलंस्रावयित्वातत्रान्यांबुपा
त्रंस्थापयित्वाऽत्यकर्माणिकुर्यात्। अथाचमनापवादाः आस्निग्धेऔषधे
जग्धेस्निग्धेवद्धेचलोचने।नाचामेद्भोजनेवृत्तेशुष्कार्थंक्रमकादिषु।अन्येषुचा
मभक्ष्येषुसंभारेषुसुगंधिषु।तांबूलेचक्रमुकेहोमभुक्तस्नेहेतुलेपने।इक्षुदंडेतिले
मूलेपत्रपुष्पफलेषुच।तथात्वक्तृणकाष्ठेषुनाचामेदामभक्षणे।मधुपर्केचसो

मेवप्राणाहुतिषुवास्रुवा।आस्यहोमेषुसर्वेषुनोच्छिष्टोभवतिद्विजः॥दंतवद्दंतलग्नंरसा
१८ ज्ञानेशुद्धं।जिह्वायास्पर्शेऽपिशुद्धं।तच्चकर्णस्पर्शनं।अन्यथास्यगतंशुद्धंअन्यथाचां
तेतस्थानाच्च्युतेनिर्गिरन्न्यजन्वाकर्णस्पृशेत्।यद्वानिर्णोकर्णौस्पृशेद्धि।स्वक्तेलाच
मनं।रसज्ञानेऽसंभारेद्विराचमनमिष्यते।अन्यथास्यगतंचैवमाचांतेष्वविशिष्टकं।
आस्यंसंशोधयेद्यत्नाद्दंतांश्चमडयत्नतः॥दंतवेधेमहत्पापंरक्तंमद्यसमंविदुः॥एवंकृ
तेयत्स्थितंस्यान्नैदोषायसर्वदा।ॐ छश्मश्रुगतोलेपःशुद्धःप्रक्षालितःस्थितः
मुखजाविप्रुषःमतःसूक्ष्माःशुद्धाःस्वाश्चपराश्चताः॥स्थूलाश्चविप्रुषःशुद्धायद्यं
गेनपतंतिताः॥अंगपातेतुप्रक्षाल्यआचमेच्चपरस्यचेत्।बिंदुश्चाचमनंकुर्युरन्यंगेप १८
तितेष्वपि।वेदाभ्यासेमुखाज्जाताःशुद्धाएवतुसर्वतः॥श्मश्रुवास्यगतंशुद्धंयद्यंगे
नतुनस्पृशेत्।परस्यस्पर्शनेशुद्धाभूस्पृष्टाचमबिंदवः॥जानुमात्रेजलेतिष्ठन्नाचा

मन्हिनदुष्यतिउपविष्टः॥समावामेजानुमात्रादध्योजले।जलाचांतोजलेशुद्धोबहि
राचमनेबहिः॥बहिरंतस्थआचांतेसर्वत्रशफ़निरेवतु।जलस्थोजलकार्येषुस्थलस्थः
स्थलकर्मसु।उभयेषुभयस्थस्तुआचांतःशुचिमाप्नुयात्।नजलेशुष्कवस्त्रेणान
स्थलेचार्द्रवाससा।आचामादिक्रियाकुर्याद्बहिर्जानुर्नकुत्रचित्। इत्याचमनाप
वादाः अथदंतधावनविधिः प्रातर्भुक्त्वाचशुद्ध्यर्थंकर्तव्यंदंतधावनं।प्राङ्मु
खईशानाभिमुखोवादक्षिणंबाहुमुद्धृत्यांतर्जानुकरउपविश्यतिक्तकषायक
टुकसुगंधिकंटकीक्षीरवृक्षगुल्मलतादीनामेकेनप्रक्षालितेनवाग्यतोदंतान्धा
वयेत्।तत्रवृक्षजंकाष्ठंस्यादव्रणंऋजुंकीटाद्यदूषितंतद्द्वादशांगुलमष्टांगुलंवा
कनिष्ठिकाग्रसमंस्थूलंपर्वार्धकृतकूर्चकं।दंतधावनमुद्दिष्टंजिह्वालेखनिका
तथा।क्षत्रादिषडंगुलोगुलह्रासः॥स्त्रीणांचतुरंगुलं।सर्वेषांचैके।आयुर्बलंय

शोवर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते। दंतधावनमंत्रः। प्र
१९ क्षाल्य भक्षा त्यजेत्। तत्र खदिरकरंजवैकंकतकरवीरकुंजराशनार्कसर्जौ रिमेदा
पामार्गमालतीबिल्वाम्रकदंबवंजुलवेणुप्लक्षमाषकबदरशिरीषकोविदारपलाश
शाखावृक्षशिखंडीप्रियंगुतमालाः प्रशस्ताः। शाल्मलीभयकिंशुकपीलुबिभीत
कगुग्गुलोंबष्ठकुनुकस्तृष्टतिंदुकमधुककुंदधुत्तूरपारिभद्रांम्लिकाश्च वर्ज्याः। इष्टका
लोष्ठपाषाणैर्न कुर्याद्दंतधावनं। दधिमीलिधवामोचाः कदंबेंगुदतिंदुकाः। मधुक
मल्लिकाढक्यारक्तकार्पासश्रीहराः। ततोदुंबरश्च वकैटश्च क्रमुकश्च शिंशिपाः
शिग्रुश्च कुशकाशै दंतशुद्धौ गां पश्येन्नान्यथा शुचिः। निर्गुंडीशिंशिपशाखाः क १९
दंबकुकुरावयः। विहितप्रतिषिद्धाः स्युरिमे तस्माद्विकल्पिताः। पलाशं कुसुमं
काशं शिंशिपं कार्पासं दमयंती। शाल्मली शिरीषं शमी लक्ष्मणं करंजं

यार्कं बकुलं पारिजातकं। निर्गुंडी सूचीमुखकंटकिनश्च पूतिगंधो यगंधं बपुरविदुल
विधवविषदुग्धमूर्द्धशुष्कं च वर्जयेदित्येके। आसने शयने याने पादुके दंतधावने। पा
लाशाश्वत्थको वर्ज्यौ सर्वकुत्सितकर्मसु। श्राद्धे यज्ञे च नियमे पत्यौ च प्रोषिते तथा
।अजीर्णे च विवाहे च उपवासव्रतेषु च। प्रतिपद्दर्शषष्ठीषु नवम्यां च विशेषतः। षष्ठी
प्रतिपदोर्भूताष्टमीपर्वसु विशेषतो दर्शनवम्यौ च तैलाभ्यंगं स्त्रियं मांसं दंतकाष्ठं
च वर्जयेत्। अभावे दंतकाष्ठानां निषिद्धदिवसे तथा। अपां द्वादशगंडूषैर्विदध्या
द्दंतधावनं। यद्वा तृणपर्णोदकेनांगुल्या वा दंतान्धावयेत्। प्रदेशिनी विवर्ज्या। मध्य
मानामिकांगुष्ठैर्दंतदार्ढ्यं भविष्यति। इति दंतधावनविधिः अथ स्नानवि
धिः। संशोध्य दंतानानम्य विधिवत्स्नानमाचरेत्। स्नानमूलाः क्रियाः सर्वाः

२० श्रुतिस्मृत्युदितानां॥ अस्नातस्तु पुमान्नार्हो जपहोमादिकर्मसु। गुणा दश स्नानपर
पुंसो स्य साधो रूपं च तेजश्च बलं च शौचं। आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च य
शश्च मेधा। स्नानेन मनसः प्रसादः स्याद्देवताभिमुखाः सदा। सौभाग्यं श्रीः सुखं पुष्टिः पु
ण्यं विद्या यशो धृतिः। महापापान्यलक्ष्मीश्च दुरितं दुर्विचेष्टितं। शोकदुःखानि हि
रणं प्रातःस्नानं विशेषतः। प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः। यतेस्त्रिषव
णं स्नानं सकृत्तु ब्रह्मचारिणः। सर्वे वापि सकृत्कुर्युरशक्तौ चोदकं विना। स्नानं च स
र्ववर्णानां कार्यं शौचपुरःसरं। समंत्रकं द्विजातीनां स्त्रीशूद्राणाममंत्रकं। नमस्का
रेण मंत्रेण सच्छूद्राणां क्रियाः स्मृताः। नजलेशु चवस्त्रेण स्थले चैवार्द्रवाससा २०
। तर्पणाचमनं जप्यं मार्जनादिकमाचरेत्। आत्मस्नाने च सूर्यार्घ्यं जपोत्सर्जनत

र्पणे। जले चैव होमान्शुष्केण जले कुर्वन्न दुष्यति। स्नानं च द्विविधं प्रोक्तं वारुणेतरभेद
तः। तत्रापि वारुणं मुख्यमितरद्गौणमेव च। आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च
। सारस्वतमिति स्नानं स्मृतं षोढैव तत्र तु। आग्नेयं भस्मना स्नानमद्भिर्वारुणमुच्य
ते। आपो हि ष्ठेति च ब्राह्मं मंत्रस्नानं हि तत्स्मृतं। पच्छोऽर्द्धर्चशः कृत्स्नाश्च मार्जने तन्म
तं स्मृतं। ब्रह्महस्तच्युतं तोयं शिरसा धारयेदिति। यत्स्मृतं तदपि ब्राह्मं वायव्यं रज
सा गवां। दिव्यमातपवर्षाद्भिर्गंगास्नानसमं स्मृतं। ब्रह्महस्तच्युतं तोयं विद्धि सरस्वती
वाचा प्राप्तं सारस्वतं स्मृतं। दिव्यं तीर्थमयं स्नानं गुर्वाद्यैरितं तथा। सर्वतीर्थाभिषेका
च्च पवित्रं विदुषां हि वाक्। चंडालकादिस्पर्शने तु कार्यं वारुणमेव तु। कार्यमल्पापकर्ष
णक्रिया स्नानं च वारुणं। इतराणि यथायोग्यं देशकालाद्यपेक्षया। स्रोतसोऽभि
मुखः स्नायान्मार्जने चाघमर्षणे। अन्यत्रार्कमुखो रात्रौ प्राङ्मुखो वाग्निमुखो
पि वा। संध्यामुखस्तु संध्यायां तथैवाद्यं तयामयोः। नित्यं नैमित्तिकं काम्यं क्रि

यांगं मलकर्षणं। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितं। नित्यमेव तु मध्याह्ने प्रा
२१ तः स्नानं च कस्यचित्। यतिव्रतिब्रह्मचारिहोत्रप्येतत् तपस्विनां। उच्छिष्टाद्युपघाते
षु वा स्पर्शास्पर्शनेषु वा। ग्रहसंक्रमणाद्यौ च स्नानं नैमित्तिकं स्मृतं। पुष्यस्नानादि
कं काम्यं दैवज्ञविधिचोदितं। इष्टापूर्त्तक्रियार्थं यत् क्रियांगं स्नानमुच्यते। मलाप
कर्षणं यत्तु स्नानमभ्यंगपूर्वकं। स्नानमेव फलं तीर्थे क्रियास्नानं तदुच्यते। स्ना
नं हस्तचवगोह्येव स्नात्वान्य स्नानमाचरेत्। प्रक्षाल्योच्छिष्टमुच्छिष्टस्तथैव स्ना
नमाचरेत्। नाल्पांभसि न रोमज्जेदन्यत्रापि सरित्सु तु। उदयात्पूर्वमूर्ध्वं वा =
स्नानं स्यात्संगवेपि वा। नावगाह्येत्समुद्रके। क्रियास्नाने शिरो मज्जेदन्यत्रापि
सरित्सु तु। उदयात्पूर्वमूर्ध्वं वा स्नानं स्यात्संगवेपि वा। प्रातः संक्षेपतः स्नानं २१
होमाद्यर्थं तदिष्यते। नदी सरिद्देवखातगर्त्तप्रस्रवणेषु वा। सरस्सु वा कृत्रि

मेषु शस्तं तीर्थविशेषतः। वाप्यां कूपे तडागे वा पारक्ये चोद्धृतवारिणि। प्रातः स्नानं सदा कु
र्यादुष्णेनैव सदातुरः। तत्र पादौ मुखं प्रक्षाल्य प्रणवं सावित्रीं स्मृत्वा शिखां बध्वाच
म्य तत् प्रक्षाल्य दर्भान्निधाय दर्भपाणिर्जलं नत्वा प्रतर्ताजलिः प्राङ्मुखोवगा
ह्य कक्षादीन्विमृज्य स्नात्वाद्भिराचम्य दर्भपाणिरापोहिष्ठाद्यैरब्दैवतैर्मार्जनं कृ
त्वा जलालोडनमघमर्षणं कुर्यान्नवा। पुनः स्नात्वाद्भिराचम्य जलतर्पणं का
र्यं न वा। ततो वस्त्रप्रांतं निष्पीड्यापः स्पृष्ट्वा वस्त्रं च संपरिधाय ततउत्तरीयं धृ
त्वा स्नानवस्त्रं निष्पीड्याचम्य संध्यामुपासीत। मध्याह्नस्नाने त्वयं विशेषः
।कार्यं माध्याह्निकं स्नानं संक्षिप्तं वापि विस्तृतं। संक्षिप्तस्य प्रयोगोत्र वक्ष्यते स्मृ
तिसंग्रहात्। तत्र कृतशौचोद्भिराचम्य विष्णुं शिवं सूर्यं वेष्टदेवतां नत्वा प्रक्षालि
ते तटे मृत्तिकां दर्भान् अक्षतांस्तिलांस्तंडुलान्पृथक्संस्थाप्य मृत्तिकां त्रेधा विभ

२२ ज्यभागेनैकेन नाभेरधः संलिप्य प्रक्षाल्य स्नात्वा द्विराचम्य भूर्भुवः स्वरिति त्रिः मृत्ति
कां प्रोक्ष्य हस्ताभ्यां तत्सवितुर्वरेण्यमिति सूर्यस्य दर्शयित्वा नाभेरधः स्योना
पृथिवी भवेति वा पृथिवी शांतेति वा लिप्यान्यं भागं सूर्यं दर्शितं नाभेरूर्ध्वं गंध
द्वारामिति त्रिरालिप्यापो अस्मान्मातर इदमापः प्रवहत सुमित्र्या न आप इति शि
रस्यभ्युक्ष्य दुर्मित्र्यास्तस्मै संत्विति बहिः प्रसिच्यापो अस्मान्द्वेष्टि यं च वयं द्वि
ष्मस्तं हन्मीति पश्चिमं प्रक्षाल्य अतीर्थे गंगादितीर्थं स्मृत्वा नत्वा हिरण्यशृंग
मिति वरुणं नत्वा हस्तं प्रक्षाल्य पुनः स्नात्वाचम्याब्दैवतैर्वारुणैः शुद्धः शुचिप
वित्रलिंगैर्मार्जयेत् तीर्थं चतुरस्रं कृत्वा इमं मे गंग इति जलं त्रिरालोड्य मग्नोऽघम २२
र्षणं कुर्यात्। तच्चाघमर्षणं। अंगुष्ठांगुलिभिः श्रोत्रहृदयदृग्नासिकामुखं पि
धाय निमग्नः त्रिःषड्वा द्वादश वावर्तयेदघमर्षणं। अघमर्षणं तु ऋतं च स

त्यं चेति सूक्तं। द्रुपदां वा जपेद्वा। ॐकारं वा जपेद्विष्णुं शिवं सूर्यं स्मरेत्तु वा। ततस्त्रिः पंच सप्त दश
द्वादश वारं वा डुत्वा द्विराचम्य जलमध्य एवार्द्रवाससा जलतर्पणं कुर्यात्। ततो जला
दुत्तीर्य स्नानवस्त्रप्रांतं तटे निष्पीडयेत्। ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः।
ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकं। ततः स्नानार्द्रवस्त्रः शुक्लमहतं कार्पासं क्षौमं
वा श्वेतं धातुरक्तं वा वस्त्रद्वयं परिधाय जंघे पादौ प्रक्षाल्य द्विराचम्य गंगादिमृत्ति
कयोर्ध्वपुंड्रं कुर्यात्। अथ नित्यब्रह्मयज्ञतर्पणादि कुर्यात्। अथ तर्पणविधिः।
अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु। सव्योत्तराभ्यां पाणिभ्यामथवा तर्प
णं भवेत्। श्राद्धे पिंडे विवाहे च दाने चैके न दीयते। तर्पणे तूत्तयेनैव जलं देयं तु
नान्यथा। वामहस्तेन तिलान् क्षिप्त्वा जलमध्ये तु तर्पयेत्। स्थले शाप्यांतरे पात्रे रो
मकूपेन कुत्रचित्। असंस्कृतप्रमीतानां जले दद्याज्जलांजलिं। शुक्लैस्तिलै

देवानुपवीती देवेन तीर्थेन प्राङ्मुखस्तर्पयेत्॥ शबलैस्तिलैः ऋषीन्निवीती कायेन
२३ तीर्थेन उदङ्मुखस्तर्पयेत्॥ आचार्यान्पितॄन् प्राचीनावीती पित्र्येण तीर्थेन कृष्णै
स्तिलैर्दक्षिणामुखस्तर्पयेत्॥ यद्वाभुक्षोदकैर्देवानृषींश्च पितॄंस्तिलैः सर्वान्वा
सर्वैस्तर्पयेत्॥ यद्वाक्षतैस्तंडुलैर्देवानृषीन् तिलैः पितॄन् देवानामेकैकमंजलिं
दद्यात्॥ ऋषीणां द्वौ द्वौ पितॄणां त्रींस्त्रीन्वा दद्यात्॥ स्वाचारप्राप्तैर्मंत्रैः॥ य
द्वा ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि॥ भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि
स्वर्देवांस्तर्पयामि भूर्भुवःस्वर्देवांस्तर्पयामि कृष्णद्वैपायनादयो ये ऋषयस्ता
नृषींस्तर्पयामि॥ भूर्ऋषींस्तर्पयामि॥ भुवर्ऋषींस्तर्पयामि॥ स्वर्ऋषींस्तर्पयामि॥
भूर्भुवःस्वर्ऋषींस्तर्पयामि॥ ततः कव्यवाहनादयो ये पितरस्तान्पितॄंस्त॰ २३
भूः पितॄंस्त॰ भुवः पितॄंस्त॰ स्वः पितॄंस्त॰ भूर्भुवःस्वः पितॄंस्त॰ तत आत्म

पित्रादीन्प्रतिपुरुषं तर्पयेत्॥ पित्रादीन्मात्रादीन्मातामहादीन्मातामह्यादीन्पि
तृव्यादीन् तत्पत्नीः ज्येष्ठभ्रातॄंस्तत्पत्नीः मातुलांस्तत्पत्नीः गुर्वाचार्योपाध्याया
न्सुहृत्संबंधिबांधवान् इष्टान्दातॄन्पोषकरिक्थिनश्च तत्पत्नीश्च तर्पयेत्॥ तिला
भावे स्वर्णरौप्यताम्रयुतोदकैः खड्गमौक्तिकहस्तेन वा कार्यं पितृतर्पणं॥ न केवल
जले नैव कर्त्तव्यं सति संभवे॥ न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं॥ सप्त
म्यां रविवारे च जन्मर्क्षदिवसेषु च॥ गृहे निषिद्धं सतिलं तर्पणं तद्बहिर्भवेत्॥ शो
भनगृहे शोभनदिने न तिलतर्पणं॥ विवाहे चोपनयने चौले सति यथाक्रमं॥ व
र्षमर्धं तदर्धं च नेत्येके तिलतर्पणं॥ वृद्धौसत्यां न तन्मासे नेत्येके तिलतर्पणं॥ ति
थितीर्थविशेषेषु कार्यं प्रेते च सर्वदा॥ पिंडान्नसपिंडानो दद्युः प्रेतपिंडं विनात्रतु॥
पितृयज्ञे नवयज्ञे च गयायां दर्शुरेवते॥ गयासाम्यं स्मृता हस्ये केचिदाहुः पुराण

मा:॥ वसुरुद्रादिस्वरूपान्श्राद्धार्थं तर्पयेत्पितॄन्। नामगोत्रे समुच्चार्य तिलैस्तीर्थेषु संयतः।
२४ दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं। कृष्णांगारचतुर्दश्यामपि कार्यं सदैव वा। यमा
य धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औ
दुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः इति। चतुर्द
शैते मंत्रास्तु प्रत्येकं च नमोन्विताः। एकैकेन तिलैर्मिश्रान्दद्यात्त्रीनुदकांजलीन्। य
ज्ञोपवीतिना कार्यं प्राचीनावीतिना तथा। देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता। ततः स्ना
नवस्त्रं निष्पीडयेत्। न त्रिगुणीकृतं न जले निष्पीडयेत्। न दक्षिणाग्रं प्रसारयेत्। स्नात्वा
र्द्रवस्त्रो विण्मूत्रं कृत्वा पुनः स्नायात्। नोत्तरीयमधः कुर्यान्नोपर्यधःस्थमंबरं। न
सर्वतस्तत्कृत्स्नं वा परिदध्यात्कदाचन। कुतपं शाणमाजिनं यागपट्टोत्तरीयकं। यज्ञो २४
पवीतमन्यद्वा द्वितीयं तु भवेदिह। स्नात्वा न पीडयेत्केशान्नांगेभ्यस्तोयमुद्धरेत्।

नवस्त्रं निर्धुनेच्छ्मश्रुकेशान वप्रनयेत्। स्नातो नांगं निमृज्यात्स्नानवस्त्रेण सर्वथा।
नान्योन्यं स्पृष्टतो मृज्यान्नालिंपेत्स्पृष्टतो मिथः। स्नात्वा न धावयेद्दंतान्न मृज्याद्वास
सा मुखं। न रात्रौ मृत्तिकास्नानं नैव भौमार्कवारयोः। संध्ययोर्नैव गोमूत्रं न शुद्ध्यै होम
यं निशि। दिवांबु गोशकृन्मूत्रैः शुद्धिर्निश्यांबुभस्मना। पंचपिंडास्त्रिकुंभान्वा पुहरे
सरवारिषु। स्नायद्दशास्तूपहते स्नानार्थं न महानिशि। महानिशा द्वे घटिके रात्रौ म
ध्यमयामयोः। न महानिशि नित्यार्थं काम्यं नैमित्तिकं भवेत्। न स्नायात्पूर्वमस्नातो नि
श्युष्णेन जलेन वा। अस्पृश्यस्पर्शने स्नानं निश्युष्णेन जलेन वा। नांबु हन्यान्न निंदेच्च
तीर्थे तीर्थी तु रं स्मरेत्। न स्नायाद्दुस्सवे तीरे मांगल्यं विनिवर्त्य च। अनुव्रज्य सुहृद्बंधू
न् स्नायित्वेष्टदेवताः॥ मृते जन्मर्क्षदिवसे प्रतिपन्नवमीषु वा। श्राद्धकर्मणि वान्यदिने।
संक्रांतिग्रहणेषु वा। पातेर्कवारे सप्तम्यां चतुर्दश्यष्टमीषु च। अेकादश्यां पौर्णमास्यां

स्मृ·स·सा· षष्ठ्यां दर्शे विशेषतः॥ तैलाभ्यंगं स्त्रियं मांसं दंतकाष्ठं च वर्जयेत्। उष्णोदकेन न स्नाया
दन्यदा वाप्यकारणात्। क्रियास्नानं च काम्यं च पारक्यां क्वेन वर्जयेत्। नद्यां नास्ति
२५ मिते स्नाया विशेषान्मध्ययामयोः। अग्निं प्रज्वाल्य वा स्नायात्क्षाप्यादिषु महाजलो।
राहुदर्शन संक्रांति विवाहोत्सव वृद्धिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च।
नद्यां स्नात्वा नदीं चान्यां न प्रशंसेद्धर्मवित्। अस्पृश्यस्पर्शने स्नाने नाघमर्षणत
र्पणे। उभावप्यशुची स्नातौ दंपती मैथुने गतौ। शयनादुत्थिता नारी शुचिः स्यादशुचिः
पुमान्। ऋतौ तु मैथुने स्नाया गर्भधारणशंकया। अनृतौ तदभावाद्वेशो वंमूत्रपुरी
षवत्। रोगेणा यद्रजः स्त्रीणां न तदाशुचयः स्मृताः॥ बेडालादिस्पर्शनादो विस्तारो
वक्ष्यते पृथक्। शवानुगमने स्नानं प्रतभाशो विकल्पितः॥ यत्र पुंसः सचैलं स्या २५
त्स्नानं तत्र सुवासिनी। कुर्वीत वशिरःस्नानं शिरोरोगी जटां तथा। अशक्तो शोभ

नगृहे शोभनादौ न सर्वथा। न शीतल जलस्नानं कार्यं वैवो छवारिणा। उद्धृतजल स्नाने मा
र्जनं कार्यं। अघमर्षणजपोस्ति वा न वा। जलतर्पणं न कार्यं न वा। स्थलतर्पणं तु पात्रस्थे
जले क्षलादीन्दक्षिणापात्रांतरे कार्यं सोदके गर्ते वा सबर्हिषि वा स्थले वा। नाबर्हिर्विना
शौचे स्थले कार्यं   अथ तैलाभ्यंगविधिः   तैलाभ्यंगे निषेधाः स्युः सर्वाश्चैतिथ
यः सदा। द्वितीयां वर्जयित्वैव दृष्टादृष्ट द्विदोषतः॥ सार्षपं गंधतैलं च यत्तैलं पुष्पवा
सितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन। तैलाभ्यंगनिषेधेषु तिलतैलं निषिध
ध्यते। अभ्यंगस्य निषेधस्तु सार्षपादेरपीष्यते। स्नेहेनाभ्यंगो भवति स स्नेहः स
र्षपादिकः॥ न भोजनादौ तैलस्य निषेधोभ्यंग एव सः। तैलशब्दस्तिलस्नेहे सुरूढो
नैव योगिकः॥ अतस्तिलविकारोपि पिण्याक तिलमोदके। मस्कुलीकृसरादौ
च निषेधो नैव जायते। सार्षपादौ लशब्दस्तन्कार्यसदृशस्ततः॥ संतापः कांतिर

२६ त्स्यायुर्धननिर्धनताभवेत्।अनारोग्यंसर्वकामावारेष्वभ्यंगकारिणः।असौभाग्यंच
नैर्धन्यंवारयोर्गुरुशुक्रयोः।निषिद्धदिवसेवारेरात्रौचव्याधितस्यच।दूर्वांतरयुतंतै
लंनदुष्यतिकदाचन।शिरस्थेनतुतैलेननांगंकिंचिदुपस्पृशेत्।सर्वदासर्वकामार्थं
स्नायादेवकथंचन।विनामृत्तिकयावापिसक्तुद्रोणेनवारिणा। इत्यभ्यंगस्नान
विधिः अथसंध्याविधिरुच्यते। संध्याहीनोशुचिर्नित्यमनर्हःसर्वकर्मसु।
यत्किंचित्क्रियतेकर्मनतस्यफलमश्नुते।तत्रपादौहस्तौप्रक्षाल्यद्विराचम्यदर्भपा
णिरापोहिष्ठाद्यैरष्टैवलैर्मंत्रैर्दर्भैःशिरसिमार्जनंकृत्वात्मानंपरिषिच्यसूर्यश्चेत्य
पःपीत्वाद्विराचमेत्।सायंकालेत्वग्निश्चेत्यपःपीत्वाद्विराचम्यपुनश्चाष्टैवलैर्मा
र्जनंकृत्वात्मानंपरिषिच्यगायत्र्याभिमंत्रितमपांजलिनासूर्यायत्रिरुत्क्षिपे २६
त्।अशुद्धदेशोध्यारांबुमार्जनंपरिवर्जयेत्।पात्रस्थेनांबुनाकुर्यात्क्षामहस्तोस्थि

तेनवा।ततःप्राणायामत्रयंकृत्वासूर्यदर्शनात्तिष्ठन्।प्राङ्मुखोगायत्रींजपेत्।आ
नक्षत्रदर्शनादासीनःसायंप्रत्यङ्मुखोजपेत्।ब्रह्मचारीग्रहस्थश्चशतमष्टोत्त
रंजपेत्।वानप्रस्थोयतिश्चैवसहस्रादधिकंजपेत्।यद्वापरंजपेद्देवीमष्टाविं
शतिरेववा।सदर्भपाणिराहोमाद्दर्भस्थसूक्तसंख्यया।हस्तेनावर्तयेद्देवीमक्षसू
त्रैस्तथापिवा।सौवर्णैराजतैस्ताम्रैःस्फाटिकैरत्नजैस्तथा।अरिष्टैःपुत्रजीवोत्थै
रिंद्राक्षैशंखसंभवैः।रुद्राक्षैरपिपद्माक्षैःकुशग्रंथिभिरेववा।मणिभिस्त्वक्षसू
त्रंस्यात्तदष्टशतसंख्यया।चतुःपंचाशतावापिसप्तविंशतिरेववा।उच्चैर्जपादुपांशुः
स्याच्छ्रेयोवैमानसस्ततः।सउपांशुजपोशब्दश्चलज्जिह्वारदच्छदः।मानसस्त्वच
लज्जिह्वदशनच्छदईरितः।नाभ्योरत्निर्नान्यमनानचव्यत्यस्तापदकरः।जपेन्न
प्रौढपादश्चनावष्टब्धोऽलसोशुचिः।नचक्रामन्नजल्पंश्चनपार्श्वमवलोकयन्।

२७ नासंख्यातमदर्भश्चनाशिखाकछबंधनः।मनःसंहरणंशौचंमौनंमंत्रार्थचिंतनं।अव्य
ग्रत्वमनिर्वेदोजपसंपत्तिहेतवः।जपांतेप्रातःसौरैर्मंत्रैःसूर्यमुपतिष्ठेत्।सायंवारु
णैर्यद्वोभयत्रापिजातवेदसेनवेघ्नवैरोद्वैर्वोपतिष्ठेत्।दिग्भ्योदेवताभ्योवानमस्कृ
त्यातिष्ठेत्।संध्यायैसावित्र्यैगायत्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्योनमस्कुर्यात्।इ
त्यादियथास्वाचारंकुर्यात्।पुनःसूर्यंनमस्कृत्यनामगोत्रेणवाग्यतः।गुप्तमग्न्यंबुने
त्वातुहोमंकुर्याद्यथाविधि। अथहोमविधिः होमेमुख्योयजमानःपत्नीपु
त्रश्चकन्यका।ऋत्विक्शिष्योगुरुर्भ्राताभागिनेयःसुतापतिः।एतैरेवहुतंयत्तुत
द्धुतंस्वयमेवहि।पर्यूहनपत्नीवर्जंपत्नीजुहुयात्।कुमारीच।असमर्क्षेतुदंपत्यो
र्हैतव्यंनार्त्विगादिना।द्वयोरप्यसमक्षंवेद्धवेहुतमनर्थकं।संनिधौयजमान २७
स्योद्देशत्यागकारकः।असन्निधानेपत्नीस्यादध्वर्युस्तदनुज्ञया।उन्मा

देप्रसवेचार्तौप्रकुर्वउताज्ञयाविना।नाप्रवासीप्रवासेस्यात्पत्नीधारयतेव्रतं।सर्वदाय
जमानोवायजेतदिङ्मुखःशुचिः।प्रातर्होमेसंगवांतःकालस्त्वनुदितेतथा।सा
यमस्तमितेहोमकालस्तुनवनाडिकाः।बहुशुष्केंधनेवाग्नौसुसमिद्धेविधूमके।
संगारेलेलिहानेचहोतव्यंनान्यथाक्वचित्।अग्निःप्रदक्षिणावर्त्तःकर्मदश्चश
भावहः।अग्निंपरिसमूह्यपरिस्तीर्यपर्युक्ष्याक्षतगंधपुष्पैरलंकृत्यसमिधाग्नि
प्रदीप्तोसमिधंद्व्यंगुलमतिक्रम्यदेवायतनेसंपूर्णहोमंदेवतीर्थेनकारयेत्।सौम्ये
नवाहुत्वापुनःसमिधंक्षिप्त्वापरिस्तीर्यपरिसमूह्यपर्युक्ष्यहुतशेषंब्राह्मणायद
त्वानमेत्।पयोदधियवागूश्चसर्पिरोदनतंडुलाः।सोमोमांसंतैलमापोदशैता
न्यग्निहोत्रके।स्यादग्निहोत्रवद्धोमेसंस्कारोमंत्रवर्जितः।यद्वाग्निःप्रोक्षणंतेषां
मांसपौपासनेनहि।शालिश्यामाकनीवाराव्रीहिगोधूमयावकाः।एतेषांतंडु

लाहोम्याश्यावनालाः प्रियंगवः। नीवाराः शालयश्चैव गोधूमव्रीहयो यवाः। स्वरूपेण। पिहोम्याः स्युः
स्वरूपेणैव वै तिलाः। इध्वं स्रुवेण होतव्यं पाणिना कठिनं हविः। व्रीहीणां वा यवानां वा शतं
माकृतिरिष्यते। तदन्नं द्विगुणं ग्रासो सोमयूरांडाकृतिस्तथा। कुक्कुटांडकमानं तु पिंडइ
त्यभिधीयते। अंगुष्ठपर्वमात्रं स्यादवदानं ततोपि न। ज्यायः स्विष्टकृदाज्यं च कृतमं
गुष्ठसंमितं। ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं। अग्रं चतुर्गुणीकृत्य हंतकारः
स उच्यते। भिक्षा पुष्कलमर्थं वा पूर्वं पूर्वाच्चतुर्गुणं। नृभोजनं तद्द्विगुणं शरावः पात्र
मेव च। यद्वा प्रस्थं वान्यं च तुः षष्ठे रोकृतेः प्रकीर्तितं।। तिलानां च तदर्धं स्यात् घृत
स्य च। पालाशखादिराश्वत्थशम्युदुंबरजा समित्। अपामार्गार्कदूर्वात्तदर्धस्या× २८
र्वाश्च कुशाश्चेत्यपरे विदुः। सत्वचः समिधः कार्या ऋज्व्यः श्लक्ष्णाः समास्तथा।
शस्ता दशांगुलास्तास्ता द्वादशांगुलकास्तु वा। आर्द्राः पक्काः समच्छेदा[illegible]

स्तर्जन्यंगुलवर्तुला। अपाटिता अद्विशाखाः कृमिदोषविवर्जिताः। दग्धाः कृशास्तथा
स्थूला दस्तादीर्घाश्च वर्जयेत्। यद्वा। समस्तं विज्ञं वेदाश्च त्रयः प्रादेशसंमिताः। इध्म
स्तद्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः। स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः
स्मृतः। इति होमविधिः। अथ दर्भविधिः। कुशाः काशा यवा दूर्वा उशीरा
श्च कुंसेदराः। गोधूमा व्रीहयो मुंजा दश दर्भाः सबल्वजाः। नभोमासस्य दर्शे तु शु
चिर्दर्भान्समाहरेत्। अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः। विरिंचिना
सहोत्पन्न परमेष्ठि निसर्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव। कुशोत्पा
टनमंत्रः। एनं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः। हुंफट्कारेण मंत्रेण सकृच्छि
त्वा पुनर्हरेत्। अच्छिन्नाग्रा अशुष्काग्राः पित्र्ये तु हरिताः शुभाः। समूलाः देव
कार्येषु नियोज्याः स्युर्जपादिषु। सप्तपत्राः कुशाः शस्ता दैवे पित्र्ये च कर्मणि।

अनंतस्तरुणो साग्रो प्रादेशो तु पवित्रके। चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं। ए
केकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवा। त्रिभिस्तु
शांतिके कार्यं पौष्टिके पंचभिस्तथा। चतुर्भिश्चाभिचारे स्यान्निष्ठकेरितिके च न। सप
वित्रः सदर्भो वा कर्मांगाचमनं चरेत्। नोच्छिष्टं तत्सदर्भैस्तु भुक्तौ छिष्टं तु वर्जयेत्।
ये: कृत: पिंडनिर्वाप: श्राद्धं वा पितृतर्पणं। विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधी
यते। नीवीमध्ये स्थितास्त्याज्या यज्ञभूमौ स्थितास्तथा। वामहस्तस्थिते दर्भेन पि
बेद्दक्षिणे न तु। वस्त्रादिनोपग्रहणे न दोषे: पिबतो भवेत्। न ब्रह्मग्रंथिना वामे न दूर्वा
भि: कदाचन। स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे। सपवित्रो सदर्भो वा करौ
कुर्वीत नान्यथा। कुशाभावे तु काशा स्यु: काशा: कुशसमा: स्मृता:। काशाभावे
गृहीतव्या अन्ये दर्भा यथोचितं। आर्द्रं तु लुनीयाद्वा त्रो तु लुनीया द्वापि संध्ययो:।

तदभावे स्वर्णरौप्यताम्रैरत्नै: क्रियाश्चरेत्॥ इति दर्भविधि: बर्हि: कुशमयं
ग्राह्यं न लभ्यंते कुशा यदि। शरसैर्याम्रते याश्च वाल्वमौंजार्जुनेक्षव:। सुगंधितेज
नादारा दूर्वा: क्षीरद्रुमा अपि। यज्ञास सर्वे तृणेभ्योपि ग्राह्यं बर्हिर्यथेप्सितं। शुष्कं का
ष्ठं कृमिमूलं दुर्गंधि तृणवर्जितं। सूकग्लानेरकांश्चापि वर्जयेत्सपरे बुधा:। कु
शाभावे परे प्राहु: पर्वपल्लवदोषधी:। बंधूकसूकरेष्वष्टपारिव्याधिकवर्त्तिता:। मु
ख्यान्दर्भान्विशेषेण केचित्काशान्कुशान्शरान्। बल्बजान्मुंडरीकाणि यवव्रीहि
तृणान्यपि इति बर्हिर्विधि: पालाश: खादिरो वेध्मो मुख्य: स्यात्तदलाभ
त:। शमीवटोदुंबरज: साश्वत्थस्तदलाभत:। वनस्पतीनां सर्वेषामिध्म: कार्यो
विशेषत:। तत्रैतान्वर्जयेद्वृक्षान्कोविदारविभीतकौ। कपित्थामलकं राजवृ
क्षं काशद्रुमं तथा। नीपनिंबं करंजं च तिलकं शाल्मलीमपि। श्लेष्मातकमपि स

३० त्काग्राह्योन्यःसकक्षोद्रुमः अथस्रुवादि वैकंकतीवापालाशीवाग्निहोत्रह
वण्यथा।जुहूःपालाश्युपभृदाश्वत्थीवैकंकतीध्रुवा।यद्वासर्वस्रुवःकार्याएतेषा
मन्यवृक्षतः।शमीमप्यःस्रुवःकार्याःसर्वावायज्ञवृक्षजाः।तदलाभेयथालाभम
न्ययाज्ञिकवृक्षजाः।खादिरस्यस्रुवःस्यात्तुशम्याप्राशित्रमेक्षणे।खादिरोमुस
लःकार्य्यःपालशःस्यादुदूखलः।यद्वोभौवारुणौकार्यौतदलाभेन्यवृक्षजौ।पा
लाशाश्वावटाद्यान्यवृक्षादार्वेमसाःस्मृताः।अश्वत्थंवारुणंवोवेदिडामात्रमि
ह्यान्यजं।मुख्याभावेतुसदृशंद्रव्यंप्रतिनिधीयते।यावद्यावत्तुसदृशंतत्तदेवहि
गृह्यते।काम्येप्रतिनिधिर्नास्तिनित्येनैमित्तिकेहिसः।काम्येप्युपक्रमादूर्ध्व
मन्येप्रतिनिधिंविदुः।नस्यात्प्रतिनिधिर्मंत्रःस्वामिदेवाग्निकर्मसु।सदेश[illegible]का ३० श्री
लयोर्नास्तिनारण्याअग्निरेवसः।समारूढंवसमिध्मरणिंब्रुवंतिबुधाः।।

०नाभावस्यप्रतिनिधिरभावांतरमिष्यते।नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित्।
श्रोत्रियाणामभोज्यंयद्द्रव्यंहितद्विशेषतः।ग्राह्यंप्रतिनिधित्वेनहोमेकार्येनकु
त्रचित्।द्रव्यंवैकल्पिकंकिंचिद्यत्रसंकल्पितंभवेत्।तदभावेतुसदृशंनतुवैके
ल्पितंतथा।मुख्यद्रव्योपचारेतुप्रतिनिध्युभिसंधिनांप्रयुंजानस्यमुख्यार्थलाभे
ग्राह्यःसएवहि।उपात्तेतुप्रतिनिधौमुख्यार्थेलभ्यतेयदि।तत्रमुख्यमनादृत्यगौणे
नैवसमापयेत्।उपात्तेयस्मिन्कस्मिन्वामुख्येप्रशरितेसति।अन्यद्द्रव्यंसजातीय
मजातीयमथापिवा।उपादायप्रयुंजानोयदिपूर्वमवाप्नुयात्।उपात्तत्वाविशेषेपि
पूर्वंहित्वापरंश्रयेत्।मुख्याभावेपरंगौणमुपात्तंसद्धिनश्यति।तत्रमुख्योपमंगौणं
ग्राह्यंगौणोपमंनतु।संस्काराणामयोग्योपिमुख्यएवहिगृह्यते।नतुसंस्कारयो
ग्योपिन्योगृह्यतेप्रतिरूपकः।मुख्येकार्यासमर्थेतुलब्धेप्येतस्यनादरः।प्रति

स्मृ.स.सा.
३२

रूपमुपादायशालंतेनप्रयुज्यते।द्रव्यत्वमात्रपर्याप्तंमुख्यद्रव्यस्यसंभवे।पुरोडाशमहत्वा
र्थंननीवारपरिग्रहः।कृष्णव्रीह्यादिकेद्रव्येशिष्टेप्रचरितेसति।ग्राह्योक्तस्तोपिसंव्री
हिर्नव्रीहिःकृष्णगुण्यपि।कार्यैर्नूपैस्तथावर्णैःक्षीरैःपुष्पैःफलैरपि।गंधैरसैःस
दृग्ग्राह्यंपूर्वाभावेपरंपरं।व्रीहिर्यवोवाश्यामाकोनीवारोवाहविर्भवेत्।वेणोर्यवा
स्तद्रसैर्वाकंदमूलंफलंजलं।सत्यंवाहविरेतेषुयथासंभवमाचरेत्।प्रतिनिध्येत
तत्सत्यंविज्ञेयंहविरित्यपि।प्रधानदेवतोद्देशात्संत्यजेत्सत्यमात्मनः।ततोन्यदपिवा
ग्राह्यंसदृशंधान्यमात्रकं।नग्राह्यंसर्वथामाषवरकोदारकोद्रवं।यदाव्रीहियवा
भावेतुषतंडुलयोगिनीः।ओषधीःप्रतिगृह्णीयादणुकोद्रववर्जिताः।ग्राम्या ३२
णांवाभवेद्ग्राम्यमारण्यामनरण्यजं।यवाभावेतुगोधूमास्ततोवेणुयवादयः।
छंदोगगृह्यवचनाज्जुहुयाद्धविरित्यथ।फलंयज्ञियवृक्षस्यतत्सत्रमथवा

जलं।यद्यग्निहोत्रहोमार्थंपयोनस्यात्कादचन।यदाव्रीहियवोग्राम्यमोषध्यंतरमेव
वा।आरण्योषध्ययोवृक्षफलान्यापद्यतिक्रमात्।होमंकर्तुमुपादेयंपूर्वाभावेपरंपरं।तेषा
मभावेजुहुयाच्छ्रद्धयासत्यमात्मनः।द्रव्यार्थंगोघृतंग्राह्यंतदभावेन्वमाहिषं।आजंवात
दभावेतुसाक्षात्तैलंतुगृह्यते।तैलाभावेगृहीतव्यंतैलंयत्तिलसंभवं।तदभावेऽतसी
स्नेहःकौसुंभःसर्षपोद्भवः।वृक्षस्नेहोथवाग्राह्यःपूर्वाभावेपरःपरः।तदभावेव्रीहियवश्या
माकान्यतरुद्भवं।पिष्टमालोड्यतोयेनप्रतार्थंयोजयेत्सुधीः।वृक्षतैलेषुपुन्नागनिंबै
रंडोत्सजंभवेत्।यदागव्यघृतेछागमहिष्यादेर्घृतंक्रमात्।तदभावेगवादीनांक्रमा
क्षी×द्धवं×रंविधीयते।तदभावेदधिग्राह्यमलाभेतैलमिष्यते।तत्राज्यमंजनाद्यर्थंन
लभ्येतकथंचन।तत्राक्षीराधनादस्यसाक्षात्तैलंगृहीष्यते।तत्रमुख्यंदधिक्षीरंतत्रा
पितदलाभतः।अजादेःक्षीरदध्यादितदलाभेतुगोघृतं।मुख्यासन्नोथवाग्राह्यःकार्ये

३२ कारणसंततौ।अतएवप्यताभावेपूर्वेद्युधिततःपयः।येषांकेषांचिदन्येषांहविषामप्यसंभ
वे।सर्वत्राऽप्यनुपादेयंभरद्वाजमुनेर्मतात्।मुख्यकालेयदावश्यंकर्मकर्तुंनशक्यते।गौ
णकालेपिकर्तव्यंगौणोप्यत्रेदृशोभवेत्।सायमाहुतिराप्रातरासायंप्रातराहुतिः।
कर्तव्यानातिपद्येतपार्वणंपार्वणांतरं।श्यामाकैर्व्रीहिभिश्चापियवैरन्योन्यकालतः
।प्राप्यष्टुंयुज्यतेवश्यंनत्वात्राग्रयणीत्सपः।एवमागामिकार्यस्यमुख्यकालादधस्तनः।।
स्वकालादुत्तरोगौणःकालःस्यात्कर्मणः।।सर्वत्रगौणकालेषुकर्मचोदितमाचरेत्।प्रायश्चि
त्तंव्याहृतिभिर्हुत्वाकर्मस×पूर्व×मारभेत्।मुख्यकालेहिमुख्यंचेत्साधनंनैवलभ्यते।
मुख्यकालउपश्रेयोगौणोप्यन्यस्तुसाधनं।नमुख्यद्रव्यलोभेनगौणकालप्रतीक्ष
णं।एकपक्षगतोयावद्धोमःसद्योनिगद्यते।पक्षहोमविधानात्तान्हुत्वातंतुमतीजये ३२
त्।स्वकालोत्कर्षतःकैश्चिन्मुख्यकालोनिरूपितः।अपकर्षादथान्योपिगौणःका

लोनिरूप्यते।अथवाव्याधिमानापद्गतोवाप्यगतोपिवा।राष्ट्रभंगेथवाभावेगुरुगेहेवसन्न
पि।अन्येष्वेवंप्रकारेषुनिमित्तेष्वगतेषुवा।समासमग्निहोत्राणांयथासंभवमाचरेत्।
निमित्तानामिहैतेषांनिर्दिश्यैकंयदुच्यते।तत्सर्वेषुनिमित्तेषुजानीयात्प्रतिपादितं।प
क्षहोमान्नशेषान्वाशेषहोमानथापिवा।समस्यजुहुयात्तत्रप्रयोगोयंनिरूप्यतेप्र
तिपद्यन्नयेत्सायमापद्यन्यत्रवादिने।यावंत्योपवसथ्याहात्प्राग्दिनानिभवंतिहि।
यावतीप्रतिगृह्णीयाश्चतुरुन्नयनानितु।पात्रांतरसहापायोनिक्षायांप्रकृतौस्त्रुवं
स्थूलंस्त्रुगंतरंवापिकृत्वातत्रसमुन्नयेत्।एकासमित्सकृद्धोमःसकृदेवनिमार्ज
नं।उपस्थानंसकृत्कार्यंशेषाप्रकृतिरिष्यते।एवमेवोत्तरत्रापिप्रातर्होमान्समम
स्यतु।जुहोत्सोपवसथ्याहात्प्रातर्होमावधीन्सकृत्।समारोपविधानेनसमारोप

३३ यतेनक्वाप्नु।एवंप्रतिपदोन्यत्रयत्रापदुपजायते।तथैवोपवसथ्याहास्त्राग्यत्रापन्नपश्य
ति।आपदीर्वाविधीहींमेसमासस्याप्युपेयते।तस्मात्केदाचिदारभ्ययावंतस्तावतोपि
वा।आपत्काव्कासमान्होमान्समस्येदेकपक्षगान्नु।एवमेवात्रपक्षेयेहोमास्तेषाम
शेषतः।न्यूनानांवासमासःस्यान्नपक्षांतरवर्त्तिनां।सर्वथोपवसथ्याहेसायंहोमः
पृथग्भवेत्।तथैवयजनीयाहेप्रातर्होमोभवेत्पृथक्।पूर्वोपवासन्यूनंचेत्प्राप्तंके
नापिहेतुना।तदातुसायंहोमोपिपूर्वैःसहसमस्यते।तावतानापगच्छेच्चेदापत्पक्षां
तरेपिच।ततस्तत्रापिकर्तव्यःसमासःपृथगेवहि।नतुपक्षांतरस्थानांसमासश्चोद
यतेमिथः।एवमापद्गतःपक्षेपक्षेचैवसमाचरेत्।ततोयेऽनंतरेपक्षेसमासंनस
माचरेत्।आपच्चेदनुवर्त्तेतदीर्घकालकथंचन।यावज्जीवमविच्छिन्नंपक्षहोमं ३३
समाचरेत्।आपदेवावधिस्तत्रनपक्षगमनावधिः।अथापरःसमासस्यप्रकारः

प्रतिपाद्यते।सायंप्रातस्ततोहोमावुभौसाम्यंसमस्यतु।आपन्नोजुहुयादत्रसमिद्दे
काथवाद्वयं।सायंहोमस्यमुख्यत्वात्तदीयंतत्रमिष्यते।चतस्त्रआहुतीःकुर्यात्तत्रद्वे
सायमाहुती।द्वेप्रातराहुतीसायंहोमेचैकासमिद्यदि।समित्कृताद्वितीयाचेत्साभवेत्सा
प्रातराहुती।द्विसायंहोमवन्मन्त्र्याद्विःप्रातर्होमवत्स्मृतं।उपस्थानंसकृत्कार्यंशेषं
प्रकृतिवद्भवेत्।केचिद्द्वेआहुतीहुत्वासंवेश्यैवनिमील्यवा।विच्छेद्येतावताहोमोकुर्याद्द्वे
आहुतीततः।गुर्वापदिसमस्यांतेप्रातःसर्वेकदाचन।दीर्घकालापदंमत्वापक्षहोमेष्व
तेसति।तत्रांतरालेयोव्यापत्कदाचिदपगच्छति।कालेकालेथवाहोमःकर्त्तव्योविधि
नाथवा।यावंतोत्रसमासास्तेसर्वेसायमुपक्रमाः।प्रातःकालापवर्गाश्चनतुप्रातरु
पक्रमाः।प्रातर्होमादिकायदाप्रातश्चेदापदागता।तथापूर्वापराह्नादौनिमित्तेचस
मस्यति।पूर्वपक्षेतुरात्रौचेन्मतिशंकाग्निहोत्रिणः।हुत्वावशिष्टाःपक्षेस्मिन्जुहु

३४ यात्सकव्याहुतीः। दर्शेष्टिंचतदाकुर्यादिष्टिर्यदिनसंभवेत्। देवतानांप्रधानानामेकैकस्यै
पृथक्पृथक्। पुरोनुवाक्यायाज्यान्यां चतुरातात्घृताहुतीः। जुहुयादेवमन्यत्रसद्यः
दितुहूयते। अथेष्ट्ययनमध्येस्यात्सुर्मरणशंकनं। अवशिष्टेष्टदेवेभ्यस्तत्संख्या
निष्पत्तीनिव। चतुर्गृहीतान्येकत्रगृहीत्वावमसेः सह। पुरोनुवाक्यायाज्याभिः पूर्वव
ज्जुहुयात्तथा। चातुर्मास्यांतराके चेत्स्वामिनोम्‍त्युशंकनं। तत्रांत्यपूर्वपर्यंतमा॰
ग्निहोत्राण्यशेषतः। तथैवकुरुतेदर्शापूर्णमासान्बहूनपि। चातुर्मास्यावशिष्टा
निपर्वाण्यत्रसमापयेत्। पश्वलाभेपुरोडाशंनिर्वपेत्पशुदेवतं। आमिक्षामथ
वाकुर्यात्पूर्णाहुतिमथापिवा। आहिताग्निः कदाचित्तुकृष्णपक्षेमृतोयदि। तदाशे ३४
षाहुतिः सर्वाजुहोती साश्वलायनः। अन्येतदैवदर्शेष्टिंकुर्युः कृष्णेमृतस्यतु।

शुक्लपक्षेनिशिप्रेतस्येच्छंतिप्रातराहुतीः। यत्राहितान्मेर्धर्मः स्यात्स औपासनिकस्यतु। इ
तिशाट्यायनिकमात्वष्टे ब्राह्मणमत्रतु। संध्यामिष्टिंचरुंहोमं यावज्जीवंसमाचरेत्। नत्य
जेत्सूतकेवापित्यजन्गच्छेदधोद्विजः। कुर्यात्संचमहायज्ञान्नित्यशःसूतकंविना। नित्यं
नैमित्तिकंवात्सुकर्मापिनहापयेत्। स्वकर्महानोपतनमब्देनैवत्वनापदि। स्वकर्महानौ
नास्तिक्यान्मासेनपतनंस्मृतं। द्वादशाब्दव्रतेनैवतस्यशुद्धिस्तु नान्यथा। तंनिरीक्ष्यार्कमी
क्षेतस्पर्शेस्नायात्सचैलकं। तेनसंभाषणंहास्यंकुर्वन्नब्देनतत्समः। तदन्नभुक्तोसद्य
स्तु सहशैय्यासनेष्वपि। इतिहोमविधिः अथदेवतार्चनविधिरुच्यते ब्रह्मा
णंविष्णुमीशानंसूर्यमग्निंगणाधिपं। दुर्गासरस्वतीलक्ष्मीगौरीर्वानित्यमर्चयेत्। अ
प्स्वग्नौहृदये सौर्यस्थंडिले प्रतिमासुच। शालिग्रामेवबकांके वटमुद्रासुदेवताः।
नित्यंसंतिहिरण्येचरत्नगोब्राह्मणेषुच। पौरुषेणैवसूक्तेनगायत्र्याप्रणवेनवा। त

लिंगैरेववा मंत्रैरर्चयेद्गुर्वनुज्ञया। देवतानामभिर्याश्च चतुर्थ्यंतैर्नमोन्वितैः। आवाहनास
नं पाद्यमर्घ्यमाचमनीयकं। स्नानमाचमनं वस्त्रं माचामं चोपवीतकं। आचामं गंध
पुष्पे च धूपं दीपं प्रकल्पयेत्। नैवेद्यं पुनराचामं नत्वास्तुत्वा विसर्जयेत्। स्त्रीशूद्राणां
च भवति नाम्नावै देवतार्चनं। सर्वे वागममार्गेण कुर्युर्वेदानुसारिणा। गुरूक्तेन प्रकारे
ण वेदबाह्येन नाचरेत्। यांकांचिद्देवतां कश्चिदाराधयितुमिच्छति। स सर्वोपाययत्नेन ब्रा
ह्मणानांश्च तोषयेत्। एवं देवार्चनं कृत्वा गुरुं संपूज्य भक्तितः। पुष्पं क्षिप्त्वा प्रणम्याथ
नित्यदानं स्वशक्तितः। कृत्वा अज्ञानमस्कृत्य कर्त्तव्यं मंगलेक्षणं। विप्राग्न्यर्कौ बु
गोहेमन्पाज्यं मंगलं स्मृतं। आग्निर्विल्कपिलासत्त्रीयज्वामृष्टान्नदो बुधः। ज्ञान
सिद्धः तपः सिद्धः शतायुर्धार्मिकः शुचिः। एते पापहराश्चैतान्सदा पश्यन्नमेदपि।
रोचनं चंदनं हेमम्मृगं दद्दर्पणं मणिं। घृतं वाग्निं गुरुं विप्रं प्रातः पश्येत्सदा बुधः। कृष्ण

ब्राह्मींच दूर्वांच नंदनं शंखपुष्पिकां। सिद्धार्थकान् प्रियंगूंश्च प्रातः शिरसि धारयेत्। पा
पिष्ठं दुर्भगं चांत्यं नग्नमुत्कृत्तनासिकं। प्रातर्न पश्येदेतांश्च दृष्ट्वा पश्येद्दिवाकरं॥ ॥
इति देवतार्चनं अथ माध्याह्निकं स्नानं कृत्वा नित्यं माध्याह्निकं कार्यं। तत्र
पादौ प्रक्षाल्य द्विराचम्य आपो हि ष्ठाद्यैर्मार्जनं कृत्वाद्भिः परिरक्ष्यापः पुनंतु पृथिवी
मिति दर्भपाणिः पीत्वा। द्विराचम्य पुनश्चापो हि ष्ठाद्यैर्मार्जनं कृत्वोद्भिः परिरक्ष्य गाय
त्र्या सकृत्सूर्यायार्घ्यं दत्वा प्रदक्षिणमावृत्यापः स्पृष्ट्वा हंसः शुचिषदिति सूर्यमुपस्था
य उदुत्यं चित्रमित्याद्यैश्चोपस्थाय नत्वा भूमिं स्पृष्ट्वा प्राणायामत्रयं कृत्वा गायत्रीं पू
र्ववज्जपेत्। पुनः सूर्यं नत्वा ब्रह्मयज्ञादिकं कुर्यात्। छ ब्रह्मयज्ञो देवयज्ञो भू
तयज्ञः स्ततः परः। पितृयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः। स्वाध्यायो ब्रह्मय
ज्ञः स्याद्देवयज्ञोग्निहोमकः। भूतयज्ञो बलिः प्रोक्तो ऊतशेषान्नतस्ततः। स्वधापि

तर्पयइत्यन्नादिदानतः।मनुष्ययज्ञोतिथ्यादेर्मनुष्येभ्योदेशादानतः।अथब्रह्मयज्ञंकुर्यात्।पादौ
प्रक्षाल्यद्विराचम्यप्रागग्रेषुदर्भेषुप्राङ्मुखआसीनोदर्भपाणिः।पवित्रगर्भब्रह्मांजलिः
प्रणवंव्याहृतीरुक्त्वासावित्रीपच्छोर्द्धर्चशऋक्शोनवर्चवोक्त्वाप्रणवमुक्त्वाऋतंचसूक्त
मनुवाकंयजुर्वासामवासावित्रीवेतिहासपुराणंवामंडलमध्येनवास्वरेणाधीत्य
नमोब्रह्मणइतित्रिरुक्त्वाउत्तरसंस्थांप्रारभ्यांतत्सदितिसमापयेत्।ग्रामेमनसाधी
त्यीततःस्वशाखोक्तविधिनादेवानृषीन्पितृंश्चतर्पयेत्।यद्वाब्रह्मादयोयेदेवाइत्या
द्यैर्यथास्वाचारंकुर्यात्।ततोवस्त्रंनिष्पीड्याौम्यअग्न्यांबुगृहीत्वागृहंगत्वावैश्वदेवं
कुर्यात्। अथदेवयज्ञः गृहस्थोवैश्वदेवाख्यंकर्मप्रारभतेदिवा।अन्यस्य
चात्मनश्चैवसंस्कारार्थमिहेष्यते।औपासनाग्निमन्यंवासमिध्याथहविर्भुजं ३६
।परिसमूह्यापर्युक्ष्याक्षतगंधपुष्पाण्यष्टदिक्षुवाग्नौनिक्षिप्त्वालंकृत्यहविष्यंपक्वंप

तद्भुतव्यंजनाक्तंयथास्वाचारंकृत्वापरिसमुह्यपर्युक्षेत्। अथबलिहरणं देवयज्ञकृ
तशेषेणशुचिदेशमभ्युक्ष्यतत्रकुर्यात्। अथपितृयज्ञः तत्रबलिहरणकृतशे
षंसोदकंस्वधापितृभ्यइतिप्राचीनावीतीदद्यात्।ततस्तथैवबलिनिवेशनांतेसोदक
मन्नंभूमौश्वचांडालभूतपतितवायसेभ्यश्चनिक्षिपेत्।एतेदेवयज्ञभूतयज्ञपितृयज्ञ
मनुष्ययज्ञावैश्वदेवइत्युच्यते।अहविष्यंसमस्तंवावैश्वदेवेविवर्जयेत्।यद्वा।कोद्रवंच
रकमाषंमसूरंचकुलित्थकं।क्षारंचलवणंसर्वंवैश्वदेवेविवर्जयेत्।यद्वा।नक्षारल
वणंविद्यतेहोमेतथापरस्यापरान्नसंसृष्टस्यहविष्यस्यहोमः।उदीचीनमुष्णंभस्मा
पोह्यतस्मिन्जुहुयात्।तद्धुतमहुतंचाग्नौभवति।नस्त्रीजुहुयात्।यद्वा।भस्मांगारे
षुजुहुयादहविष्यकं। अथाचम्यमनुष्ययज्ञंकुर्यात्।तत्रातिथ्यादीन्नवंयि
त्वानिवीतीसनकादिभ्योमनुष्येभ्योहंतेतिदद्यात्।यद्वाग्रंहंतकारं वाहंतेतिवात्यजेत्।

सनकसनंदनसनातनकपिलासुरिवोढुपंचशिखेभ्योहंत।एवंसनकादिभ्योहंतकारः।सर्व
थान्नंमनुष्येभ्योदेयंवापिजलंतथा।स्वाहाकारवषट्कारनमस्कारादिवौकसां।स्व
धाकारःपितृणांतुहंतकारोनृणांस्मृतः।पक्वाभावेप्रवासेचतंडुलानोषधीस्तथा।
पयोदधिघृतंवापिकंदमूलफलानिवा।योजयेद्देवयज्ञादौजलंवाप्सुवाजलेऽत्र।द्रवं
स्रुवेणहोतव्यंपाणिनाकठिनंहविः।स्नातकोब्रह्मचारीवापृथक्पाकीवैश्वदेवंकुर्यात्।
स्त्रीबालकश्चकारयेत्।होमाद्यदानरहितंनभोक्तव्यंकदाचन।अविभक्तेषुसंसृष्टेष्वे
केनापिकृतंचयत्।देवयज्ञादिसर्वार्थंलौकिकाग्नौकृतंयदि।इक्षून्पयःफलंमूलंतां
बूलंपयओषध्यं।भक्षयित्वापिकर्त्तव्याःस्नानहोमतपःक्रियाः।कुर्यादहरहःश्राद्धं
मन्नाद्येनोदकेनवा।पयोमूलफलैर्वापिश्राद्धान्यन्यानिभक्तितः॥ ×८× ॥
इतिस्मृत्यर्थसारेआचारप्रकरणम्   अथश्राद्धविधिरुच्यते   तत्र

तच्छ्राद्धंद्विविधं।पार्वणमेकोद्दिष्टमिति।त्र्युद्देशोपार्वणं।एकोद्देशएकोद्दिष्टं।तच्चत्रिविधं।नि
त्यंनैमित्तिकंकाम्यंचेति।तत्रनित्यमहरहरमावास्याष्टकादिषु।नैमित्तिकंपुत्रजन्मादिषु।
काम्यंफलार्थिनांतिथिनक्षत्रादिषु।पुनश्चपंचविधं।अहरहःश्राद्धं।पार्वणश्राद्धंवृद्धि
श्राद्धमेकोद्दिष्टंसपिंडीकरणंचेति।तत्रश्राद्धदेशाः।पुण्यक्षेत्रेशल्यकेशादिरहितशोधितो
दक्षिणाप्लवोगोमयेनोपलिप्तः   अथपार्वणश्राद्धकालाः   अमावास्याष्टकावृद्धिः
कृष्णपक्षोयनद्वयं।विषुवंसूर्यसंक्रामोव्यतीपातोगजच्छायाग्रहणंयुगादिमन्वादय
श्च।तिथिविशेषेविशिष्टदेशेगयादौविशिष्टकालेमृताहादौद्रव्यब्राह्मणसंपत्सुच।
आत्मरुचिश्चेतिश्राद्धकालाः   अथभोज्यविप्राः   अभिजात्यपूर्वश्रुताध्य
यनसंपन्नोवेदार्थविद्ब्रह्मवित्।त्रिसुपर्णस्त्रिणाचिकेतज्येष्ठसामत्रिमधुः।कौलि
ग्याद्यादि।अथवादौहित्रोभागिनेयोजामातामातुलःश्वशुरःशिष्यःसंबंधिबां

धवाः। कर्मनिष्ठः स्तपोनिष्ठः षडग्निः पंचाग्निश्चतुरग्निस्त्रेताग्निरेकाग्निर्वेदाध्यायी
ब्रह्मचारी साध्याः प्रशस्ताः। त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। त्रीणि चा
त्र प्रशंसंति शौचमक्रोधमत्वराः अथ निषिद्धाः रोगी न्यूनांगोतिरिक्तांगः। का
णो बधिरो नपुंसको विद्धपुंस्त्वो जारो जारापतिः खल्वाटो निष्ठुरो निजरूपदंतः कुन
खी दुश्चर्मा कुरूपो विकीर्णः पौनर्भवः कुंडगोलको। निषिद्धान्नाशी मद्यपः गाशी भृ
तकाध्यापकः। भृतकाध्यायी कन्यादूषी वाभिशस्तो मित्रध्रुक् पिशुनः। सोमविक्र
यी परिवित्तिः परिवेत्ता तयोर्दाता याजकौ वृथा मातृपितृसुतभार्यागुरुत्यागी पुन
र्भूपतिः। स्तेनः कितवो खेल्लकः कर्मदुष्टो विहितत्यागी निषिद्धग्राही साधावर्ज्याः।
सर्वे च प्रशस्ता लाभे निषिद्धो धनरहितो ग्राह्यः नित्यश्राद्धे वैश्वदेवं गृहबलि ३८
श्च पूर्वमेव। दर्शश्राद्धे वैश्वदेवं पूर्वं पश्चाद्वा। वृद्धावादौ क्षयाहे तु दर्शमध्ये महा

लये। आचांतेषु न कर्तव्यं वैश्वदेवं चतुर्विधं। गृहबलिश्च पश्चादेव। अन्यश्राद्धेषु पश्चा
देव सर्वं कार्यं। अथामावास्यायाः पार्वणश्राद्धमुच्यते। तत्र पितृणां च मातामहानां
च कार्यं। तत्र पूर्वेद्युस्तद्दिने वा नियतो नियतान्ब्राह्मणान् श्राद्धे क्षणः क्रियतामिति
निमंत्रितानाहूय स्वागतं पृष्ट्वा सुस्वागतमित्युक्तो दाहनीवीं कृत्वा छिद्रादिवर्जि
ते गृहे शुक्ले शुद्धे दिवसे द्विराचम्य प्राङ्मुखः कृतगोमयमंडले द्वारदेशे शरप्र
माणे श्रुकुशयवगंधाद्यर्चिते वैश्वदेवब्राह्मणपादान्यज्ञोपवीती सूर्याभिमुखः प्र
क्षाल्य कुशतिलगंधाद्यर्चिते मंडले पित्रर्थब्राह्मणपादान् प्राचीनावीती प्रक्षाल्य
स्वयं द्विराचांतो द्विराचांतानुपवेशयेत्। तत्र वैश्वदेवार्थब्राह्मणौ प्राङ्मुखौ दौ
र्भे दद्भीतदाहापसंबंधवर्जिते श्लक्ष्णचतुष्पादक्षुद्रपीठेन वा कौशे वा कार्णे वासने
उपवेश्य त्रीन्विप्रानुदङ्मुखान्पित्रर्थमुपवेशयेत्। यद्वा एकैकमुपवेशयेत्। मा

तामहादीनांचैवं। तत्रं वा वैश्वदेवं स्यात्ततो गृहाद्बहिः कुशान्तिलान्विकीर्य ब्राह्मणसमीपे
कुशेषु प्राङ्मुख उपविष्टो दैवं गयां देवान्वस्वादीन् पितॄञ्जनार्दनं च नत्वा कृतपादिका
क्षे समंत्रकामंत्रक प्रणायामद्वयं कृत्वा प्राचीनावीती पितॄणां पितामहानां प्रपिता
महानां सपत्निकानां मातामहानां मातुः पितामहानां मातुः प्रपितामहानां सपत्निका
नाममुकनामगोत्राणामस्मिन्काले सदैवं पार्वणश्राद्धं युष्मदनुज्ञया करिष्य इ
ति संकल्प्य। अपहता असुरा इति सर्वतस्तिलान्विकीर्य। उदीरतामिति स्वात्रोक्षे
त्। दैवं सर्वमुपवीती प्रदक्षिणं युग्मत्वपूर्वमुदगग्रमुदगपवर्गमुदङ्मुखः कुर्यात्। त
तो वैश्वदेवार्थं विप्रहस्ते अपो दत्वा युग्मान्कुशानृजूनासने वासने दक्षिणतो विश्वे
षां देवानामिदमासनमिति यवसहितं क्षिपेत्। आसने ष्वासनं दद्याद्विप्रहस्ते कृदा
नं। ततः पुनरपो दत्वा निमंत्रयेत्। दैवे क्षणः क्रियतामिति तत ओं तथेति विप्रो ब्रू

या। ततः प्राप्नोतु भवानिति कर्ता ब्रूयात्। प्राप्नवानीति विप्रः पुनर्ब्रूयात्। इति ग्रंथसंग्र
हकारिकास्मृतिः अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा। अन्नदाने चतुर्थी स्या
च्छेषाः संबुद्धयः स्मृताः इति श्लोके संग्रहकारिका। येद्वा सर्वत्र चतुर्थी वर्ज्याः। आवा
हनवर्जी सर्वत्र पुनः पुनरपो दद्यात्। ततः पुरूरवार्द्रवसंज्ञकान्। विश्वान्देवानावाहम
यिष्य इति यवहस्तः स्पृष्ट्वा वाहयेति तैरनुज्ञातो विश्वे देवास आगतेत्यावाह्य यवान्द
क्षिणपादादिमस्तकांतान्समारोप्य विश्वे देवाः शृणुतेमं हवं मे ये। आगच्छंतु महाभा
गा इत्याभ्यां मंत्राभ्यामुपस्थाय तत्समीपे भूमौ यवान्विकीर्य कुशानास्तीर्य सुवर्णा
दितैजसाश्ममयमृन्मय पलाशपत्रादिष्वेकद्रव्यपात्रद्वये द्विगुकुशकूर्चौ तिर्हिनि
शंनो देवीरभिष्टय इत्यपो निषिच्य यवोसीति यवान्क्षिप्त्वा गंधपु
ष्पादि निक्षिप्त्वा स्वाहार्घ्या इति निवेद्य विप्रहस्ते कूर्चं प्रागग्रं क्षिप्त्वा या दिव्या आ

पः पयसेत्यनेनाविश्वेदेवाइदंवो अर्घ्यमितितद्धस्ते अर्घ्यंदद्यात्।ततोविश्वेदेवा अयंवोगंध
४० इत्यादिप्रयोगेगंधादिदद्यात्।श्रीखंडकुंकुमकर्पूरागरुपद्मकादिगंधानुलेपनंकर्ता
कुर्यात्।गंधंदत्वाकर्तादर्भेणहस्तेनानुलिंपेत्।ब्राह्मणःस्वयमनुलिंपेदित्यन्ये अयंनियमः॥
ततोजातीमल्लिकाश्वेतयूथिकाचंपककुंकुमजात्यादीनिपुष्पाणिमरुबकादीनिसुगंधि
पुष्पाणिदेयानि।उग्रगंधीन्यगंधीनिवृक्षजरक्ताक्तानिअसुगंधिकंटकिजानिवा।अ
र्कधुत्तूरशिरीषकांचनारतुलसीबिल्वादीनिवर्ज्यानि।ततोघृतमधुसंयुक्तगुग्गुलु
श्रीखंडागरुसरलादिसंभवोघृतादिसमस्तोव्यस्तोवाधूपोदेयः।प्राण्यंगंहस्तवाता
हतंधूपंवर्जयेत्।ततोघृतेनतिलतैलेनवाऽनिषिद्धेनदीपंदद्यात्।वसामेदोद्भवंवर्जे
येत्।ततःशुद्धशुक्लमहतंसदशंवस्त्रमाच्छादनंदद्यात्।तन्मौल्यंवा।अलाभेत्तूत्तरी ४०
यंवायज्ञोपवीतंवाशक्त्यादद्यात्।ततोऽर्चनंसंपूर्णमस्त्वितिब्रूयात्।अस्त्वितितेच

प्रतिब्रूयुः।संकल्पसिद्धिरस्त्वितिभवंतोब्रुवंत्वितिकर्ताब्रूयात्।सुसंकल्पसिद्धिरितिविप्रोब्रूयात्।आसना
दिषुसर्वत्रस्वासनं।अस्त्वर्घ्यंसुगंधःसुपुष्पाणिसुमाल्यंसुधूपःसुदीपःसुज्योतिःस्वाच्छा
दनमितिविप्राःप्रतिब्रूयुरितिसंग्रहस्मृतिः।अथपित्र्यंप्राचीनावीती अप्रदक्षिणमयुग्मपूर्व
त्वंदक्षिणापवर्गंदक्षिणाभिमुखःकुर्यात्।पितृपक्षेप्येकवचनंपश्चाद्बहुवचनंवा।जघन्ये
प्येकवचनमेव।पित्र्यविप्रहस्तेषुपोदत्वा।अयुग्मकुशान्द्विगुणभुग्नान्सतिलानासनेषा
सनंपितृणामिदमासनंपितामहानामिदमासनंप्रपितामहानामिदमासनमिति।पितुःपिताम
हास्यप्रपितामहस्येदमासनमितिवा।पित्रेपितामहायप्रपितामहायेदमासनमितिवा।पितृ
भ्यःपितामहेभ्यःप्रपितामहेभ्यइदमासनंवामभागेदद्यात्।मातामहेष्वेवं।ततःश्राद्धेक्षणः
क्रियतामित्यादिप्रश्नानिमंत्र्यततःपितृन्पितामहान्प्रपितामहांश्चावाहयिष्य इतितिलहस्ते
नब्राह्मणान्पृच्छेत्।पितरंपितामहंप्रपितामहंवाहयिष्य इतिपृच्छेत्।वाहयेतितैरनुज्ञातःउशं

स्मृ.स.सा. तस्त्वेतयाऽऽवाह्य तिलान्मस्तकादि दक्षिणपादत आयंतु नः पितर इत्यनेनोपतिष्ठेत। मा
४१ तामहेष्वप्येवं कृत्वा पित्रे समीपमसौ तिलान्विकीर्य कुशेषु यजेतादि पूर्वोक्तपात्रत्रये त्रिकु
शकूर्चान्निहितेषु शंनो देवीरभिष्टय इत्यपो निषिच्य तिलोसि सोमदेवत्य इति तिलान्क्षिप्त्वा
गंधपुष्पाद्यपि क्षिप्त्वा स्वधार्घ्या इति निवेद्य विप्रहस्ते कूर्चं क्षिप्त्वा या दिव्या आप इति क्षि
प्त्वा पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्यमिति क्रमेणार्घ्यं दत्वा चतुर्थ्या वा द
त्वा तद्धस्तनिस्रुतार्घ्योदकं पितृपात्रे सिंचेत् दक्षिणाग्रेषु कुशेषु पितृभ्यः स्थानमसीति
सपवित्रं न्युब्जं कृत्वा तस्योपरि अर्घ्यपात्रपवित्राणि क्षिप्त्वा तिलपुष्पादि क्षिपेत्। तत्पात्रमा
समाप्तेर्न चालयेत्। मातामहेष्वप्येवं। पात्रालाभे एकपात्रपवित्रकं कार्यं। उशंतस्त्वायंतु नस्ति
लोसि मंत्राणामूहो न कार्यः। दैवे पित्र्ये च पात्रनिवेदनांते आवाहनमिति केचित्। ततः पित
रयं ते गंधः पितरोयं गंध इति वा इत्यादिप्रयोगेण गंधमाल्ये शुक्लपुष्पाणि दद्यात्। लला ४१
टे त्रिपुंड्राकारं स्कंधे मालां न वर्जयेत्। धूपं दीपं ज्योतिराच्छादनानि निवेदयेत्। दैवे पित्र्ये

च आसनक्षणावाहनार्घ्याक्षतगंधपुष्पधूपदीपाच्छादनानां पदार्थानुसमये सति विधिवृद्धिः
कांडानुसमये विधिसिद्धिरेव। ततः संकल्पसिद्धिं तं कुर्यात्। अथ गोमयेन चतुरस्रमंडलं कृ
त्वा पर्यंतं च कृत्वा दैवे सौवर्णादीनि पित्र्ये रौप्याणि पाणि वा स्वर्णरौप्यध्वंसीन्यन्यानि पात्रा
णि मृन्मयवर्जितानि मंडले निधाय तत्रापो निषिच्य हस्तेन मृज्य प्रक्षाल्य पुनर्जलेनैव प्रक्षा
लयेत्॥ अथाग्नौ पाणौ वा होमः॥ तत्र वृताः कर्मस्वेतं वादाय अग्नौ करिष्य इति पृष्ट्वा
कुरुष्वेत्यभ्यनुज्ञातः। औपासनाग्निमुपवीती परिसमुह्य पर्युक्ष्य प्राचीनावीती तूष्णीमिध्म
मग्नावाधाय मेक्षणेन स्रुवेणोपस्तीर्य विदानद्वयं क्षिप्त्वा पंचावृत्तीविंत्रयं क्षिप्त्वा पुनः स्रुवेणा
भिघार्य चरुमेक्षणेन सोमाय पितृमते स्वधा नमः। अग्नये कव्यवाहनाय स्वधा नम
इत्याभ्यां मंत्राभ्यामाहुतिद्वयं हुत्वा मेक्षणमग्नौ प्रहृत्य हुतशेषं पित्र्यपात्रेषु क्षिपेत्।
न दैवपात्रेषु। आहिताग्निः सर्वाधानी दक्षिणाग्नौ जुहुयात्। पित्र्यविप्रपाणौ वाऽग्न्य

भावेपाणौहोमः।पाणिहोमेतुइध्ममेक्षणविप्राभ्यनुज्ञानसंति।पित्र्यविप्रपाणोपरिसमुह्यपर्यु
क्ष्यवामेनोपस्तीर्य।दक्षिणेनावदायप्रत्यभिधायहुत्वापरिसमूह्यैहनपर्युक्षणेनस्तः।मोमा
महादिषुचैवं।तदेवसाग्निनापाणिहुतंतद्देवप्राश्याचम्योपविशेत्।अथवाभाजनेप्रक्षिप्या
चम्योपविशेत्।अग्न्यभावेहुतंतुपूर्वंनाश्नीयात्।भोजनकालएवाश्नीयात्।सक्ताग्निहुतंतुनै
वाश्नीयात्।प्रेतश्राद्धेषुचतदग्नौक्षिपेदित्याहुः।ततोदेवमुपस्तीर्यस्वयंपत्नीवान्येवानियताः
प्रशस्तहविष्यान्नपूर्वंपरिविषणंकुर्युः।नापवित्रेणहस्तेननैकहस्तेननायसेनहस्तेनपरिवेषणं
कुर्युः।त्वेणपर्णाद्यंतर्धानेनदोषः। अथहविष्याणि व्रीहिशालियवगोधूमप्रियंगुमु
द्गमाषश्यामाकनीवाराद्याः।कालशाकंमहाशाकंद्रोणशाकंमेध्यमांसंमहाशल्कादि
हस्तिकदलीपनसाम्रातकाम्रखर्जूरराजजंबूगोस्तनीद्राक्षाप्रियालामलककनारिकेलत्र
पुष।श्रोर्वारुकचिर्भिटफलंगुदफलंमधुरोन्नमफलबदरादिएला शुंठीवाईकहिंगुमरीच ४२

पिप्पलीमधुकगुडशर्कराखंडकर्पूरसैंधवमानसालवणानिमधुगव्यपयोदधिघृतानीत्यादीनि
प्रशस्तानि।एतद्यथासंभवमोदनसूपपायसातूपभक्ष्यपानादिकंचबहुपरिविष्य।हिंगुशुं
ठीमरीचंपिप्पलीचमद्रव्यसंस्कारार्थानिश्राद्धेस्पुनप्रत्यक्षेणभक्ष्याणि॥ ॥अथाहवि
ष्याणि॥ ॥कोद्रववरकमसूरिकुलित्थपुलकराजमाषरक्तद्विदलमाषाःसर्वलवणा
ढक्यः।कृष्णयावनालकृष्णधान्यानिमुद्गमाषतिलव्यतिरिक्तानिवर्ज्यानि।उपोदकीतु
लसीकुसुम्भालसीशिग्रुमहासर्षपप्रतिगंधशाकानि।कूष्मांडगांधारिमर्कटिकापिंडमूल
बिल्वफलकांचनालर्ककपित्थंकचकंकरंजंकरवंदकलिंगवंशांकुरंपित्रर्थोत्पत्यायाश्चि
तंशुक्लोत्पहतंसर्वंकृष्णजीरशतपुष्पाविडलवणादि।आरण्यमृगमहिषीचमरीपयो
दधिघृतादीन्यप्रशस्तानिवर्ज्यानि।प्रशस्ताभावेषनिषिद्धमाद्यं॥ ॥अथपात्रेषुप
रिविष्यदैवेपात्रेसकुशयवान्पक्षिप्ताऽपात्रंपर्युक्ष्यपृथिवीतेपात्रमित्यभिमंत्र्यातोदेवा

स्मृत्य०सा इत्यन्नमुक्त्वाविष्णोहव्यंरक्षस्वेति अन्नेद्विजांगुष्ठंनिवेश्य पुरूरवार्द्रवसंज्ञकाविश्वेदेवाइदमन्नं
४२ हविर्ब्राह्मणस्यांहवनीयार्थेद्रव्यंभर्तृयायंब्राह्मणोगदाधरःविश्वेदेवोदेवेभ्यइदमन्नंपरिवि
ष्टंपरिवेक्ष्यमाणंचातृप्तेर्नममेतियवोदकेनत्यक्त्वा येदेवासइत्यनेनोपतिष्ठेत् अथपित्र्यपा
त्रेषुकुशांतिलान्क्षिप्त्वापात्रंपर्युक्ष्यपृथिवीतेपात्रमित्यभिमंत्र्यइदंविष्णुरित्यन्नमुक्त्वावि
ष्णोकव्यंरक्षस्वेतिअन्नेद्विजांगुष्ठंनिवेश्यपितादेवतापितरोवादेवताइदमन्नंकव्यमित्युक्त्वा
पित्रेवसुरूपायपितृभ्योवसुरूपेभ्यःइतिवोक्त्वाइदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेर्न
ममेतिपित्रेवसुरूपायपितामहायरुद्ररूपायप्रपितामहायादित्यरूपायपितृभ्योवसुरू
पेभ्यःपितामहेभ्योरुद्ररूपेभ्यःप्रपितामहेभ्यआदित्यरूपेभ्यस्तिलोदकेनत्यक्त्वायेचेहपित
रइत्यनेनोपतिष्ठेत्।नात्रोहस्त्रकार्यः।मातामहेष्वेवं।अतिथिरस्तिचेत्तंदेववदर्चयित्वास्त्व ४२
ष्टदेवरूपायविष्णुरूपायशिवरूपायसूर्यरूपायचेत्यन्नंत्यक्त्वायेदेवासइत्युपस्थायदे

वतेभ्यःपितृभ्यश्च।सप्तव्याधादशार्णेष्वित्यादीन्जपित्वाआपोशानंदत्वाप्रणवंगायत्रीमधुम
तीर्जपित्वामधुरितित्रिरुक्त्वाॐतत्सत्यथासुखंजुषध्वमितिब्रूयात्॥ अथब्राह्मणाः
प्राणाहुतिपूर्वंमौनिनोभूत्वाश्रुत्वाभृतकात्पात्रमनुद्धरंतोमुखशब्दंपाण्यादिचापलंवर्जयं
तोभुंजीरन्।यद्वाम्रतादिपाणिकास्त्रुभिंडिकास्त्रुवाप्राणाहुत्यूर्ध्वंपूर्वंवापात्रंनिधायभुं
जीरन्।उच्छिष्टसेकपादरजःस्पर्शक्रमणादिभयात्।सर्वथानकार्यंत्रिषुनिदध्युःनब कादि
लिंकुर्युः।ततोभोक्तेककर्त्रेपित्रेवायज्ञोनतेहावस्तहेयं।आत्मप्रेक्षरोऽपिपित्र्यपवित्रंमंत्रान्स्र
णवादिपूर्वानुपवीतीश्रावयित्वाप्रणवमायत्र्योजपेत्।ततःसार्ववर्णिकमन्नाद्यमादाय
प्रणवमुक्त्वाप्राचीनावीतीमधुवाताइतित्यचमक्षन्नमीमदंतेत्यचंचश्रावयित्वातृप्ता
स्थेतिपृष्ट्वातृप्ताःस्मइतितैःप्रत्युक्तेदेवपित्र्यब्राह्मणसन्निधौपुरतउच्छिष्टसमीपेद
क्षिणाग्रेषुकुशेषुतिलोदकेपितृतीर्थेनप्रसिच्यये अग्निदग्धायेअनग्निदग्धाइत्यनेन

स्मृत्य॰भा॰ नससलिलमन्वंक्षिप्त्वातिलोदकंप्रसिच्यानामेत्॥ ततोगंधपुष्पंदत्वासार्ववर्णिकमन्नाद्यंपिंडा
४५ र्थमुद्धृत्यान्नशेषैः किंक्रियतामितिपृष्टेशेषैः सहोपभुज्यतामित्यभ्यनुज्ञातेतैर्गृहीतेष्वग्निहो
मेष्वग्निसमीपेपाणिहोमेविप्रसमीपेपिंडपितृयज्ञवत्पिंडान्निदध्यात्॥ तत्रैवंगोमयेनो
पलिप्तेभूप्रदेशेनवाकादिरेणकाष्ठेनवादर्भेणवाअपहताअसुरारक्षांसीत्यादिनारेखा
द्वयंप्रागपवर्गमुल्लिख्याद्भिरभ्युक्ष्यतत्रबर्हिरास्तीर्यपूर्वरेखायांपिंडदेशेशुंधंतांपितर
इत्यादिभिर्मंत्रैस्तिलोदकंपितृतीर्थेननिनीयपश्चिमरेखायांशुंधंतांमातामहाइत्या
दिभिर्निनीयएतत्तेदेवदत्तशर्मन्नयेचत्वामनुइत्युक्त्वाएतत्पिंडरूपमन्नंपित्रेनममेत्या
दिभिस्तिलमिश्रान्प्राचीनपाणिः पिंडान्निधायअत्रपितरइत्यादिनाषट्पिंडान्स
कृत्सकृद्देवानुमंत्र्यसव्यकृदुदगावृत्ययथाशक्त्यानुच्छ्वसन्नासित्वाअभिपर्यावृत्य ४४
अमीमदंतपितरइत्यादिनानुमंत्र्योच्छ्वसेत्॥ ततउपवीतीपिंडशेषमवघ्रायहस्तंप्रक्षा

ल्याचम्यप्राचीनावीतीपिंडेषुपूर्ववदुदकंनिनीयदेवदत्तशर्मन्नभ्यंक्ष्वेतिपिंडेषुतैलंदत्वादेवदत्त
शर्मन्नंक्ष्वेतिअंजनंदत्वाएतद्वः पितरोवासोमाइत्यादिनावासोदशामूर्णास्तुकांवादद्या
त्॥ पंचाशद्वर्षादूर्ध्वंस्वहस्तलोमवादद्यात्॥ तेनैवमंत्रेणततः पिंडेभ्याक्षतगंधपुष्पधूप
दीपान्॥ नैवेद्यतांबूलादिदत्वा॥ अथपिंडान्पितृन्रूपानुपतिष्ठते॥ नमोवः पितरइत्यादिना
मनोन्वाहुवामहेमइतिचतसृभिः॥ अथपिंडान्युगपद्वावाहयेत्॥ परेतनपितरइत्यृचावाअ
ग्नेतमद्येत्यृचावादक्षिणाग्निंप्रतिगच्छेत्॥ औपासनेतुअग्नेतमद्येतिगत्वायदंतरिक्षमि
तिजपेत्॥ तत्रगार्हपत्यस्यलोपः पाणि+यदंतरिक्षमित्यृचागार्हपत्यंप्रतिगच्छेत्×होमेअ
ग्नेस्यादित्युक्तेनास्त्येवावीरंमेदत्तपितरइतिमध्यमंपिंडमादायआधत्तपितरइतिपत्नींप्राश
येत्॥ पुत्रायायुरारोग्यैश्वर्यार्थंपिंडास्त्वगोविप्रेभ्योददाात्॥ अग्नौजलेवाक्षिपेत्॥ अ
प्स्वीनिनयनाभ्यांअन्यत्रपितृशब्दस्याहोनकार्यः॥ एवंवास्वशाखोक्तविधिनावापिं

अग्निधायाचम्यान्नमनं दधात्। ततो विप्रहस्ते पोदत्वा दर्भान्दत्वा यवान्न्तिलांश्च क्रमात्क्षिप्त्वा।
तान्शिरस्य पुनः साक्षतपुष्पान्क्षिप्त्वा गोत्रनाम्नाभिवाद्य गोत्रं वर्द्धतामिति याचयित्वा स्व
स्ति वर्द्धतां गोत्रमिति प्रत्युक्त्वा प्रत्युक्त्वाशिषो गृहीत्वा पात्राणि चालयित्वा वामेत्। अनुप
नीतः स्त्री न चालयेत्। ततो विश्वेभ्यो देवेभ्यः पितृभ्यश्च स्वस्तीति ब्रूतेत्युक्त्वा तेभ्यः स्वस्ती
ति प्रत्युक्ते विश्वेषां देवानां पितृणां चाक्षय्यमस्त्वित्युक्त्वा अस्त्वक्षय्यमिति प्रत्युक्ते हि
रण्यरजतादिशक्त्या दक्षिणां दधात्। ततो दक्षिणाः पांतु बहुदेयं चास्त्वित्युक्ते तैस्तथैव प्र
त्युक्तेः स्वधां वाचयिष्य इत्युक्ते वाच्यतामित्यनुज्ञातः पितृभ्यः स्वधोच्यतामित्युक्त्वा
अस्तु स्वधेति प्रत्युक्ते भूमौ जलं सिंचेत्। स्वधा संपद्यंतामित्युक्ते संपद्यंतां स्वधा इ
ति प्रत्युक्तेः विश्वेदेवाः प्रीयंतामित्युक्ते प्रीयंतां विश्वेदेवा इति प्रत्युक्तेः। पितरः प्रीयंता ४५
मित्युक्ते तथैव। ततोऽनुज्ञां पात्रमुत्तानं कृत्वा पवित्राणि विसृज्य विप्रहस्तेषु अक्षता

पुष्पाणि दत्वा वाजे वाज इत्युक्त्वा उत्तिष्ठत पितर इति दर्भेण विप्रान्पितृपूर्वं विसर्जयेत्। ततः पाद
प्रक्षालनदेशे आमावाजस्येति प्रदक्षिणीकृत्य दक्षिणाभिमुखो दातारो नोऽभिवर्द्धतामन्नं
नो बहु भवेदिति शांतेषु याचितेषु तैश्च ताभ्यां श्लोकाभ्यां युष्मदाख्यातश्चेन तथैवास्त्वि
ति प्रत्युक्ते आशिषो गृहीत्वा प्रणिपत्याद्य मे सफलं जन्मेति प्रसादसर्वं संपूर्णमस्त्वि
ति वाचयित्वाक्षम्यतामित्युक्त्वा निवेशनांतमनुव्रज्यास्यामित्युक्ते प्रदक्षिणीकृत्यागत्यै
पाकांतरेण श्राद्धशेषेण वा वैश्वदेवादिकं कृत्वेष्टैः सह श्राद्धशेषं पूर्वं वर्ज्जीत॥ निमंत्रणा
दिन तद्दात्रो न ब्रह्मचारी स्यात् भोक्ता तु पुनर्भोजनाध्वगमनाध्ययनाध्यापनमैथुनदा
न प्रतिग्रहहोमादीन्वर्जयेत्॥ ॥इति स्मृत्यर्थसारे पार्वणश्राद्धं सर्वसंग्रहमतात्लिखि
तं॥ ॥अनुपनीताः स्त्री शूद्राः श्राद्धमृत्विजैः कारयेयुः। स्वयं वाऽमंत्रकं नामगोत्रा
भ्यां कुर्युः। देवेभ्यो नमः पितृभ्यः स्वधा नम इति मंत्राभ्यां वा। पितरो यत्र पूज्यंते तत्र मा

तामहा अपि। अविशेषेण कर्त्तव्यं विशेषान्नरकं व्रजेत्। एवं काम्यश्राद्धं तत्र मधुलोचनौ विश्वे
देवौ अग्नौ पाणौ वा होमः॥ नैमित्तिकं श्राद्धं तद्वत्। तत्र कामकालौ विश्वेदेवौ विश्वेदेवार्थं मा
त्राद्यर्थं पित्राद्यर्थं इष्टिश्राद्धं ऋतुश्राद्धं वत्तद्वत्। तत्र कौ॥ अथ वृद्धिश्राद्धं। तत्र सत्यवसुसंज्ञ
कौ विश्वेदेवौ विश्वेदेवार्थं मात्राद्यर्थं पित्राद्यर्थं सपत्नीकमातामहाद्यर्थं द्वौ द्वौ विप्रौ युग्मा वा
शक्तितो योज्याः॥ अमूलाद्दर्भा यज्ञोपवीती प्राङ्मुखेभ्य उदङ्मुखो दद्यात्। उदङ्मुखेभ्यो
विप्राङ्मुखः सर्वथा न दक्षिणामुखेभ्यो दद्यात्। तिलार्थे यवाः। नांदीदेवेक्षणः क्रियतां
नांदीश्राद्धे क्षणः क्रियतां। ॐ तथा प्राप्नुवंता भवंतो प्राप्नुवामेसा दक्षिणे। पित्र्ये पिंडि
कुशाकूर्चकं पवित्रकं। पित्र्ये नांदीमुख एवं युग्मलं वयवोसि सोमदेवत्य इति यवावापः
स्वधायाः पुष्ट्याः स्वधानमः स्थाने स्वाहाशब्दः। स्वाहार्घ्य इति अर्घ्यनिवेदनं नांदी ४६
मुखाः पितरः प्रियंतामिति वा। द्विर्द्विर्गंधादिदेयं। प्रदक्षिणमुपचाराः उदगपवर्गं च।

अग्नौ पाणौ वा होमः। अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहेति व्युत्क्रमेण
होमः। होम हेमवन्मेक्षणप्रक्षेपः। रक्षोघ्नीं शांतिमंत्रान् श्रावयेत्। मधुवाता इत्यत्र स्थाने
उपास्मै गायतानर इति पंचर्चं श्रावयेत्। अन्यमधुमंत्रान् अक्षन्नमीमदंत इत्यंते श्रावयेत्।
आचांते सम्युक्ता शय्या गोमयेनोपलिप्य प्रागग्राः प्रागग्रान्दर्भानास्तीर्य देवपूर्वदाज्ञं
शेषं पार्वणवत्। तत्र पिंडमात्रस्य लोपो वा पिंडादिकस्य लोपो वा॥ अथैकोद्दिष्टं॥ ॥
तत्र सर्वश्राद्धानि त्रिविधानि॥ नवश्राद्धानि नवमिश्राणि पुराणानीति। तत्र प्रथमाहा
देकादशाहांते प्रथमदिनत्रयमध्ये आमादिसंभवे दशाहादि सर्वकार्यं पितृमातृव्य
तिरिक्ते तु न कार्यमित्यर्थः। विहितानि नवश्राद्धानि एकादशाहादिन्यूनाब्दांते विहि
तानि नवमिश्राणि। ततः परं पुराणानीत्युक्तानि। तत्र सर्वैकोद्दिष्टेषु देवं नास्ति। एकउद्दे के
शः। ब्राह्मणश्चैकः॥ अयुग्मा वा विप्राः। एकं पात्रं पवित्रं च। पाणौ होमो नास्ति वा पु

कशेषेणैकः पिंडो देयः॥ पुराणेको द्दिष्टे पार्वणैकदेशवत्सर्वं दैवहीनं समंत्रकमेव। पाणौ मंत्राभ्यां
होमः॥ नवमिश्रेषु दैवानिमंत्रणं॥ निमंत्रणादिनस्वधोक्तिः पितृशब्दः स्वधानमः॥ शब्दवतां
मंत्राणां लोपः॥ तिलावापादि सर्वं तूष्णीं कार्यं। तूष्णीमर्घ्यनिवेद्यानां वा ह्यमंत्रीस्तेनाम्ना
प्रेतोद्देशेनार्घ्यं दत्वा गंधादि देयं। प्राणे प्रेताय स्वाहेत्येकाहुतिः॥ पितृशब्दं न वा। धूपं दीपं स्व
धाशब्दं पिंडमनु जपमभिश्रवणं न वर्जयेत्। अक्षय्यस्थाने उपतिष्ठतामिति वदेत्। प्रतिवचनं च
तद्वत्। अभिरम्यतामिति विसर्जयेत्। अभिरताः स्मेति प्रत्युक्तिः॥ नवमिश्रेऽपि सर्वं समंत्रकमि
त्येके। नवमंत्रेषु सर्वं समंत्र×स×कमेव कार्यं। नाम प्रेतशब्दं च न लोपयेत्। स एवं निमंत्रणं धू
पदीपं श्राद्धशेष भोजनं न वर्जयेत्। नवश्राद्धं चक्रु वास्ना पात्। अन्यत्सर्वं श्राद्धं पार्वणवत्
। नवश्राद्धान्येकादशाह्निका कार्याणि। तत्राद्येमहैकोद्दिष्टं। तत्र बहु दक्षिणा प्रेतवस्त्राभरण ४७
यानशय्यासनभाजनपादुकोपानहछत्रादिकं देयं। रुद्रगणे प्रेतोद्देशपक्षे नवश्राद्धवद्दुद्दे

शपक्षे तु यज्ञोपवीती विप्रान्संपूज्य संभोजयेत्। रुद्ररूपे प्रेतोद्देशे नवश्राद्धं सोदकुंभसलि
लं सर्वत्र दक्षिणा देया। प्रेतश्राद्धे विशेषः॥ अथ सपिंडीकरणं॥ तत्र मंडकत्रयं॥
द्वौ द्वौ वा विप्राः प्रेतस्थाने त्वेकः॥ तत्पित्रादिषु त्रयः। अथवोद्दैवे पित्र्ये वा एकैको विप्रः। का
मकालौ विश्वेदेवौ। देवार्चनं पूर्ववदेव। प्रेतार्थमेकं पात्रं तत्पित्रादर्थं त्रीणि प्रेतनवमि
श्रेकोद्दिष्टवत्। पित्र्ये पार्वणवत्। पात्राणि पूरयित्वा गंधादि क्षिपेत्। पात्राणि तत्रैव नि
वेद्य प्रेतपात्रं पितृपात्रेषु संयोजयिष्य इति स पृष्ट्वा संयोजयेत्स ह्यनुज्ञातः। प्रेतपात्रं कुशा
न्पितृपात्रेषु क्षिप्त्वा प्रेतपात्रे किंचिदेव जलं सकुशमवशेष्य ये समानाः समनस इति
द्वाभ्यां मंत्राभ्यां पितृपात्रेषु प्रसिंचेत्। पितृपात्रावशेषेण प्रेताय अर्घ्यं पित्र्ये तत्पात्रार्घ्ये
र्घ्यं दत्वाच्छादनांतं कृत्वा पृथक्पृथगग्नौ हुत्वा प्रेताय प्राणावेकाहुतिं जुहुयात्। नवापि
न्यर्थमग्नौ पाणौ वा मंत्राभ्यां होमः॥ तच्छेषं पितृभ्यः पाणिषु दद्यात्। तदन्नं भोजनात्रा

स्मृ.स्य.सा. ऽश्नीयात्। भोजनार्थान्नेन सहाश्नीयात्। प्रेतोद्देशेनैकपिंडं कृत्वा पित्र्ये त्रीन् पिंडान्मंत्रतो द
४८ त्वा प्रेतपिंडं पितृपिंडेषु संयोजयिष्य इति पृष्ट्वा संयोजये सर्वैरनुज्ञातः प्रेतपिंडं त्रिधा विभ
ज्य पृथ्वीमंत्राभ्यां पित्रादिपिंडेषु निदध्यात्। अनुमंत्रणादि सर्वं पार्वणवत्सर्वत्रैव समापये
त्। श्राद्धभोजने मिथः स्पृष्टौ तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतं जपेत्। उच्छिष्टे सि
क्तेऽतत्। प्रक्षाल्य भुक्त्वा द्विशतं जपेत्। उच्छिष्टभोजने सहस्रं जपेत्। मातृणां चैवं त
त्र विशेषः। अपुत्रायां मृतायां भर्त्ता स्वमात्रादिभिः सापिंड्यं कुर्यात्। मातृपिंडदानादि
कं आसुरादिविवाहोत्पन्नः पुत्रिकापुत्रश्चेत्तत्पितृगोत्रेणैव कुर्यात्। ब्राह्मणादिविवाहो
त्पन्नः पितृगोत्रेण वा कुर्यात्। अन्वारोहणे एकचित्यारोहणे एकदिनमरणे स्त्रियाः पृथक्
सपिंडीकरणं न कार्यं। भर्त्तुः कृते स्त्रियाश्च कृतं भवति। दिनांतरमरणे तु स्वपितृ
मातामहपिंडे कुशानंतर्धाय पित्रैकेन सापिंड्यं मातुः कुर्यात्। सर्वत्र मातृपत्न्याः सा ४८

पिंड्यमेके नैवाश्वशुरेण निषिद्धं। केचित्त्रिभिरेव सह सापिंड्यमाहुः। आसुरादिविवाहोत्पन्नः पु
त्रिकापुत्रश्च स्वमातामहादिभिरेव। तथा च सति मातामहादिश्राद्धं नित्यमेवमृताहादौ। ब्राह्मा
दिविवाहोत्पन्नः पित्रैकेन पितरि स्थिते पितामह्यादिभिर्मातामह्यादिभिर्वा सापिंड्यं कु
र्यात्। ब्राह्मणादिहतानां प्रायश्चित्ताकरणे ब्रह्मचारिणामनपत्यानां सापिंडीकरणं नैते
षां सदैकोद्दिष्टमेवाव्युत्क्रमेणाव्यवस्थितैः सापिंड्यं कार्यं न वा। केचित्सर्वत्र सपिंडीकरणमाहुः
। संवत्सरादर्वाक्सपिंडीकरणे सति प्रतिदिनं प्रतिमासं वा सोदकुंभं श्राद्धं मृताहः श्राद्ध
वत्कार्यं। सपिंडीकरणमारभ्य वा शुद्धिमारभ्य वा एकादशाहादिषु तान्येव षोडश श्राद्धा
नि मृताहः श्राद्धवत्कृत्वा वा संवत्सरविमोक्षार्थं पार्वणश्राद्धे भूरि ब्राह्मणभोजनं कुर्या
त्। मृताहश्राद्धं प्रत्यब्दमेकोद्दिष्टं पार्वणं वा यथास्वाचारं पुत्रैः कार्यं मरणपक्षे यन्मासे
यत्पक्षे या तिथिस्तद्दिने तस्य मृताहः। पत्नीनां त्रिभिः सदा पार्वणमेव कार्यं। दर्शे मृतस्य

प्रेतपक्षेमृतस्यप्रत्यब्दंपार्वणमेव। यतीनांत्रिदंडिनांप्रेतत्वंनास्त्येव। एकादशेऽह्निपार्वणमेवका
र्यं। दंडग्रहणात्पूर्वंमरणेस्वशाखोक्तविधिनादग्ध्वाउदकपिंडप्रेतश्राद्धपाथेयश्राद्धादीनिका
र्याण्येव। भ्रष्टानांतुप्रेतश्राद्धंसर्वंममंत्रकंद्वादशेऽह्निकार्यं। मासेजातेवाकार्यं। अनाहि
ताग्नेर्मरणादिदिनात्रेतमृताहेश्राद्धंच। आहिताग्नेर्मरणादिप्रेतकार्यंमृताहश्राद्धंचकार्यं
। दहनादिकार्यं। त्रिपक्षांततेस्माहश्चेदूर्ध्वंमृताहएव। सर्वेषांमृताहश्राद्धंकार्यमेव। ।
अष्टकासुगयायांपितॄणांमातॄणांचपृथक्श्राद्धं। नसपत्नीकानां। मातामहानांसपत्निक
मेव। तत्रदैवंतंत्रमेव। पित्रपूर्वत्वंच। अनेकमातरोप्येकत्रभोज्या। अन्यत्पूर्ववत्। वृद्धौत्वन
सपत्नीकं। स्त्रीपूर्ववत्वं। दैवतंत्रत्वंचोक्तमेव। मृताहश्राद्धंमातामहेपितृमातामहेश्राद्धे
पितॄणामेवकार्यं। वृद्धौनसपत्नीकं। मातृमातामहेमातॄणामेवकार्यं। पितॄणांचेतत्रश्रा
द्धप्राप्तिरेवनास्ति। मातापित्रोर्मृताहैक्येपितुर्मातुश्राद्धंपृथगेवनसपत्नीकं। तत्रपूर्वंपितृ ४९

पिश्राद्धंसमाप्यततोमातृश्राद्धंकुर्यात्। पित्रोर्मृताहैक्येसहदहनेचमातृश्राद्धंपृथगेव। त
त्रनुपितृश्राद्धंमातृश्राद्धंचैकपाकेनएककालेनक्रमेणसमापयेत्। मृताहैक्येएकचित्या
रोहणेसतितत्रस्वमातृश्राद्धंपृथगेव। तत्रदैवंतंत्रमेव। ततःपितरस्ततोमातरः। अनेक
मातरःपृथगेवक्रमेणकार्याएकपाकबर्हिःप्रयोगेक्यैभिन्नचित्यारोहणेसर्वंपृथगेव। मृत
श्राद्धस्यैकोद्दिष्टत्वेप्येषःक्रमः। अष्टकागयावृद्धिमृताहादन्यत्रसपत्नीकमेव। माता
महानामेतेष्वपिसपत्नीकमेव। मृताहवर्ज्यं। तत्रपृथगेवासर्वेषांपितृव्यतिरिक्तानांमा
तुलगुर्वाचार्याणांचतद्वत्। अपरपक्षमहालयेसर्वेषांपितॄणांश्राद्धंकार्यं। तत्रमातृ
श्राद्धंपृथक्प्रशस्तं। मातामहानांसपत्नीकमेव। गुर्वाचार्यपितृव्यमातुलश्वशुरोपा
ध्यायभ्रातृसखिप्रियपोषकद्रव्यदपुत्रशिष्यत्विगादीनांतत्स्त्रीणांश्राद्धंकार्यं। अपु
त्राणांविशेषेणकार्यं। तत्रएकःपाकः। वैश्वदेवंतंत्रंपिंडैबर्हिश्चैकं। पक्षश्राद्धेवतथैव।

तत्रत्रयोदश्यामेकवर्गस्य श्राद्धं न कार्यं। पिंडदानं निषिद्धं। मघायोगे विशेषतो निषिद्धं। पुत्रका
५० मस्य न पिंडबर्हिः कुशाः काशाः दूर्वाः प्रशस्ताः। व्रीहियवगोधूमोशीरिक्षुकुदुरमुंजबल्वजाश्च
भवंति। एकादश्यां त्रयोदश्यां माघायां कृत्तिकासु न। पिंडदाने दूर्वा निषिध्यते। तत्पक्षे न चतुर्द
श्यां शस्त्रहतस्यैव श्राद्धं तत्रैकोद्दिष्टमेव सर्वेषां। पापमृत्यूनां नैवं। तत्र दैवं पार्वणवत्। नित्यश्रा
द्धमदैवं स्यात्। षट्पुरुषं न भवति। तत्रान्नदेशकालकनियमोः। कर्तृभोक्तृनियमाश्च न संति।
विप्रानुपवेश्यासनं दत्वा अर्घ्यहोमपिंडवर्ज्यं संकल्पसिध्यं तं कृत्वा नंत्यस्त्काभूक्तो प्रसादये
त्। विवाहमौंजीबंधादूर्ध्वं वर्षं वर्षार्धं वा मासं सपिंडीकरणवर्जं श्राद्धेषु सपिंडाः पिंडान्न दद्युः
।शेषं सर्वं कुर्युः। पृथक्पिंडान्न दद्युः। पितृयज्ञेन यज्ञे न गयायां दद्युरेव न। सपिंडीकरणं वर्जं
।सर्वश्राद्धेषु विस्तृतपार्वणविधिनासंभवे संकल्पविधिने न कार्यं। संकल्पविधानं नाम ५०
आवाहनार्घ्यहोमपिंडवर्जं। पार्वणोक्तयथासंभवं भवति। अन्नाभावे द्विजाभावे प्र

वासे पुत्रजन्मनि। पत्न्याभावेऽगत्याभावे पाककर्त्रभावे सति पत्न्यां रजस्वलायां सत्यां आपदी
तीर्थे ग्रहणे संनिधौ भोजननिषेधकाले मृताहे वान्यश्राद्धे न संग्रहे रात्रिसंक्रांतौ वा वीरास्त्री
शूद्राश्च सर्वदा। आमश्राद्धं कुर्युः। तत्राच्छादनांतं कृत्वा आमं चतुर्गुणं द्विगुणं समं वा सोपस्क
रं त्यक्त्वा दक्षिणां दत्वा समापयेत्। आमेन पिंडदानं न वा। स्वस्तिवाचनं नास्ति। अन्नाभावा
दिभिन्निमित्तेषु हेमश्राद्धं वा कार्यं विशेषतः। पुत्रजन्मापत्नीकप्रवास्यनग्नितीर्थपत्यग्रहेषु
हेमश्राद्धे आवाहनार्घ्यगृहपाकहोमपिंडान्कुर्युर्न वा। आच्छादनांते हिरण्यं अष्टगुणं चतु
र्गुणं समं वा दक्षिणां त्यक्त्वा पूर्ववत्समापयेत्। अन्नाभावाद्यनेकनिमित्तेषु संकल्पितश्रा
द्धं कार्यं। तत्र द्रव्ये विप्रे वा असन्निहिते असंभवे आमहेमवस्त्रभूधनधान्यादि वस्तु श
क्त्या पितुरुद्देशेन संकल्प्य त्यजेत्। मासिकानि मृताहश्च संभवेऽन्नेनैव कार्याणि। सपिंडी
करणं तु पूर्ववदन्नेनैव कार्यं॥ अथ श्राद्धकालविधिः॥ ॥तत्र तावद्यस्मिन्दिने

स्मृत्य·सा· यद्विहितंकर्मतद्दिकासुतत्कर्मणः प्रारंभंसमाप्तिंचकुर्यात्। स्मृताहश्राद्धेचविशेषेणप्रारंभं
समाप्तिंनकुर्यात्। अह्निपंचदशधाविभक्ते अष्टमोमुहूर्तः कुतपः कुतपादिपंचमुहूर्ते
५१ षुश्राद्धंकार्यं। अह्नःपंचधाविभागेत्रिमुहूर्तकाः प्रातःपूर्वाह्णोमध्याह्नोपराह्णःसा
याह्नइतिप्रातःकालेवृद्धिनिमित्तंश्राद्धंप्रशस्तं। पूर्वाह्णे आमश्राद्धंहेमश्राद्धंचम
ध्याह्नेएकोद्दिष्टं। अपराह्णेपार्वणंपिंडपितृयज्ञकरणदिनेसायाह्नेपिपार्वणमनुज्ञा
पयेत्। एवंपूर्वदिनेषु॥ ॥अथखंडतिथिरुच्यते॥ ॥अमावास्याष्टचंद्रासिनी ६
वालीसंज्ञाअदृष्टचंद्राकुहूसंज्ञाअमावास्याभूतविद्धावेदपराह्णव्यापिनीग्राह्या। भू
भूतविद्धावेत्युक्ताअपरेह्निअपराह्णव्यापिनीतिथिर्ग्राह्या। मध्याह्नात्परस्मादमावास्या
प्रतिपत्तिथौभूतविद्धनभवति। अत्यंततिथिक्षयेविषये अपरेह्नरपराह्णे अमावास्या
याअभावेभूतविद्धापिसिनीवालीग्राह्या। ततोर्वाचीनक्षयेपिभूतविद्धासिनीवाली ५२
अपराह्णव्यापिनी सर्वैर्ग्राह्या। यद्वासाग्निकैःसिनीवालीनिरग्निकैःस्त्रीशूद्रैश्च

कुहूः। अत्यंततिथिवृद्धौभूतविद्धासिनीवालीत्युक्ताअपराह्णव्यापिनीकुहूर्ग्राह्या। ततोर्वाची
नवृद्धौभूतविद्धासिनीवालीत्युक्तामध्याह्नव्यापिनीकुहूर्ग्राह्या। द्वयोरपिमध्याह्नव्यापि
त्वेतिथिसाम्येइच्छयान्यतमातिथिर्ग्राह्या। यद्वासाग्निकैःसिनीवालीनिरग्निकैःस्त्रीशू
द्रैश्चकुहूः। यद्वासर्वैःकुहूर्ग्राह्या। दर्शपूर्णमासयोःश्राद्धतिथिषुवृद्धिह्रासस्वीकारोना
न्यत्रास्मृताहेनापराह्णव्यापित्वेन्येवतिथिर्ग्राह्या। अपराह्णःपितॄणांस्वयंभुवादत्तः। नास्तम
यात्रिमुहूर्तव्यापिन्येव। तिथिवृद्धौपरेवग्राह्या। तिथिसाम्येपूर्वापरावा। तिथिक्षयेत्वस्त
मयात्रिमुहूर्तव्यापिन्येवग्राह्या। अपरदिनेश्राद्धकरणासंभवेसूतकादिविघ्नसंभवेन
पूर्वैवास्तमयव्यापिनीग्राह्या। केचित्सदापूर्वविद्धाग्राह्येत्याहुः। तत्तुबहुस्मृतिन्यायवि
रोधेनच्छंति। पूर्वदिनेश्राद्धसंभवसूतकादिविघ्नसंभवेपरेवोदयव्यापिनीप्रयोगपर्याप्तिका
कातिथिर्ग्राह्या। तत्रापिस्मृताहश्राद्धस्यद्रव्यसंभवेनान्येनविघ्नेनवानुपपत्तौउपपत्स्यनं

स्मृत्य·सा· तरंकार्यं।सूतकादिविघ्नेशुद्ध्यनंतरंकार्यं।यद्वाकृष्णैकादश्याममावास्यायांकार्यं।यद्वानंत
रमासेतद्दिनेकार्यं।एकोद्दिष्टेसंप्राप्तेविघ्नेसत्यनंतरेमासितद्दिनेवाकार्यं।अनुपप
५२ त्तिनिमित्तविघ्नेसत्युपपत्त्यनंतरंसर्वाणिकार्याणि॥ प्रोषितमरणेमृताहाज्ञानेमृत
मासपरिज्ञानेसतितन्मासदर्शोग्राह्यः।मृतमासाज्ञानेमृताहपरिज्ञानेसतिमार्गशी
र्षेभाद्रपदेमाघेवामासितद्दिनेकार्यं।मरणमासदिने।नविज्ञातोचेत्प्रस्थानप्रवासदिन
मासौपूर्ववद्ग्राह्यौ।प्रस्थानप्रवासदिनमासौनविज्ञातौतन्मरणवार्ताश्रवणदिनमा
सौपूर्ववद्ग्राह्यौ।मरणवार्ताश्रवणदिनमासौनविज्ञातौचेत्पुनर्दहनदिनमासौपूर्ववद्ग्रा
ह्यौ।यद्वासर्वत्रापिकृष्णपक्षस्यमरणेदर्शोग्राह्यः।शुक्लपक्षस्यमरणेपौर्णमासः।सर्वा
त्मनामृताहाज्ञानेमाघमासदर्शोग्राह्यः।अप्रोषितस्यापिसर्वात्मनामरणदिनमा ५२
साज्ञानेएवमेवग्राह्यौ॥ ॥युगादिमन्वादितिथिविहितेविशेषश्राद्धेषुतुशुक्लपक्षे

उदयव्यापिनीतिथिः।नक्षत्रदिनंनग्राह्यं।कृष्णपक्षेस्तमयव्यापिनीग्राह्या।शुक्लपक्षस्यपूर्वा
ह्णेकरणंप्रसिद्धं।कृष्णपक्षस्यापराह्णेकरणंप्रसिद्धंप्रशस्तं।नक्षत्रविहितश्राद्धेष्वपिशु
क्लेप॰उदयव्यापिनक्षत्रदिनंग्राह्यं।कृष्णपक्षेस्तमयव्यापिनक्षत्रंग्राह्यं। अथसंक्रां
तिनिर्णयः संक्रांतिषुसर्वत्रोभयतःषोडशघटिकाःपुण्याः।अष्टाष्टघटिकासुहृ
ष्टफलेमष्टफलमुच्यते।तत्रकर्कटकसंक्रांतौसंक्रमेदक्षिणायनमुच्यते।तत्रपूर्वत्रिं
शद्घटिकाःस्नानदानश्राद्धादिषुपुण्याः।तथाविष्णुपदेषुपूर्वषोडशघटिकाःपुण्याः
वृषभवृश्चिककुंभसिंहसंक्रमाःविष्णुपदाः।तुलामेषौविषुवसंज्ञौतत्रपूर्वपश्चाद्दशमु
खाः।मकरसंक्रमउत्तरायणं।उत्तरायणेपश्चाच्चतुर्विंशतिघटिकाःपुण्याः।एवंचत्वा
रिंशद्घटिकाःपुण्याःप्राकृः।अर्धरात्रात्प्रागर्वाक्संक्रमणेसतिपूर्वदिनंपुण्यं।तत्रभो
गःकार्यः।अर्द्धरात्रादूर्ध्वंसंक्रमणेपरदिनंपुण्यंतत्रभोगःकार्यः।अर्द्धरात्रौसंक्रम

स्मृत्य॰सा॰ त्रेषु दिनद्वयं महापुण्यं तत्र भोगः कार्यः॥ यदा ग्रहणसंक्रांतिवा वाहो क्रांतिवृद्धिषु रात्रावपि स्ना
५३ नदानादिकं कार्यं। व्यतीपातादियोगः कुतपादिकालयोगी ग्राह्यः॥ विष्ण्वादिकरणोक्त
मेव। इतिस्मृत्यर्थसारे श्राद्धकालनिर्णयः॥ अथ पर्वनिर्णय उच्यते। पर्वणि सं
पूर्णे अन्वाधानं प्रतिपदि यागः॥ खंडपर्वणि विशेष उच्यते। पौर्णमासी न्यूनचंद्रा अनुम
तिः पूर्णचंद्रा राकेति द्विधा॥ अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विविधा
प्रधानकर्मतिथिरुत्तरतिथिवृद्धिक्षयोरर्धं पूर्वतिथौ प्रक्षिप्य कालो विज्ञेयः॥ सूर्यस्या
वर्त्तनात्पूर्वं आवर्त्तने वा पर्वप्रतिपत्संधौ सति तस्मिन्नहनि यागः॥ आवर्त्तनादूर्ध्वं संधौ
परेहनि यागः॥ पर्वणो यश्चतुर्थोंशः प्रतिपद आद्यास्त्रयोंशाः यागकालः॥ प्रातः
कालोपयोगी। अपराह्णे संधौ सति परेहनि प्रतिपच्चतुर्थांशः यागकालः॥ न पूर्वाह्णे सं ५३
धौ अत्राह्नो द्विधाविभागः पूर्वोक्त एव द्वयेः समानं। पौर्णमास्या विशेषो वक्ष्यते। आव

र्त्तनात्पूर्वं संधौ सति सद्यस्कालो न वा आवर्त्तनात्पूर्वं संगवादूर्ध्वं पर्वसंधौ तु सद्यस्काल एव।
सर्वं पौर्णमासीयजनीयदिने पर्वणि वा सद्यस्कालं केचिदाहुः॥ प्रकृतौ सद्यस्कालत्वं
कदाचिदपि नास्ति। विकृतावेव तदिति केचित्। किंच पौर्णमास्यायं विशेषः॥ अहस्त्व
स्यं तदीर्घं च तिथिक्षये सति उदयसमीपे पर्वांशे चतुर्थांशाभावेऽपि पूर्वाह्णे पर्वसंधि
श्चेत्संभवति। तत्रैव पूर्वाह्णे संधिदिने यागबाधो नान्यत्र तत्र परेहनि यागः॥ अमावा
स्यायां तु अपराह्णादिपर्वसंधौ सति परेहनि दृष्टचंद्रे सति पि यागः कार्यः॥ पूर्वाह्णे
संधौ सति प्रत्यक्षचंद्रदर्शनाद्धेयागे भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा॥ विप्राय दंड
दानं प्रायश्चित्तं। प्राच्यां चंद्रदृष्टो तद्दहर्यागे तैत्तिरीयोक्ताभ्युदितेष्टिः मनःस्वत्या
ज्याहुतिर्वा व्याहृत्याज्याहुतिर्वा। प्रतीच्यां चंद्रदृष्टो अन्वाधाने सति परेहनीष्टिं स
माप्यान्यत्र हविषेष्टिः कार्या। तत्राग्निः पथिकृदष्टाकपाल॥ इंद्रो वृत्रहा एकादश

कपालः॥ अग्निर्वैश्वानरोष्टाकपालः। सश्वेतं धेनुर्दक्षिणा। एषा वाजसनेयोक्ता। प्रकृति
५४ रेववापुनःकार्या। मनस्वत्याज्याहुतिर्वाव्याहृतिर्वा दिनद्वये प्रातर्यागकाले सत्यपि पूर्वाह्णे संधि
दिनएव प्रातर्यागः। सर्वथा संधिरेयागो लर्षापकर्षप्रयोजको न्यतिथिवृद्धिक्षयौ प्रयोजको
सप्तदशीतिथिरन्वाधाने निषिध्यते। नयागे प्रारब्धप्रकृतीष्टि विकृतीष्टयः स्युः सद्यस्काले॥ आ
वर्तनात्पूर्वसंधौ प्रकृतिं समाप्य विकृतिः कार्या। ऊर्ध्वसंधौ विकृतिं समाप्य प्रकृतेः प्रारंभः॥
आग्रयणं पर्वणि कार्यं कृत्तिकादिविशाखांते। प्राच्यां चंद्रदर्शने पिंडपितृ
यज्ञस्य कालः॥ इति पर्वनिर्णयः ॥ अथैकादशीनिर्णयः॥ एकादशीमुपवासः कार्यः॥ सव
पुत्रवतां गृहीणां शुक्लैकादश्यामेवोपवासः। नकृष्णैकादश्यां। कृष्णैकादश्यामनशनमयां
चितं नक्तमेकभक्तं दानं वा शक्त्या कार्यं। सर्वथा न निद्वादशिको भवेत्। उपवासाशक्तश्चैवं कु
र्यात्। पुत्ररहितानां गृहीणां यतीवानप्रस्थब्रह्मचारीस्नातकविधवानामुभयैकादश्योर्नित्य ५४

मेव। यइच्छेद्विष्णुसायुज्यं श्रियमायुः प्रजां सुखं एकादश्यां न भुंजीत पक्षयोरुभयोरपि। इतिवै
ष्णवव्रते नोपवासस्तां कृष्णनिषिद्धा। एकादश्यां श्राद्धे कृते श्राद्धशेषमवघ्राय उपवसेत्। आदि
त्यवारसंक्रांत्यादिषु एकादश्युपवासस्य निषेधो नास्ति। मपत्नेमहो स्वेषु अशक्तौ नन्तत्या
ज्यं द्वादशीव्रतं। तत्र नित्ये तु स्नात्वा देवार्चनरहितोपवासं कुर्यात्। काम्ये तु स्नात्वा पत्नीपतिं
पुत्रं भ्रातरं भगिनीमृत्विजमन्यं वार्चनादि कारयेत्। सूतकांतर्वांते दानं वा कुर्यात्। सप
त्न्योपि परस्परं कुर्युः। नान्यथा। अन्यव्रतेषु नैवं। एकादश्यां पूर्वोत्तरदिनयोरेकभक्तं। काम्यं
मांसं मसूरमतिप्रतमस्तुं सपुनर्भोजनमैथुनं च पूर्वेद्युर्विवर्जयेत्। अथ समाहितः एकाद
श्यां प्रातः स्नात्वा संकल्पं कुर्यात्। पुण्यस्त्रीणां तु पुण्यालंकारवस्त्राणि गंधधूपदीपानु
लेपनं। उपवासेन दुष्यंति दंतधावनमंजनं। वाग्यमलोपे वैष्णवमंत्रान् जपेत्। विष्णुं स्मरे
द्वा। मनोवाक्कायमलोपे शारीरमंतइत्यादि जपेत्। विष्णुं भुक्तः संपूज्य पुरतो जागरणं नि

स्मृत्य॰ सा॰ द्वींवा कुर्यात्। भ्योभूते पुनः संपूज्य। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ
५५ ज्ञानदृष्टिप्रदो भवेति नत्वा पारणं कुर्यात्। कांस्यं मांसं क्षौद्रं। लोभमसत्यं वतिलपिष्टं व्याया
मं अंजनं पुनर्भोजनं। अध्वगमनमायासदिवानिद्रामैथुनं च वर्जयेत्। उपवासफलं शक्तिं
वहन्तु॥ यदा एकादशी शुद्धा संपूर्णा द्वादश्यां नास्ति। द्वादशी तिथिः समा न्यूना वा अ
धिका वा तदा एकादश्यामुपवासः। यदा संपूर्णैकादशी द्वादश्यां च किंचिन्मात्रा
स्ति द्वादशी च त्रयोदश्यामस्ति वा न वा तदा सर्वैर्द्वितीये तदा द्वितीये च सर्वैरुपोष्या। य
दा दशमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रा विद्यते। द्वादशी च त्रयोदश्यामस्ति वा न वा
तदा सर्वैर्द्वितीये वोपोष्या। यदा दशमीविद्धैकादशी द्वादश्यां च किंचिन्मात्रा रात्रिशे
षे त्रयोदशी तदा दिनक्षयेऽपि पुण्या द्वितीये वोपोष्या यतिभिर्न्निरग्रहस्थैः। पुत्रार्थिभिश्च ५५
। गृहस्थैस्तु पूर्वैर्वोपोष्या। यदा च दशमीविद्धा एकादशी द्वादश्यां च नास्ति द्वादशी त्र

योदश्यामस्ति। तदा द्वादश्यामेवोपोष्या। यदा च दशमीविद्धा एकादशी द्वादशी समा न्यूना वा तदा यतिव्यतिरि
क्तानां दशमीविद्धैकादश्यामुपवासः। यतीनां तु शुद्धद्वादश्यामुपवासः। यदा च दशमीविद्धैकादशी
रात्रिशेषे तु द्वादशी च त्रयोदश्यां वास्ति समा न्यूना वा तदा सर्वेषां दशमीविद्धैकादश्यामुपवासः। इदमे
कादशीव्रतं माहेश्वरमपि भवति। लिंगादिपुराणदृष्टं। अष्टमीचतुर्दश्योश्च नक्तं च कार्यं। एकभक्तं वा।
तत्पुरुषमंत्रेण संकल्प्य पारणं नाम्ना वा तदेकादश्या व्रतं माहेश्वरात्। सौरमपि भवति। सौरपुराणात्
व्रतितं तु सर्वं समानमेव। तत्रायं विशेषः षष्ठ्यामुपवासश्च कार्यः। आदित्यवारे एकभक्तं वा कार्य
। सावित्र्या वा नाम्ना वा॥ इत्येकादशीनिर्णयः॥ ॥ अथ तिथ्यंतरनिर्णय उच्यते। एकादश्य
ष्टमीषष्ठीपौर्णमासीचतुर्दशी। अमावास्या तृतीया च उपवासव्रतादिषु। परविद्धाः पुण्याः। शेषाः
पूर्वविद्धाः कार्याः। कृष्णपक्षेऽष्टमी चतुर्दशी पूर्वविद्धा प्रशस्ता। तृतीया नवमी त्येके। सर्वत्र व्रतदाना
दीनां कृष्णपक्षाच्छुक्लपक्षो विशिष्यते। अपराह्णाच्च पूर्वाह्णो विशिष्यते। तदसंभवे उदयाद्धिमुहूर्त
ग्राह्यं। उपवासे घटिकोकापि ग्राह्या। अज्ञानामलाभे तु पयो दधि घृतानि तु। सकृदेवाल्पमश्नी
यादुपवासस्ततो भवेत्। एकादशी तु पंचमुहूर्तविद्धा। पूर्वोपोष्ये वा तदर्द्धविद्धान्यन्यानि त्रिदिनानि न

स्मृत्य·सा· क्षत्रविहितव्रते अर्द्धरात्रादर्वाक्नक्षत्रव्यापिनी तिथिर्ग्राह्या। तिथिनक्षत्रसंयोगविहितव्रते प्र
दोषव्यापिनी तिथिर्ग्राह्या। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। उपवासस्थानीयनक्तं
५६ नक्ते तु उपवासतिथौ कार्यं। नक्षत्रसंयोगेन या तिथिः पुण्या तस्यां विहिते उपवासादिव्रते से
व तिथिर्ग्राह्या। श्रवणद्वादशीव्रते उदयव्यापिनी श्रवणद्वादशी ग्राह्या॥ ॥अथ एकाद
शीद्वादशी च रात्रिशेषे त्रयोदशी। द्वादश द्वादशीर्हंति त्रयोदश्यां तु पारणं। सर्वत्र तिथिन
क्षत्रांते पारणं। नियमाः पूर्वमेवोक्ताः॥ संक्रांत्यां रविवारे ग्रहणे व्यतीपाते कृष्णैकादश्यां
पारणं चोपवासं च न कुर्यात्। पुत्रवान् गृही इति तिथिसंक्रांत्यादि प्रयुक्तस्यायं निषेधो ना
न्यत्र प्रयुक्तस्य॥ ॥इति तिथिनिर्णयः समाप्तः॥ ॥अथ मळमासे कार्याकार्यनि
र्णय उच्यते। सूर्यसंक्रांतिरहितो मासो मळमासः॥ तत्र मळमासे अनन्यगतिकं कर्मा
करणे पातित्यापादकं च नित्यं नैमित्तिकं कर्म कर्तव्यं। तत्र नित्यं स्नानसंध्योपासनाग्नि
कार्यं पंचमहायज्ञा तिथिपक्षाग्निहोत्रोपासनदर्शपौर्णमासपार्वणेष्टिपार्वणस्थाली ५६
पाकपिंडपितृयज्ञामावास्यापार्वणश्राद्धमासिकश्राद्धदेवतार्चननित्यदानादिकं

नित्यं मलमासेपि कार्यं। अनन्यगतिकं नित्यं। अन्यगतिकं सोमयागपशुबंधनाग्रयणचा
तुर्मास्यादिकं मळमासे न कार्यं। महालयाष्टकाकर्मोपाकर्मोत्सर्जनश्रवणाकर्माश्वयुजी
प्रत्यवरोहणमेष्येयज्ञादिकं यत्कर्म ऋतुमासप्रयुक्त्या विहितं तन्मळमासे न कार्यं। उत्तरे
मासे कार्यमेव। नैमित्तिकं च गर्भनिमित्तगर्भमासप्रयुक्त्या विहितं पुंसवनानवलोभन
सीमंतजातकर्मादिकं तन्निमित्ताभ्युदयिकं दानादिकं चंद्रसूर्यग्रहणे स्नानतर्पणश्राद्धादि
कं त्रयोदशीश्राद्धं च तीर्थस्नानानि जपतर्पणश्राद्धपिंडदानानि यवव्रीहितिलहोममरण
काळशक्त्यादिकं दहनोदकपिंडदानाद्यं नवश्राद्धं षोडशश्राद्धादिकं प्रेतत्वविमोकाद्या
न्यन्यान्यपि सपिंडीकरणादीनि नैमित्तिकान्यनन्यगतिकत्वेन मळमासे प्राप्तिकार्या
णि। नूतनः संवत्सरविमोकांतरमनुमासिकानि कुर्वन्। मळमासे नैव कुर्यात्। उत्तरे मासे
कुर्यादेव। संवत्सरांते सपिंडीकरणं संवत्सरविमोकं च यथाकालं मासिकानि कुर्वन्नपि
मळमासे नैव कुर्यात्। इतरत्र कुर्यादेव। मळमासमृतानां माद्विकं प्रत्याब्दिकं च श्राद्धं म
ळमासे न कार्यं मन्येषामुत्तरमास एव कार्यं। वार्द्धुषिके मृत्ये वार्धिमासं न वर्जयेत्। गर्भे वा

दुर्भिक्षे प्रेते नित्ये भृत्येनुमासिके। आब्दिके च तथा श्राद्धे नाधिमासं विवर्जयेत्। तत्र वषट्कार
होमा नित्याः नैमित्तिकप्रवृत्तकाम्यार्थाः। प्रायश्चित्ते स्थिरस्थालीपाकहोमाद्याश्च मलमासेपि
कार्याः। नैमित्तिक्यपि जातेष्टिर्मलमासे न कार्या। उत्तरे पर्वणि कार्या।। आधानानंतरमन्वा
रंभणीयेष्टिं स्थालीपाकं मलमासे न कुर्यात्। काम्यं यागदानादिकं मलमासेपि न कार्यं। मल
मासात्प्राक्प्रावृत्तं कर्म ×× काम्यं मलमासे आगते कार्यं। पुराणधान्याभावेन निर्वाहाभावे मल
मासेपि श्यामाकैराग्रयणमातुरः कृत्वा नवंसुत्को यथाकालं व्रीह्याग्रयणं कुर्यात्। वसंतप
र्वणः प्रागेव सोमयागो न कृतश्चेदुच्छिष्टपर्वैकमेव। तत्र मलदूषितं चेत्तत्र नित्योपि सोमयागो न
कार्यः। तत्र लोप एव। पत्नीरजोदर्शनवत्।। ।।इति मलमासे कार्याकार्यनिर्णयः।। ।।अ
थ भक्ष्याभक्ष्यविधिरुच्यते।। संस्कारदुष्टं क्रियादुष्टं स्वभावदुष्टं च नाद्यात्। संस्कारदुष्टं वै
श्वदेवादिरहितं। क्रियादुष्टमेकपङ्क्तावन्यथालं। स्वभावदुष्टं लसुनादि। कलिंगवार्ताकं कु ५७
म्भीकवृन्तालाबुवन्यकंटककुसुंभरक्तशिग्रुकोविदारश्लेष्मातकनालिकाक्षुद्रश्वेतकंटकिवृं
ताकानि दुर्गंधिबकुकंदमूलफलादि सर्ववर्ज्यं। यतिव्रतिनोः सर्वदा अलाबुशिग्रुवृंताकानि जा

तिमात्रवर्ज्यानि। अन्येषां शिष्टानि वर्ज्यानि। यथा वर्ज्यानि। शिरःकपालमां चर्माणि नखचर्मशि
ल्पानि च। यदि च्छेदूर्ध्वगमनमष्टम्यादिषु वर्जयेत्। स्वगोत्रभर्तृरत्नं कारुकान्नं वस्त्रेण पा
णिना वधूतमवघ्रातमवक्षुतं तस्या दिप्रायश्चित्तविधौ विभज्य वक्ष्यते।। ।।इति भक्ष्याभ
क्ष्यविधिः।। ।।अथ भोजनविधिः।। कृतसंकल्पः पादौ प्रक्षाल्य बहिर्द्विराचम्य प्रा
ङ्मुख उदङ्मुखो वा यज्ञोपवीती सोत्तरवासा विभवे रत्नहिरण्यपाणिर्गंधाक्षतमाल्यवा
न्। शुचिप्रशस्तश्रीपर्ण्यादिश्लक्ष्णचतुष्पात्पीठे सुखासीनो भूमौ पादौ प्रतिष्ठाप्यांत
र्जानुकरो वाग्यतः शुचिचतुरस्रगोमयमंडले सपर्यंते विप्रो दीपसन्निधौ भुंजीत। त्रि
कोणमंडले नृपः। वर्तुले वैश्यः। अभ्युक्षिते शूद्रो भुंजीत। तत्र मंडले पाणिकायंत्रिकादौ
शुद्धपात्रं निधाय प्रक्षाल्य पंचयज्ञावशिष्टं पूर्वसंस्कृतं हितं मितं प्रतादृक् परस्कृत्य मातृ
भार्यादिदत्तमतिथ्यभ्यागतभृत्यपुत्रादिपरिवृत एकांते भुंक्त। तदन्नमकुत्सयन्सतंत्वे
र्वेनेति प्रदक्षिणं परिषिच्य अमृतोपस्तरणमसीत्यपोशानं गृहीत्वा सर्वांगुलिभिः

 सर्वग्रासंग्रसन्तर्जनीमध्यमांगुष्ठैः प्राणायाहुतिं। मध्यमानामिकांगुष्ठैरपानेन। अनामि
काकनिष्ठांगुष्ठैर्व्यानस्याहुतिं। कनिष्ठिकातर्जन्यंगुष्ठैरुदानेन। समानेसर्वांगुलिभिरा
 हुतिःस्यात्। स्वाहांतंप्रणवादिच। पंचाहुतीःसघृताःसक्षीरावाहुत्वावाक्पाणिपादचापल्यंवर्ज
येत्। कृत्स्नग्रासंसांगुष्ठंग्रासयन्भुक्त्वा अमृतापिधानमसीतिगंडूषमर्धंपीत्वा अर्धंभूमौबहिः
पालिनिनीयपवित्रंविस्रस्यभस्मौपात्रेवाक्षिप्त्वासम्यगुच्छिष्टंप्रक्षाल्यद्विराचमेत्। ततोहस्तौ
सम्मृज्यपरिस्राव्यंगुष्ठेनाविमुषोनिषिच्याक्षिणीस्पृष्ट्वाग्निमुपस्पृश्येष्टदेवतांस्मरेत्। भोज
नगृहेवासनस्थोनाचामेत्। नांजलिनापिबेन्नपित्ततीर्थेनगोमयंमन्मयंवाश्वत्थपालाश
मर्कंधूतकंभिन्नकसयोबद्धंपीठंचवर्जयेत्। ताम्ररौप्यसौवर्णाश्मवर्ज्यं। भिन्नभाजनंव
र्जयेत्। नमुष्कपाणिपादोभुंजीत। तिष्ठन्नाछन्नाद्भुयन्नशयानोनशयने। नखट्वायांन
शय्यायांनशयनस्नानार्थदिस्थानस्थो नतत्रभाजनंनिधायनजानुनिनोत्संगेवावा
मपाणितलेनिधायनभुंजीत। नपश्यतामप्रदायग्रामीजडबालवृद्धातुरेभ्योऽप्रदा

यनाग्निविप्रेभ्योऽप्रदायनभार्ययासहाश्नीयात्। विवाहवर्ज्यं। नार्द्रवस्त्रोनवस्त्राद्विपर्यंकिकांकृ
त्वानप्रौढपादोनविदिङ्मुखोनदुष्टपंक्तौनशिशुभिःसहभुंजीत। जलतृणाग्निभस्म
पथिस्तंभैःपंक्तिर्विभिद्यते। ग्रहणेनाश्नीयात्। तदास्नानेतर्पणेश्राद्धदानादिकंकृत्वा
मोक्षस्नानंकृत्वाश्नीयात्। सूर्यग्रहणेपूर्वंचतुर्यामंनाद्यात्। चंद्रग्रहणेत्रियामं। अमुक्तयो
रस्तंगयोर्दृष्ट्वास्नात्वापरेह्यद्यात्। रनसंध्येयोर्नार्धरात्रेनाग्निपाकशून्यगृहेनायज्ञोपवीती
नवामतःमहस्तेनशाखेनतनपाणिपृष्ठेननकेवलकपायिपृष्ठेतलेननैवस्त्रेभुंजीत। ना
न्यसहासनोनपंक्तिकादौपतिव्रतिब्रह्मचारीविधवाभुंजीरन्। इत्यादिसर्वंविज्ञेयं।
॥इतिभोजनविधिः॥ अथकाकेसायंसंध्यामुपास्यहोमंवैश्वदेवमतिथ्यार्चनंनकृत्वाभ्य
स्तैःपरिवृतोलघुभुक्त्वास्वपेत्। स्त्रियासहसुगंधानुलेपनमाल्यतांबूलादिसेवमानः
स्वपेत्। नसंध्यायांशून्यालयेश्मशानेएकवृक्षेचतुष्पथेशिवमातृकायक्षनागस्कंद
भैरवादिकग्रदेवगृहेषुवृकूलेवनस्वपेत्। धान्यगोदेवविप्राग्निगुरूणांचोपरिभग्नखट्वेशु
राद्रवस्त्रेपादोनग्नोनस्वपेत्। प्राक्शिरादक्षिणाशिरावाइष्टदेवतांनत्वास्मरन्वैष्णवंदंड

स्मृत्य॰सा॰ शयनसमीपे निधाय स्वपेत्। प्रक्षालितः पादः कृतरक्षश्च प्रदोषापरयामौ विधयानयेत्॥ ॥
॥ इति स्मृत्यर्थसारे आह्निकं॥ अथ द्रव्यशुद्धिरुच्यते॥ तत्र विण्मूत्रशुक्लरक्तवसाम
५९ ज्जास्थिरामधान्यसंतोपहतिकारणानि विड्वराहविडालादिपुरीषादीनि कर्णविण्नखश्लेष्
माश्रुदूषिकास्वेदानीनि अल्पोपहतिकारणानि। तथा उच्छिष्टशूद्रेण सूतिकीभिर्द्विजै
रस्पृश्याकाकादिभिश्च अस्पृश्यश्च विड्वराहादिभिश्च पशुभिः स्पर्शनमल्पोपहतिरुच्य
ते। तथाल्पप्रदेशेऽल्पकाले मूत्रोच्छिष्टासृगादिस्पर्शने चाल्पोपहतिः। पंचमाद्यंत्यजाति
पंचपंचंडालाद्यैः सूतिकागारजस्वलायाः पतिताद्यैश्च शठेन शावस्पृशा च संस्पर्शे अत्यं
तोपहतिर्भवति। अल्पकाले अल्पप्रदेशे मद्यसस्पर्शने उच्छिष्टरुधिराद्यैश्च बहुकाले व
स्त्रदोषे वात्यंतोपहतिर्भवति। सौवर्णराजतं लोहं विण्मूत्रादिचंडालादिस्पृष्टमात्रं निर्ले
पजलप्रक्षालनेन शुद्धिः। सलेपं भस्मजलाभ्यां शुध्येत्। अत्यंतोपहतं वह्नितप्तजल
प्रक्षालनाच्छुद्धिः स्यात्। सौवर्णराजतं ताम्रं चंडालोदक्याद्युच्छिष्टस्पृष्टं त्रिः सप्तभस्म ५९
भिराम्लोदकेन शुध्येत्। कांस्यादेरावर्तनं। बहूपघाते सर्वेषामावर्तनमेव। तैजसानां गो

मूत्रपरिवासेन लेपानपगमेन आवर्तनं ताम्रस्य विण्मूत्रादिचंडालादिदूषितस्याम्लोदकाभ्यां
शुद्धिः। कांस्यपित्तलयोर्विण्मूत्रादिगंडूषप्रक्षालनचंडालादिस्पर्शे तैर्देवत्रिः सप्तकृत्वाभ
स्मनापरिमार्ज्य प्रक्षालनाच्छुद्धिः। अल्पकालोपहतौ तापनपरिलेखनाभ्यां शुद्धिः। बहु
कालोपहतौ आवर्तनं। यद्वा भूमौ निखाय षण्मासे परिमार्जनमेव। तत्तद्दोषमल्पे स्यात्
एवं सर्वतैजसानामावर्तनं। पुनःकरणं परिलेखनतक्षणं। कांस्यपित्तलयोर्गोघ्रकाकोच्छि
ष्टशूद्रस्पर्शे दशभस्मभिः प्रक्षालनं। अल्पकालोपहतौ भस्मसलवणातैलाम्लघर्षणैः
शुद्धिः। बहुकाले त्वावर्तनं। त्रपुसीसायसानां भस्मजलाभ्यां शुद्धिः। सर्वतैजसे स्वल्पो
पहतौ गोमूत्रमृद्भस्माम्लोदकैः शुद्धिर्यथार्हं कार्या। शुक्तिपाषाणशंखमणिरत्नानां अ
ब्जानां विण्मूत्रादिचंडालाद्युच्छिष्टस्पर्शनमात्रे जलप्रक्षालनाच्छुद्धिः। सौवर्णराजतता
म्रशंखशुक्त्यश्मस्फटिकादिरत्नेषु भेदेन दोषः। सलेपानां भस्मजलाभ्यां मृज्जलाभ्यां
वा शुद्धिः। अत्यंतोपहतानां सप्ताहं भूमौ निखाय प्रक्षालनाच्छुद्धिः। शृंगदंतास्थिमया

नां अल्पोपहतौ बिल्वपलाशफलचूर्णैर्गौरसर्षपैर्भस्मगोमूत्रगोमयानां अन्यतरेण वा प्र
क्षालना शुद्धिः। अल्पोपहतौ तक्षणं। अमेध्यस्रवे धेल्कपहतौ त्यागः। दारुवेणुवेत्रपात्राणां अ
६० ल्पोपहतौ तक्षणं। अतिदुष्टानां त्यागः। कपित्थबिल्वागलाबुनारिकेलफलकानां तत्कृत
पात्राणां अव्रणानां चाल्पोपहतौ प्रक्षाल्य गोपुच्छनिघर्षणाच्छुद्धिः। अल्पोपहतौ त्यागः। शृं
गास्थिदंतपात्राणां मृद्वानां वरत्नानां च दुर्लभानां अल्पोपहतानां तक्षणप्रक्षालनाच्छुद्धिः।
मृन्मयानां पात्राणां ईषद्दुष्टानां पुनर्दहनाच्छुद्धिः। विण्मूत्राद्युपहतानां शवसूतिकोदक्यादिस्प
ष्टानां त्याग एव। महाभाजनभांडेषु बाह्यदोषे आंतरं न दुष्यति॥ तत्र बाह्यं प्रक्षाल्यं॥ ॥
स्रुक्स्रुवादियज्ञदारुपात्राणां जलप्रक्षालनाच्छुद्धिः। सस्नेहानां यज्ञियानां उष्णजलप्रक्षा
लनाच्छुद्धिः। सर्वपात्राणां संहतानामेकस्योपहतौ तस्यैव शुद्धिः कार्या। न तत्स्पृष्टानां। कं ६०
दमूलफलशाकादीनां अपक्वानां वेणुवेत्रवस्त्रकाष्ठानां वाऽशुचिस्पृष्टानां जलप्रक्षालनाच्छु
द्धिः। वस्त्राणामेकपुरुषधार्यभाराधिकानां स्थूलानां बद्धानामन्येषां बहूनां वंडाळादि

स्पृष्टानां महतां क्रीतानां महता मूल्येन क्रीतानां प्रोक्षणाच्छुद्धिः। श्वेतसूक्ष्मवस्त्रेष्वपण्येषु
अनूतनेषु विंशतौ बहुत्वं चित्रवस्त्रेष्वेकादशसु बहुत्वं। कुसुंभादिरंगरक्तेषु त्रिषु बहुत्वं।
पण्येषु नूतनेषु न। ततोल्पानामिति बहुत्वं स्मृत्यासूचिते ऽल्पतमे बहुत्वं। तदल्पानां प्रक्षालना
च्छुद्धिः। अधौतानां मलिनानां अल्पानां बहूनां वैदिके कार्ये नवानां च स्थिररंगिणां प्रक्षा
लनं। आविककंबलस्याल्पदोषे सूर्यरश्मिभिः शुद्धिः। विण्मूत्रादिदोषे वल्मीकमृत्तिकाप्र
क्षालनाच्छुद्धिः। कौशेयवस्त्रेऽल्पदोषे प्रोक्षणाच्छुद्धिः। विण्मूत्राद्युपहतस्य तु मृज्जलप्रक्षा
लनाच्छुद्धिः। क्षौमवस्त्रस्याल्पदोषे प्रोक्षणाच्छुद्धिः। विण्मूत्राद्युपहतौ बिल्वचूर्णप्रविघर्ष
णा गौरसर्षपजलप्रक्षालनाच्छुद्धिः। नीलीसंपृक्तं वस्त्रं स्वरूपेण वस्तुवेणैः स्त्याज्यं। कंबले
पट्टसूत्रे च नीलीदोषो न विद्यते। नेपालकंबले अल्पोपहते प्रोक्षणं। विण्मूत्रादिदोषे अरिष्ट
फलसंभवैः फेनैर्विघर्ष्य जलप्रक्षालनाच्छुद्धिः। तूलशय्योपधानानां कुसुंभाद्युपरंजि
तवस्त्राणां चाल्पोपहतौ आतपकिंचित्कौक्षणं। विण्मूत्रादिसंस्पृष्टौ संस्पृष्टांशं।

६१ ध्यसंशोषणाच्छुद्धिः।ऊर्णाकार्पासतूलकुसुंभकुंकुमकर्पूरादिनियासानांनन्वेवं।श्वेत
वस्त्रंवंडाकादिस्पृष्टंप्रक्षालनाच्छुद्धिः।तस्यपुरीषादिदोषेप्रक्षालनाच्छुद्धिः।शय
नासनयानसंबंधानांसंहतानांबहूरोमवस्त्राणांनप्रोक्षणाच्छुद्धिः।तैलवच्चर्मणांशु
द्धिः।नवानांतुजंबूवृक्षादितिक्तशुक्लकषायेणत्रिफलोदकेनवांगंधक्षयेशुद्धिः।चर्म
भांडेषुबहिर्दोषेआंतरंनदुष्यति।तत्रबाह्यंसम्यक्प्रक्षाल्यं।धान्येमेकपुरुषधार्या
भाराधिकंवावंडाकादिस्पृष्टंप्रोक्षणाच्छुद्ध्येत्।एकपुरुषभारोद्धारंप्रक्षालनाच्छु
द्ध्येत्।धान्यमशुद्धंमृत्तिकाफलतंडुलीकरणाच्छुद्ध्येत्।धान्यादिराशौमूत्रालिप्तेलिप्तां
समपसार्यशिष्टमभ्युक्षणाच्छुद्ध्येत्।धान्येगृहेस्थितेसतिगृहदाहेसतितत्रनरपशुमरणे
तद्धान्यंत्याज्यमेव।भूगर्भस्थंधान्यमभ्युक्षणाच्छुद्ध्येत्।मुद्गमाषादीनांशिंबिकाधान्या ६१
नामल्पोपहतौप्रोक्षणाच्छुद्धिः।धान्यमशुद्धंधूलीसंस्पृष्टंनिस्तुषीकरणाच्छुद्ध्येत्।अस्प
पहतौत्याज्यंवा।दृढधान्येषुपुरुषभाराधिकेषुबहुशिथिलेषुद्रोणप्रमाणेबहुत्वं।तंडु

लादिभक्ष्याणांतत्तदर्धेबहुत्वं।तस्यस्पर्शदोषेप्रक्षालनं।सर्वत्रविण्मूत्रादिदोषेतावन्मात्रंत्य
क्त्वा×दक्षो×शेषंप्रोक्ष्य।शिथिलंतंडुलादिसर्वत्रप्रोक्ष्यमेव।पुरुषाशेनान्न्यूनंत्याज्यमेव।मृ
त्त्रमेतृणकाष्ठादीनांनरभाराधिकमल्पोपहतौवातातपाच्छुद्ध्येत्।नरभारान्न्यूनमात्रंप्रक्षा
लनाच्छुद्ध्येत्।शुष्कंचेदत्यल्पमपिप्रोक्ष्यमेव।मूत्रादिभिरल्पोपहतौत्याज्यमेव।पुस्तकंचंडा
लादिस्पृष्टंप्रोक्षेत्।भूतलंकेशकीटलुषादिदोषैर्मलिनंमार्जनाच्छुद्ध्येत्।भूतलंश्वखरोष्ट्रविड्व
राहादिसेवितंगोक्रमणमार्जनाभ्युक्षणाच्छुद्ध्येत्।भूतलंविण्मूत्रादिरक्तंतोपहतंचेदुल्लेख
नगोनिवाससंमार्जनाभ्युक्षणाच्छुद्ध्येत्।भूतलंनारीप्रसवदूषितंचंडालादिनिवास
दूषितंचिरकालंविण्मूत्रादिदूषितंचिरकालंश्वखरोष्ट्रविड्वराहादिदूषितंतत्स्थानमृत्तिका
मुद्धृत्यान्यांमृत्तिकामापूर्यगवाक्रमणमार्जनप्रोक्षणैःशुद्ध्येत्।एतदेवमल्पंतोपहतंचेत्तत्र
त्वान्तृणाग्निनादग्ध्वान्यमृत्तिकापूरणागवाक्रमणमार्जनप्रोक्षणैःशुद्ध्येत्।गृहस्या

भुविलेकुर्य्यात्तांलिपनंभूमेः परिलेपनंमार्जनंतन्नकार्यं। मृतस्यनिरकालंविण्मूत्रादिवा
६२ सितस्यश्मशानत्वंगतस्यापिवृष्टिप्रक्षालनात्पश्चात्पूर्वोक्तविधिनाशुद्धिः। आरामक्षे
त्रेश्मशानत्वंगतेविण्मूत्राद्यैश्चिरकालमत्यंतदूषितेवृष्टेरूर्ध्वंहलाकर्षणाच्छुद्धिः। गृहे
विप्रक्षत्रियविशांमरणेतत्रस्थंमृन्मयंपूर्णभांडंपक्वमन्नंसंत्यजेत्। मृतदेशंगोमयेनो
पलिप्य अजाघ्रातेगवाक्रांतेब्राह्मणपुण्याहवाचनैर्वाकुशस्वर्णोदकैः प्रोक्षणाच्छुद्धिः।
गृहेचकचिद्राजनिगडबंधनान्मृतोभूमिंकुर्य्याच्चप्रोक्ष्यतृणाग्निनाताप्य। सूर्यरश्मिप्रचा
राद्वाप्रागुक्तविधिनाशुद्धिः। गृहेजननेमरणेवाजातेआशौचादूर्ध्वंमध्यभूमिमृत्तिकाप्र
क्षेपात्पुण्याहवाचनाच्छुद्धिः। विप्रगृहेशूद्रादिमरणेगृहस्यदशाहमाशौचं। असच्छूद्रमर
णेमाससमाशौचं। चंडालपतितादिमरणेचतुर्मासमाशौचं। रजकादिमरणेद्विमा ६२
समाशौचं। सर्वत्राशौचांतेअमेध्यभूमिवच्छुद्धिःकार्या। विप्रगृहेदग्धेश्वमार्जारादि

मृतेसतितद्गृहस्यकर्षणप्रोक्षणाशौचांतेअमेध्यप्रक्षणाच्छुद्धिः। श्वकाकादौस्पृष्टेनैवाकर्षणेविशेषः
प्रतिमालोहजाश्वल्पोपहतिदूषिताभस्मनावा र्षणात्पंचगव्येनशुध्यति। प्रतिमापाषा ६३
णजाल्पोपहतिदूषितावेदवल्मीकमृत्तिकाजलैःप्रक्षालितापंचगव्येनशुध्येत्। प्रति
माविण्मूत्रयोरस्यसेसादिनातिदूषिताचेत्पंचगव्येः पंचाहमधिवास्योत्साव्यगोमूत्रगो
मयवल्मीकमृत्तिकाभिः सम्यक्प्रक्षाल्यपुनःप्रतिष्ठयाशुध्येत्। रत्नजानांपंचगव्यैः
प्रक्षाल्यपुनःप्रक्षालनंकुर्यात्। जलंभूमिस्थंगंधवर्णरसान्वितंविण्मूत्रादिदूषितं
त्रिगवांपानसमर्थंशुद्धं। ततोल्पंश्वकाकाद्युपहतंएकगोपानसमर्थंतथैवशुद्धं।
जलंशुद्धभांडाहृतंतस्मिन्नेवदिनेशुद्धं। तनान्यदीनेनुस्नानंनकुर्यात्। बृहद्दुगा
तंनतुद्रोणाधिकंविण्मूत्रादिदूषितंजलंपरित्यज्यभांडंप्रक्षाल्यकुशासंघर्षणा
६३ त्पुनःप्रक्षाल्यपंचगव्येनप्रोक्ष्यपुनर्जलपूरणाच्छुध्येत्। वापीकूपतडागादि

६३ षुअल्पजलेषु श्वमार्जारादिशवे क्लिन्ने जीर्णे सति तज्जलं सर्वमुद्धृत्य मृत्तिकांतरितजले
प्रत्यक्षोद्धृतपंचगव्येन प्रोक्षणाच्छुद्ध्येत। पाषाणेष्टिकादिभिर्बद्धो वा तक्षणस्थाने द
हनं। दारुबद्धे प्रक्षालनमेव। बद्धकूले षष्टिकुंभोद्धारः। मूषिकादिक्षुद्रप्राणिघाते त्रिंश
त्कुंभोद्धारो गोमूत्रादिप्रक्षेपश्च। जले जलप्राणिशवेन दोषः। वापीकूपजलेषु शवेन रो
स्थिते घटशतं जलमुद्धृत्य पंचगव्यप्रक्षेपाच्छुद्धिः। पशुशवपाते षष्ट्या शुद्धिः। कूपा
दिजले अशुद्धरजसा तत्रजले नरमरणे तज्जलस्य त्रिरात्रमाशौचं। आशौचांते पूर्वोक्त
विधिः कार्यः। वापीकूपजले उपानत्श्लेष्माविण्मूत्ररक्तवसामज्जास्थिदूषिते षष्टि
कुंभोद्धाराच्छुद्धिः। जलबाहुल्ये शतकुंभोद्धारात्पंचगव्यप्रोक्षणाच्छुद्धिः। कूपादिजले
अशुद्धरजसा दूषिते दिवा सूर्यरश्मिवायुस्पर्शाच्छुद्धिः रात्रौ चंद्रवायुनक्षत्रचंद्ररश्मि ६३
स्पर्शाच्छुद्धिः। संध्यायां वायुस्पर्शाच्छुद्धिः। नदीस्रोतस्तडागजले अंत्यजैर्दूषिते त

त्खनीकृतजलस्थानादन्यत्र जलं शुद्धमेव। शतं पाणितलं मानं कुडवं प्रस्थमाढकं। द्रोणं
चरवारिका चेति पूर्वपूर्वं चतुर्गुणं। द्रोणप्रमाणनिर्मितधान्यान्ने वा घ्राते सति खरेण
वा शुना वा विड्वराहेण वा वायसकुक्कुटकाकैर्वा स्पृष्टे स्पृष्टमात्रमुद्धृत्य शेषमन्नं पर्य
ग्निकृत्वा सहस्रगायत्र्याभिमंत्रितैर्जलैः पवमानः सुवर्जन इत्यनुवाकेन सकृद
भिमंत्रितैर्वा। शुद्धवतीभिर्ऋग्भिर्वा शुचिलिंगैर्मंत्रैर्वा जलैरभ्युक्ष्य एतच्छुद्धमस्त्वि
ति पवित्रवचनं लब्ध्वा शुद्ध्येत्। अजामुखेन वा घ्रातं शुद्ध्येत्। तदन्ने काकादिलीलया
घर्षिते तावन्मात्रं समुद्धृत्य शेषं कनकवारिणा वाभ्युक्ष्याल्मुकेन स्पर्शयित्वा साज्यकु
रैः स्पृष्टं शुद्ध्येत्। अन्ने पूर्वोक्तविण्मूत्रखररोमादिदुष्टे च दुष्टमात्रमुद्धृत्य पूर्व
वन्मंत्रितोदकेनाभ्युक्ष्य भस्मक्षिप्त्वा घृतेनाभिघार्य शुद्धमस्त्विति विप्रवचनाच्छु
द्ध्येत्। घृतस्य नवनीतस्य वा आढकप्रमाणस्य श्वकाकपिपीलिकादिदुष्टस्य

दुष्टांशमुद्धृत्य वस्त्रेण परिशोध्य तज्जातीयेन तद्भांडं पूरयित्वा सर्वमग्नौ प्रताप्य गाय
६४ त्र्याभिमंत्रितजलाभ्युक्षणाच्छुद्धिः ॥ तत्र तैलक्षीरदध्नां द्रोणप्रमाणानां काकाद्युपह
तानां घृतवच्छुद्धिः ॥ तत्र दधिक्षीराणि शूद्रभांडस्थानि द्विजभांडप्रक्षेपे शुद्धानि ॥ नवनी
तं घृतं तैलं क्षौद्रं शौंडास्यादिभांडस्थं गृहीत्वा भांडे स्थितं शुद्ध्येत् ॥ नवनीतं घृतं तैलं क्षौ
द्रं वंशकादिभांडस्थं चेद्द्विजभांडस्थितं बहु शुद्ध्येत् । नवनीतं घृतं चंडालेन प्रमादेन स्पृ
ष्टं जलं प्रक्षिप्य घृतं शुद्ध्येत् ॥ द्रोणप्रमाणात् । न्यूनप्रमाणधान्यनिर्मितानामाढक
प्रमाणन्यूनघृतादीनां द्रोणन्यूनतक्रादीनां पूर्वोक्तोपहतौ परित्यागो नापदि । आ
पदि तु पूर्वोक्तविधिभिः शुद्धिः ॥ अतिक्षामे वस्तुः पुरुषाशनसमर्थव्यंजन ष्ठावने शु
द्धिः ॥ स्वल्पानां त्यागः । गुडलवणादीनां पर्यग्निकरणं । भोजने केशकीटादिदर्शने ६४
तावन्मात्रमुद्धृत्य जलं भस्म मर्दं वा क्षिप्त्वा शुद्ध्येत् । मुखे दृष्ट्वा निष्ठीव्य जलं प्राश्य नि

ष्ठीव्य घृतं प्राश्याश्नीयात् । पाके गव्ये शुनो मुखं प्रक्षालनवत् । पक्षिमुखं वा पादद्रव्यं
च सदा शुद्धमेव । बाल उपनयनादर्वाक् शुद्ध एव । स्त्री विवाहादर्वाक् शुद्धेव । यूकम
शकपतंगमक्षिका धान्यस्था धान्यकीटा गोहस्त्यश्व[illegible]या शुकाश्च जलस्थाः
सर्वे जीवाश्च स्वभावतः शुद्धाः ॥ अशुद्धसंस्पर्शेनैव न दुष्यति । चंद्रसूर्यरश्मयः
स्वतः शुद्धाः । सूतिकोदक्याभिः पतितांत्यजश्मशानसंश्रयं विनाग्निः स्वभाव
तः शुद्धः ॥ रजो वातोद्धृतं शुद्धं । हस्त्यश्वरथजातं च गवां प्राप्त रजश्च प्रशस्तं । श्व
विड्वराहखरोष्ट्राजाविकभेकोलूकग्राम्यपक्षिवत्स्वमार्जनीसमुद्धृतरजस्पर्शनं
दश्रीकरमनायुष्यकरमपुण्यं च । अज्ञातदोषं यद्द्रव्यं तत्स्वत एव शुद्धं । संदिग्ध
दोषं यद्द्रव्यं तद्द्विजवाक्यैः शुद्धं । शूर्पजातवायुस्पर्शमनायुष्यं च पुण्यं वा वस्त्रकेश
टोदकैर्नित्यं । पशुपक्षिधूलिवातस्पर्शनमनायुष्यमपुण्यं च

६५ त्यादिसर्वमम्त्रीकरंचामुखजाविप्रुषोमेध्याभःस्पृष्टानमबिंदवः॥ श्मश्रुचास्यगतं
शुष्कंदंतस्थमथवाल्पजेत्।विगिरेद्वामाचामेदनुष्णानेनवेत्तत्र।तांबूलेचस्थितेतस्य
कंनिगीर्णंचानुतिष्ठतः॥ नाकमेन्नलसजेदंत्यसूतिकादिप्रदर्शने।गोवत्सोप्टष्ठतो
मेध्या अमेध्यानरजामलाः॥ पंथानश्चविशुध्यंतिसोमसूर्यांशुमारुतैः॥ मार्गक
र्दमतोयानिस्पृष्टान्यंत्यश्ववायसैः॥ मारुतेनैवशुध्यंतिपक्वेष्टकचितानिवा॥ शुद्धा
श्वसंततताधाराः शुद्धमेववहज्जलं।वाक्शास्त्रमंबुनिर्णिक्तमज्ञातंचसदाशुचि॥
॥ ॥इतिद्रव्यशुद्धिप्रकरणं॥ ॥अथशारीरशुद्धिः॥ अमेध्याक्तस्यक्तेमृत्तोये
गंधलेपापनोदनात्शुद्धिः॥ चंडालंपतितंचैवदूरतःपरिवर्जयेत्।सूतिकोद
क्यावशात्यविषयेचद्वैधैव। असंकटस्थानेचंडालसूतिकोदक्यापतिता
नांचक्रमात्।चतुस्त्रिद्व्येकयुगांतरसंधानेसंधावेलंस्नानं।संकटेगोवा ६५

व्यंजनादर्वाक्तारतम्येनसंधानेसचैलंस्नानंकार्यं।श्वपाकादिच्छायारोहिणोतथैव।
चंडालसूतिकोदक्यापतितानांमत्यास्पर्शनेसचैलंस्नात्वाछिंगमंत्रंगायत्रीवाष्ट
शतंपादोनमर्धपादंचक्रमाज्जपेत्।अत्रवस्त्रांतरितसंस्पर्शःसाक्षात्स्पर्शएवमं
डालादिस्पृष्टस्पृष्टस्यतृतीयस्यसचैलंस्नानं।तदर्धंजपःसर्वत्र।मत्यास्पर्शनेचतु
र्थस्नानमात्रं।चंडालसूतिकोदक्यापतितानाममत्यास्पर्शनेसचैलंस्नात्वाचतुःप
चाशज्जपः।तत्पादोनमर्धपादंचक्रमात्कुर्यात्।अमत्याचंडालादिस्पृष्टस्पृष्टस्य
सचैलंस्नानंतदर्धजपः।सर्वत्रचतुर्थस्याचमनं।रजस्वलादिविषयेद्वितीया
दिदिनेस्नानपूर्वंपादपादोनंजपंप्राहुः॥ तत्स्पृष्टस्पृष्टादिषुस्नात्वातदर्धजपः।त्रि
चेतनेनदंडादिनाचंडालादिस्पर्शेस्नानमात्रं।तृतीयस्याचमनंद्रव्याणांप्रोक्षणं
।मत्याअंत्यजादिस्पर्शनेस्नात्वादशजपंकुर्यात्।मत्यातत्स्पर्शनेसचैलंस्नानं

।अमत्या रजकादिस्पर्शने सचैलं स्नानं। एवं तत्स्पृष्टस्पर्शने सचैलं स्नानमात्रमेव। तृ
६६ तीयस्य ज्योतिर्दर्शनं। मत्या पंचमजातिस्पर्शने सचैलं स्नानं। सवृद्धस्य स्पर्शने स्ना
नमात्रं। निषादस्य स्पर्शने स्नात्वाचमनं कार्यं। शवाशौचे प्रेतधूमे देवद्रव्योपजीवि
ग्रामयाजकसोमविक्रयियूपचितिचितिकाष्ठश्मशानान्त्यवमद्यभांडसस्नेहमानु
षास्थीनि स्पृष्ट्वा सचैलं स्नात्वा गायत्र्यष्टशतं जप्त्वा घृतं प्राश्य पुनः स्नात्वा त्रिराचा
मेत्। अस्नेहे स्नानमात्रं॥ अमत्या स्नानमेव। सर्वत्र स्त्रीणां जपहोमस्थाने अन्नपा
न्योदकुंभादिदानं कार्यं। वेदबाह्यशैवशाक्तेयपाशुपतलोकायतिकनास्तिकदे
वलकविकर्मस्थद्विजान्। आरूढपतितं विसृष्टाग्निमभिशस्तं षंढं शूद्रं शववा
हकं दाहकं शवं स्पृष्ट्वा सचैलं स्नायात्। अमत्या स्नानमात्रमेव। अजीर्णे सूतेऽ ६६
भ्युदिते स्तमिते रिक्ते दुःस्वप्ने दुर्जनस्पर्शे क्षुरकर्मणि भुक्त्वा मुहूर्तं व्युषित्वा छर्दि

तेवस्नानं। अनृतौ मैथुने न सम्यक्शौचाचमनं। ऋतौ मैथुने स्नानं। दिवा मैथुने ष
ष्ठ्यां चतुर्दश्यां पर्वणि मैथुने च सचैलं स्नानं। स्मृतिप्रायश्चित्तं कार्यं मूत्रपुरी
षादेशौचमकृत्वा यामद्वयादूर्ध्वकालस्थितो सचैलं स्नात्वा व्याहृतिहोमो ज
पोहोमे वा कार्यः। उदयास्तमययोरेतःस्कंदित्वा सचैलं स्नात्वा पुनर्मन इति जपि
त्वा सप्तव्याहृतिभिराज्याहुतिं जुहुयात्। जपे द्वा। अमत्या सचैलं स्नानमेव।
अक्षिस्यंदने कर्णाक्रोशे सचैलं स्नानं। श्वजंबुकगर्दभादिक्रव्यादखरोष्ट्रविड्व
राहमेषवानरस्पर्शने नाभेरूर्ध्वं करोमुक्त्वा सचैलं स्नानं। नाभेरधः स्पर्शे स्नानमा
त्रं। रात्रौ चेन्नाभेरूर्ध्वं स्नानमात्रं। नाभेरधः स्पर्शे तु प्रक्षाल्याचम्य पुनराच
म्य शुध्यते। काकोलूकमांसपक्षकपोतग्रामकुक्कुटादिक्रव्यादपक्षिस्पर्शे ना
भेरूर्ध्वं करोमुक्त्वा सचैलं स्नानं। नाभेरधस्पर्शे तु स्नानं। रात्रौ चेन्नाभेरूर्ध्वं स्ना

६७ नं।नाभेरधःप्रक्षालनं॥ रथ्याकर्दमतोयष्ठीवनाद्यैर्नाभेरूर्ध्वंस्पृष्टःसद्यःस्ना
यात्।नाभेरधःप्रक्षालनं।अमेध्येषुतुसतीयपरकीयविण्मूत्ररक्तरेतोऽन्नवा
स्थिमद्यावसाद्यैर्मलैःसुरामद्यैश्चनाभेरधःप्रबाहुषुवस्पृष्टोमृज्जलैर्गंध
लेपंप्रक्षाल्यस्नानं।नाभेरूर्ध्वंस्पर्शनेस्नात्वोपवासः।इंद्रियेषुदुष्टेषुचस्पर्शने
स्नात्वोपोष्यपंचगव्यंपिबेत्।स्वकीयमलस्पर्शनेतुनाभेरूर्ध्वमपिप्रक्षालनमेव॥ स
स्नेहहड्डास्थिस्पर्शनेविप्रस्यसचैलंस्नानंनिःस्नेहेस्नानमात्रं।निरंतनेवावस्पृ
गांस्पृष्ट्वासूर्यंदृष्ट्वाशुध्येत्।अज्ञास्थिसस्नेहेत्रिरात्रंनिःस्नेहेएकरात्रं॥ अ
मानुषेषुभक्ष्यवर्जंपंचनखशवदंतास्थिसस्नेहेस्नानंवस्त्रांतरधारणंच।वृष्टो
सकर्दमायामसंकटप्रवेशेजंघयोस्तिस्रोमृत्तिकाःपादयोःषट्मृत्तिकाःक्षि ६७
प्त्वाप्रक्षालनं।वायुशुष्केकर्दमादौनदोषः।श्वपाकादिच्छायारोहणेसचै

लंस्नात्वाघृतंवाहिरण्योदकंपिबेत्।श्वपाकादिस्पर्शनेसचैलंस्नात्वाष्टसहस्रज
पः।मत्याचेदुपवासश्च।तत्स्पृष्टादिनातारतम्येनयोज्यंकल्प्यं।दिवारजःस्रावेज
ननेमरणेवातद्दिनादिकमशुचित्वंस्यात्।रात्रौरजस्रावादौसतित्र्यर्धरात्राद
र्वाक्चेत्पूर्वदिनमित्येकःपक्षः।रात्रिंत्रिधाविभज्यपूर्वभागद्वयेचेत्पूर्वदिनमिति
परःपक्षः।उदयात्पूर्वंचेत्पूर्वदिनमित्यपरःपक्षः।एतेषांपक्षाणांदेशकालतोव्य
वस्था।अज्ञातेरजस्रावेचतुर्थदिनेषुज्ञातेरजस्रावादिकमशुचित्वंस्यात्।जन
नादेर्ज्ञानादिकमशुचित्वंसर्वथाअज्ञातेचेदशुचित्वमेव।अतोज्ञानात्पूर्वंरजस्व
लास्पृष्टंदुष्टमेव।एवंसर्वपापनिमित्तंस्वसत्तादिपापोपपादकंसूतकंतुज्ञाना
दिकमेव।रजस्वलात्रिरात्रमशुचिःस्यात्।चतुर्थेहनिस्नाताशुध्येत्।भर्तुःस्प
र्श्यास्यात्।दैवेपित्र्येचकार्येपंचमेहनिशुद्धा।गृहकार्येरजोनिवृत्तौशुद्धा।स्त्र

तिका आशौचांते मल्लं प्रक्षाल्य दंतान्धावयित्वा सचैलं स्नायात्। रजस्वला चतुर्थे
ह्निषड्भिर्मृत्तिकाभिः शौचं कृत्वा क्षत्रादिस्त्री त्रिपादद्विपादन्यूनमृत्तिकाभिः शौचं
कृत्वा मल्लं प्रक्षाल्य दंतधावनपूर्वकं संगवे सचैलं स्नायात्। रजस्वलायाः स्ना
तायाः पुनरपि रजो दृष्टो अष्टादशादिनादर्वाक् अशुचित्वं नास्ति। अष्टादशे दि
ने रजो दृष्टो एकरात्रमशुचित्वं नवदशादिने द्विरात्रं विंशतिदिने त्रिरात्रमेव। प्रा
यशो विंशतिदिनादूर्ध्वं रजस्राविणी नामेवं भवति। विंशतिदिनादर्वाक् प्रायशो
रजोदर्शनवती नामष्टादशादिने त्रिपिरात्रमशुचित्वं। किं च त्रयोदशीदिनादूर्ध्वं प्रायशो
रजस्राविणी नामेकादशादिनादर्वागशुचित्वं नास्ति। एकादशादिने रजो दृष्टावेकरा
त्रमशुचित्वं। द्वादशे द्विरात्रं। त्रयोदशादिषु त्रिरात्रमित्यादि ज्ञेयं। सचैलस्नानमे ६८
कवस्त्रं प्रक्षाल्य स्नात्वा पुनः सचैलं स्नानं। एकवस्त्रस्पृष्टश्चेत्तथा स्नातोपि सचैलं स्ना

नएव। संग्रामे हट्टमार्गे यात्रादेवगृहेषु न। उत्सवक्रतुतीर्थेषु स्पृष्टास्पृष्टिर्न दुष्यति। विप्लवे
ग्रामदेशयोः। महाजलसमीपेषु महाजनरवेषु न। अग्न्युत्पाते महापत्सु स्पृष्टास्पृष्टि
र्न दुष्यति। प्राप्यकारींद्रियं स्पृष्टमस्पृष्टिरितरेंद्रियं। तयोश्च विषयं प्राहुः स्पृष्टा
स्पृष्ट्यभिधानतः॥ इति स्पृष्टास्पृष्टिशुद्धिः समाप्ता॥ अथाशौचविधिः
चतुर्मासाभ्यंतरे गर्भमात्रनाशः स्राव उच्यते। तत्र स्रावे आद्येमासत्रये मातुस्त्रिरा
त्रमाशौचं। उपरि मातुर्गर्भमाससंख्यया समदिनमाशौचं। सगोत्रसपिंडानां स्ना
नेन शुद्धः शुद्धिः॥ यतः प्रभृति संतानविश्लेषः सकूटस्थः। तमारभ्य गणिताः
सप्तपुरुषाः सपिंडाः॥ अत ऊर्ध्वं समानोदकाः। पंचमषष्ठयोर्गर्भमात्रनाशः पा
त इत्युच्यते। पाते मातुर्गर्भमाससंख्यासमदिनमाशौचं। सपिंडानां त्रिरा
त्रं। इदं गर्भमासप्रयुक्ताशौचं सर्ववर्णसमानं। सप्तममासप्रभृति पूर्णगर्भे

६५

६८ निर्गमात्प्रवासइत्युच्यते। प्रवासे जनननिमित्ताशौचं सपिंडानां पूर्णदशाहादिकं सर्वेषां
यथावर्णं भवति सोदकानां त्रिरात्रं। जनननिमित्तास्पृश्यत्वं मातुरेव यावदाशौचं। न
पितुः। तस्य स्नानानंतरमस्पृश्यत्वं नास्त्येव सपिंडानामस्पृश्यत्वं सर्वदा नास्त्येव। सूति
का स्ववर्णाशौचे विगते स्वव्यवहारयोग्यैव। अदृष्टार्थेषु तु कर्मसु पुत्रप्रसूर्विंशतिरा
त्रेण योग्या। स्त्रीप्रसूर्मासेन योग्या। पुत्रजननदिवसे हिरण्यभूगवाश्वाजवासः श
य्यागृहादिकं सर्वं प्रतिग्राह्यं। कृतान्नं वर्ज्यं। कृतान्नग्रहणे चांद्रायणं कार्यं। पुत्रज
न्मदिवसे दानं कुर्यात्। हिरण्याद्यभावे संकल्प्य पश्चाद् दद्यात्। प्रथमदिवसे हिर
ण्यादिदानं। षष्ठे सप्तमे वा बलिदानं। दशमे दिने अन्नदानमित्यादि यथाचारं कु
र्यात्। सूतिकागृहे रक्षा च कार्या रात्रौ विशेषेण॥ जन्माशौचमध्ये तच्छिशु ६९
मरणे तदुच्यते। नाभिच्छेदनादूर्ध्वं शिशुमरणे निःप्राणशिशुगमने च जनननि

निमित्तमाशौचं कृत्स्नं यथावर्णं सर्वेषां सपिंडानामस्त्येव। मरणनिमित्ते सद्यः शुद्धिः।
मातुर्जनननिमित्ताशौचं कृत्स्नं यथावर्णमस्ति। मरणनिमित्ते सद्यः शुद्धिः। नाम
करणात्पूर्वं शिशुमरणे निखननमेव। मातुरनुगमनं नास्त्युदकादिकं च। ज्ञा
तीनां सचैलस्नानात्सद्यः शुद्धिः। ततो दंतजननात्पूर्वं निखननं तूष्णीं दहनोदका
दिदानं वा कार्यं। अनुगमनं कृताकृतं। खननपक्षे सद्यः शुद्धिः। दहने त्वेकाहं। खननं
च शवमलं प्रक्षाल्य घृतेनाभ्यज्य संस्नाप्य नववस्त्रसुगंधमाल्यानुलेपनाद्यैः श
क्त्यालंकृत्य ग्रामाद्बहिः शुचौ देशे कार्यं। दहनं च शवं तथा संस्नाप्यालंकृत्य बांधवा ज्ये
ष्ठपूर्वाः श्मशानं नीत्वा लौकिकाग्निना तूष्णीं कुर्युः। तूष्णीमुदकादिदानं च। दह
ने अमेध्यचंडालसूतिकापतितचिताग्निं वर्जयेत्॥ दंतजननादूर्ध्वं त्रिवर्षपर्यंत
मकृतचौलस्य मरणे खननं दहनं वा कार्यं। खनने एकाहमाशौचं। दहने त्रिरात्रं।

अत्रऊर्नद्विवर्षांतिमातुरनुगमनंकृताकृतं।पश्चान्नित्यं।दंतजननादूर्ध्वंत्रिवर्षपर्यंतंचौ
लाकरणेतत्सीदहनंतत्सीमुदकादिदानंत्रिरात्रमाशौचंनियतमेवकार्यं।त्रिवर्षात्पर
कृतचौलाकृतचौलस्यापिमरणेयावदुपनयंतावदनुगमनंतत्सीदहनोदकादिदा
नंत्रिरात्रमाशौचानिनियतानिकार्याणि।अनुपनीतमरणेमातापित्रोर्दशाहाशौचं
पक्षोनादृतः।अनुपनीतमृताशौचेवर्णास्वाशौचकालत्रिभागादूर्ध्वंस्पृश्याः।।
अनुपनीतमरणेऽस्कृतेऽतीताशौचंनास्ति।स्नानमेवकार्यं।इदंवयःप्रयुक्ताशौचंस
स र्ववर्णमानं।आशौचांतेस्नात्वास्वस्तिवाचनपूर्वंब्राह्मणान्भोजयित्वास्वस्तिवाच
नंकार्यं।स्त्रीमरणेत्रिपुरुषविषयज्ञातीनामाचौलकात्कास्नानेनसद्यःशुद्धिः
स्त्रीषुसापिंड्यंत्रिपुरुषमेवप्रत्तासु।ततोवाग्दानादर्वागेकाहमाशौचं।ततोविवाहा ८०
दर्वाक्पतिपक्षेचत्रिपुरुषपर्यंतंत्रिरात्रं।वाग्दानाभावेविवाहनिश्चयोवधिरित्य

के।अत्रऊद्विवर्षेनिखननं।पश्चाद्दहनंपुरुषवद्वा।अस्पृश्यत्वादिपूर्वंपूर्ववत्।उपनयना
दूर्ध्वंपुरुषमरणेविवाहतस्त्रीमरणेशूद्रमरणेचविधिवद्दग्ध्वाउदकेपिंडदानसहितंयथा
वर्णपूर्णाशौचंकार्यं।तत्रदहनंब्रह्मचार्यादेरनग्निकस्यविधवादेश्चकपालाग्निनास्व
शाखोक्तविधिनाकार्यं।गृहस्थस्यगृह्याग्निना।आहिताग्नेस्त्रेताग्निभिर्दहनंकार्यं।
तथाशौचंब्राह्मणानांदशाहं।क्षत्रियाणांद्वादशाहं।वैश्यानांपंचदशाहं।शूद्राणांमा
सं।वृत्तस्थानांद्विजशुश्रूषावर्तिसच्छूद्राणांपंचदशाहं।चतुर्थेदशरात्रंस्यादित्यादिप
क्षादृषिताः।चतुर्थेदशरात्रंस्यात्षडहःपुंसिपंचमे।षष्ठेचतुरहाच्छुद्धिःसप्तमेचदिनत्र
यमित्यनादृतः।एकाहाच्छुद्ध्यतेविप्रइत्याद्यप्यनादृताः।तथाशौचमाहिताग्नेःविधि
वद्दहनंकृत्वादहनदिवसमारभ्यैवकार्यं।विदेशस्थमृतेयावद्दिनानसंस्कारस्तावत्त
त्पुत्रादीनांसंध्यादिकर्मलोपोनास्त्येव।अनाहिताग्नेर्विधिवद्दहनाभावेतत्रग्रहणाभा

नीमाशौचग्रहणं कृताकृतं। आहिताग्नेर्विधिवद्दहनाभावे आशौचादिग्रहणं नास्त्येव। वप
७१ नं च पुत्राणां प्रथमेऽहनि कार्यं। देशमेवा। श्राद्धादेरर्वाक् कस्मिंश्चिद्दिवसे वा। ग्रामाद्बहिः
कार्यं। न खनिकृंतनं वा। गुरुमरणे चैवं। मृतशरीराभावे स्थ्नां संस्कारं कुर्यात्। अ
स्थ्नामभावे पलाशैर्वृंतैर्वा शरीरप्रतिकृतिं कृत्वा पुनः संस्कारं कुर्यात्। आहिताग्नेः
पुनः संस्कारे प्रत्यक्षशववद्दाहादिकं संपूर्णाशौचं यथावर्णं कार्यं। अनाहिताग्नेः पु
नः संस्कारस्तु सूतकमध्ये चेत्कृतस्तत्सूतकशेषेणैव शुद्धिः। अतीते सूतके तु पुनः
संस्कारे पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहादिकं संपूर्णाशौचं। गृहीता
शौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं। पत्नीपुनःसंस्कारे पत्युश्चैवं। अगृहीताशौचानां
सपिंडानां त्रिरात्रं। गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति। विदेशस्थे जनने
मरणे वा प्रथमदिवसादूर्ध्वं ज्ञाने पुत्रादीनां स्वाशौचशेषेणैव शुद्धिः। हीनवर्णस्य ब्रा ७१

क्षणात्कृच्छ्रजात्याशौचमेव। दासीदासस्य प्रेष्यस्य च स्वामीकार्ये स्वाम्याशौचसमकाले गते
ष्टस्य। स्वकर्माधिकरस्तु स्वाशौचांत एव। प्रतिलोमजानां नाशौचं। तेषां मलप्रक्षाल
नमेव। शवं दग्ध्वा पृष्ठतोऽनवेक्ष्यमाणा। आगच्छंतो स्फुटितपाषाणं श्लक्ष्णं गृहीत्वा म
हाजलं गत्वा तत्र महाजले शरीरमलं प्रक्षाल्य वस्त्रं संशोध्य स्नात्वा पुनः सचेलं स्नात्वा
वस्यवाग्यताः सगोत्रसपिंडाः समानोदकाश्च वृद्धपूर्वाः प्राचीनावीतिनो दक्षिणामुखा
प्रेतस्य नामगोत्रे उच्चार्य प्रेतस्तृप्यस्वेति जलपूर्णांजलिं सतिलं सव्योत्तरपाणिकाः
पाषाणे सकृदासिंचेयुः। एवमुदकं दत्वा जलात्समुत्तीर्णान्नवजाततृणके प्रदेशे स
म्यगुपस्थितान् पुत्रादीन् कुलवृद्धाः पूर्वैतिहासैः शोको निष्फलः श्लेष्माश्रु बांधवैर्मु
क्तं प्रेतास्यतन्निपतति तस्मान्न रोदनं कार्यं। विहिताः क्रियाः कार्याः। इत्याश्वासये
युः। एवमाश्वासितो वस्त्राणि निष्पीड्य शोषयित्वा बालपूर्वं गृहं गत्वा द्वारि स्थित्वा स

७२ माहितान्निंबपत्राणिशनिर्भक्षयित्वावन्याग्न्युदकगोमयगोरसर्षपदूर्वांकुरगोवृषभान्स्पृष्ट्वा
मणिप्रवालादीन्स्वशाखोक्तानपियथालोभंस्पृष्ट्वाश्मनिपदंशनैर्निधायगृहंप्रविशे
युः॥तस्मिन्नहनिएकस्मिन्मृन्मयपात्रेजलंप्रेतात्रस्नाहीतिआकाशेशिक्यादौस्थाप्यं
।अन्यस्मिन्मृन्मयेक्षीरंप्रेतेदंपिबेतितथैवस्थाप्यं।निंबपत्रभक्षणंपात्रस्थापनंनवाका
र्यं।ततस्तस्मिन्दिनेतस्मिन्गृहेअन्नंनपचेयुः।क्रीतान्नेनअयाचितान्हृतेनवान्यगृ
हपक्वेनवाहविष्येणवर्त्तेरन्।नस्वगृहपक्वेन।क्षीरलवणमाषमांसापूपपायसवर्ज
जंअधःशयनासनाः।बालातुरवृद्धवर्जं।पृथक्पृथक्ब्रह्मचर्यंएकाश्चभवेयुः।
गुरोर्मृतेउपवसेयुःपुत्राःपत्नीवा।जातसूतकेएतेनियमाःसर्वान्स्युः।महागुरुमरणेअ
क्षारलवणाशिनोद्वादशरात्रंदानाध्ययनेवर्जयेरन्।पितापुत्रानुत्पाद्यसंस्कृत्यवेद ७२
वेदार्थंग्राहयित्वावृत्तिंकल्पयित्वामहागुरुर्भवति।ततोयावदाशौचंतावत्सहभवेदे।

कमंजलिंकुर्युरदधः।तथावसतिदशास्वदिनेषुदशांजलयःस्युः।एवंमातामहानामाचार्य
पत्नीनांवोदकदानंकुर्यात्।सखीनांप्रत्तानांदुहितॄणांभगिन्यादीनांश्वश्रूश्वशुरभागिने
यर्त्विजांचद्वितीयोदकदानंकुर्यात्।अस्थिसंचयनमाहिताग्नेरनग्नेश्चसंस्कारस्मा
रस्यप्रथमदिनेद्वितीयेतृतीयेचतुर्थेसप्तमेनवमेवा।अविरुद्धेस्वशाखोक्तविधि
नाकार्यं।तत्रपिंडत्रयंदेयमेकंपिंडंश्मशानवासिभ्यःपूर्वप्रेतेभ्यःमध्यतएकःपिं
पिंडइदानीतनप्रेतायदक्षिणातएकःपिंडस्ततस्तत्सखिभ्यइतिदक्षिणासंस्थंदद्यात्।
अस्थीनिगंगायांवाक्षिपेत्।अन्यतीर्थेवाशुद्धदेशेवासंचयनेकृतेवर्णानांआशौच
कालविभागेत्रिचतुःपंचदिनैःस्पृश्याःदशद्वादशपंचदशैर्भोज्यान्नाः॥ ब्र
ह्मचारीमातृपितृमहागुर्वाचार्योपाध्यायानांदहनाशौचोदकदानादिकंकुर्यात्।
तद्व्यतिरिक्तानांदहनाशौचोदकदानादिकंनकुर्यात्।आसमावर्त्तनात्।मात्रादि

नांतुकुर्यादेव।प्रक्रांतप्रायश्चित्तव्रतश्चाव्रतसमाप्तेर्दहनादिकंनकुर्यात्।स्वकर्मरहितश्च
नकुर्यात्।कृतेपिनोपपतिष्यति।मातापितृगुर्वाचार्योपाध्यायानांप्रेतकार्येषुब्रह्मचारिणा
व्रतस्यलोपोनास्ति।नसूतकान्नमश्नीयात्।नसूतकिभिःसहवसेत्।अन्यप्रेतका
र्यकरणेपुनरुपनयनंकार्यं।समावृत्तेशिष्यस्यदशाहमाशौचं।गुरुदहनेस्वकर्मपति
तामहापातकपतिताःपुरुषाःस्त्रियश्चहीनजातिगामिन्योब्राह्मणगर्भघातिन्योभर्तृ
घ्न्यश्चस्तेयस्ववाविधर्मिणश्चक्लीबाद्याश्चदहनोदकंनकुर्युः।मोहात्कृतेपिनोपपति
ष्यति।प्रेतस्यपुत्रोदिनत्रयेग्रामाद्बहिःपाषाणस्यपुरतश्चमंत्रकंकुशैःपुनाममंत्रे
णपिंडपितृयज्ञप्रयोगेणत्रीन्पिंडान्दद्यात्।तत्रपिंडेपाषाणाक्षतगंधधूपदीप
माल्यादीन्दद्यात्।यद्वादशदिनेषुदशपिंडान्दद्यात्।आशौचेप्वासेपित्रयःपिं
डादशैववा।अनेकपुत्रत्वेइतरानुमतोज्येष्ठएवदद्यात्।द्रव्येणविभक्तेनरा।पुत्राभा

वेपितृसपिंडेयमातृसपिंडिकेयशिष्यास्तदर्थजीविनोवासंबंधिनोबांधवावादद्युः।अस
गोत्रःसगोत्रोवापुरुषोवास्त्रीवाप्रथमेहनियोदद्याद्दशाहांतंसएव।प्रथमेहनियद्द्रव्य
दशाहांतंतदेव।दशमेह्न्याधिकंपिंडत्रयंदेयं।एकःपिंडस्तत्सखिभ्यइदानीतनप्रेता
यमध्यमःपिंडःदक्षिणतएकःपिंडोयमाय।ततःकर्त्ताप्रार्थिताबांधवाःसंबंधिन
श्चत्रीन्क्रोशान्धर्मोदकांजलिंदद्युः।नपाषाणेनियमः।ततःसुवासिन्यःप्रथ्यंगस्नाताः
शुक्लवाससःकलशपूर्वाबालपूर्वावास्वगृहंगत्वाअन्यभोजनादिस्वगृहपाके
नयथाचारंकुर्युः।त्रिरात्राशौचेदशांजलयश्चवाशतांजलयः।दशांजलिपक्षे
प्रथमेह्नित्रयोंजलयःद्वितीयदिनेचत्वारःतृतीयेत्रयः।शतांजलिपक्षेप्रथमे
ह्नित्रिंशत्।द्वितीयेचत्वारिंशत्।तृतीयेत्रिंशत्।पिंडाश्चप्रथमेह्नित्रयःद्वितीये
चत्वारःतृतीयेत्रयः।संचयनंचद्वितीयेह्नि।अनुपनीतस्यपिंडंभूमौदद्यात्।उ

अबहिर्विस्त्रीशूद्रयोर्विहिवाहादर्वागेव। आशौचमध्ये पुनःसंस्कारे दृष्टबाधोभया
नदिनंसंभवेशोध्यकाळांतरकृत्यप्रेतकार्येतुदिनंशोध्यमेव। संवत्सरादूर्ध्वप्रेतका
र्यंकर्तव्येउत्तरायणकाळः श्रेयान्। तत्रापिकृष्णपक्षः श्रेयान्। तत्रापिनंदांत्रयोदशीं
चतुर्दशींदिनक्षयंचवर्जयेत्। शुक्रशनैश्चरवारौवर्ज्यौ। नक्षत्रेषुभरणीकृत्तिकार्द्रा
श्लेषाज्येष्ठामघामूलधनिष्ठादिपंचकंत्रिपुष्कराणिचातिदुष्टानिसर्वथावर्ज्यानि
व्यतीपातेपरिघेचवैधृतौचयोगविष्टिकेचपोच। चतुर्थाष्टमद्वादशस्थे चंद्रेचातिदोषः।
रोहिणीमृगशीर्षपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढा
निद्विपुष्कराणिषट्दुष्टानिसंभवेवर्ज्यानि। शिष्टान्यदुष्टानिग्राह्याणि। सर्वथा
दिनशुद्ध्यसंभवे अनतिदुष्टबाह्यनक्षत्रंग्राह्यं। नंदायांशुक्रवारेचतुर्दश्यांत्रिजन्म ७४
नक्षत्रे एकोद्दिष्टमनिषिद्धं। साक्षादेकादशाहे प्राप्ते च एकोद्दिष्टंप्राप्तमेव। तत्राति

थिनक्षत्रवारादिकंशोध्यमेव। युगादिमन्वादिसंक्रांत्यमावास्यासुप्रेतकार्येपुनःसंस्का
रेचनैवकिंचिच्छोध्यं। ऊर्ध्वोच्छिष्टाधरोच्छिष्टाब्राह्मणक्षत्रियोच्छिष्टास्पृश्यस्पृष्ट
मरणखट्वामरणबद्धमरणादिषुसत्सुप्रत्यक्षसंस्कारेपुनःसंस्कारेचकर्तव्येत्रीन्कृ
च्छ्रान्द्वादशकृच्छ्रान्पंचदशकृच्छ्रान्वाप्रायश्चित्तंवित्तानुसारेणचरेन्नाकृत्वाहीलाशक्तो
तदेवप्रत्याम्नायधेनुंहिरण्यंमूल्यान्यादिवस्त्रादिदत्वातदानींशुद्धिंसंपाद्यदहनादि
कंकार्यं। शक्तोभक्तःपुत्रादिःपित्रादेःपापिनःसर्वात्मनाशुद्धिमिच्छेत्। प्रायश्चि
त्तकरणेनोक्तसर्वप्रायश्चित्तानामन्यतमंयोग्यंकृत्वादहनादिकंकुर्यात्। एवंप्रेता
दिकस्याप्यात्मनश्चशुद्धिमनापाद्यपुनःसंस्कारेनांतरंनक्षत्रंग्राह्यं। लोभादिना
दहनादिकेकृतेतत्सर्वंनोपतिष्ठति। अंतरिक्षेविनश्यति। उभयोरपिनरकपतनं
भवे। पाषंडिनांवेदबाह्यलिंगिनांसत्यधिकारेअनाश्रमिणांस्वकर्महानिपतितानां

७५ महापातकपतितानांस्त्रीणांचहीनजातिगामिनीनांब्राह्मणगर्भघ्नीनांकुलटानांचप्रयो
नाशकशस्त्राग्निविषोद्बंधनप्रपतनाद्यैर्बुद्धिपूर्वकमात्मघातीनांदहनादिकंनकुर्या
त्।चंडालजलसर्पब्राह्मणवैद्युतदंष्ट्रिशृंगिपशुभिर्हतानांचतद्देहंतूष्णींदहेत्।अन्य
स्यांवामहानद्यांक्षिपेत्।दर्पक्रोधादिनामृतानांनदहनाशौचोदकदानादिकंनकुर्या
त्।मोहात्कृतेनोपतिष्ठति।अंतरिक्षेविनश्यत्येव।तदानीप्रायश्चित्तस्मरणात्।सं
त्सरांतेलोकगर्हाभयपरिहारार्थंशुद्ध्यर्थंश्राद्धार्थंदौयोग्यत्वार्थंचतेषांशरीरंगंगा
यांक्षिपेत्।अन्यस्यांवामहानद्यां।गृह्याग्नौचतुष्पथेयज्ञपात्राणिदहेत्।तेषांश
वानांस्पर्शनस्नानालंकारवाहनरज्जुच्छेदनदहनाश्रुपातकथादीनज्ञानतःकृत्वा
महासांतपनंचरेत्।ज्ञानात्तप्तकृच्छ्रमेतेष्वेकैककरणेत्वज्ञानादुपवासः।मत्याभ्यासे ७५
कृच्छ्रातिकृच्छ्रचांद्रायणानियोग्यतयाकुर्यात्।एतेषांसापिंड्यादीनांसर्वेषां

निष्कृतिर्नास्ति।प्रायश्चित्ताकरणेतदानींसंवत्सरांतेलोकगर्हापरिहारार्थंशुद्ध्यर्थंश्रा
द्धादौयोग्यत्वार्थंचनारायणबलिंकृत्वाश्राद्धंकुर्यात्।अथतेषामतिविरक्ताःप्रा
यश्चित्तसमर्थाशक्ताःपुत्रादयःसंतिचेत्।आत्मघातकेप्रायश्चित्तंचांद्रद्वयं।त
प्तकृच्छ्रचतुष्कंवा।यद्वात्रिंशत्कृच्छ्राणिकृत्वापाषंड्यादीनांसर्वप्रायश्चित्तंयोग्यं
कृत्वातदैववाकाकांतरेवासंवत्सरादर्वाक्दहनादिकंकृत्वाश्राद्धंकुर्युः।अनित्य
त्वादायुषःप्रायोमहाप्रस्थानांप्रपतनंगिरिवृक्षेभ्यः॥ अथनारायणबलिः
॥कांस्यशुक्लैकादश्यांवाकृष्णैकादश्यांविष्णुंवैवस्वतंयमंचयथावदभ्यर्च्य।तत्समी
पेमधुघृतप्लुतांस्तिलमिश्रान्दशपिंडान्प्रवहणांतंकृत्वाविष्णुरूपेणप्रेतमनुस्म
रन्प्रेतनामगोत्रउच्चार्यदक्षिणाग्रेषुदर्भेषुदक्षिणामुखोदत्वागंधाद्यैरभ्यर्च्य
पिंडप्रवहणांतंकृत्वानद्यांप्रक्षिपेत्।नपत्न्यादिभ्योदद्यात्।ततस्तस्यामेवरात्रौश्मशु

श्रीः

स्मृत्य·सा·

७६ ग्मान्ब्राह्मणान्नामंत्र्योपोषितः श्वोऽपराह्ने मध्याह्ने विष्णुमभ्यर्च्यैकोद्दिष्टविधिना ब्राह्मणपादप्रक्षा
लनादितृप्तिप्रश्नांतं कृत्वा पिंडपितृयज्ञवदुल्लेखनाद्यवनेजनांतं कृत्वा विष्णवे ब्रह्मणे
शिवाय यमाय सपरिवाराय चेति चतुःपिंडान्दत्वा नामगोत्रसहितं प्रेतं संस्मृत्य विष्णो
र्नाम संकीर्त्य पंचमं पिंडं दद्यात्। ततो विप्रानाचांतान्दक्षिणाभिस्तोषयित्वा तन्मध्ये
चैकं गुणवंतं प्रेतबुद्ध्या संस्मरन्भूमिहिरण्यादिभिरतिशयेन संतोष्य पवित्रपा
णिभिर्विप्रैः प्रेताय तिलादिसहितमुदकुंभं दापयित्वा स्वजनैः सह भुंजीत॥ सर्प
हते त्वयं विशेषः॥ तत्र नागव्रतं कार्यं॥ तच्च संवत्सरं भाद्रपदशुक्लपंचमीमारभ्य अ
न्यां वा शुक्लपंचमीमारभ्य पंचम्यामुपवासः। यद्वा चतुर्थ्यामेकभक्तं पंचम्यां नक्तं
कुर्वन्। दारुमयं मृन्मयं वा नागं पंचफणं कृत्वा गंधैः करवीरैः शतपत्रैर्जातिपुष्पैः ७६
धूपैरनंतं वासुकिं शंखपद्मकंबलं कर्कोटकमश्वतरं धृतराष्ट्रं शंखपालं का

लीयं तक्षकं कपिलं च पंचम्यां संपूज्य पश्चाद्ब्राह्मणान्घृतपायसमोदकैर्भोजयेत्। संवत्स
रांते चैवं संपूज्य महाब्राह्मणान्भोजनं। सौवर्णनागदानं गोदानं च कुर्यात्। अथवोभ
योः पक्षयोः पंचम्यां भूमौ नागं पिष्टेनालिख्य सितपुष्पैर्गंधैः सितेन गंधेन वासितं तं
दुलैरर्च्य गव्यक्षीरं मोदकं तस्मै निवेद्य उपस्थाय एवं वदेत्। मुंच मुंचेनमिति तद्दि
ने मधुरमश्नीयात्। एवमुक्तविधिना नागमभ्यर्च्य पूर्णे संवत्सरे नारायणबलिं कृ
त्वा सौवर्णं नागं गां च दद्यात्। ततः श्राद्धादिकं सर्वं कुर्यात्। चंडालगोब्राह्मणप
शुदंष्ट्रिसर्पाग्न्युदकादिभिः प्रमादान्मरणे तु लक्षकृच्छ्रद्वयं चांद्रायणं च कृत्वा य
थापूर्वं दशाहं श्राद्धं कृत्वा विधिना दहनाशौचोदकदानादिकं सर्वं कार्यमेव।
अथानुष्ठानासमर्थजीर्णवानप्रस्थादीनां अचिकित्स्यगुरुव्याधिपीडिता
७७ नां अग्न्युदकानशनगिरिप्रपतनादिभिर्बुद्धिपूर्वकमात्मघातकत्वमभ्यनुज्ञा

७७ यतेतेषांविधिवद्दहनंकृत्वात्रिरात्रमाशौचंकार्यंद्वितीयेह्निसंचयनंतृतीयेतूदकदा
नं।चतुर्थेश्राद्धंकुर्यात्।एवमध्येषांविध्यनुगृहीतानांपातकानांकार्यं।अभिषिक्त
क्षत्रियादिहतानांसद्यःशौचं।गोविप्रैरंत्यजैःपशुदंष्ट्रादिभिर्युद्धेबुद्धिपूर्वात्मघा
तकानांपाषंड्यनाश्रमिपतितानांसद्यःअशौचं। जाताशौचेमृताशौचेचत्रेता
ग्निसाध्याग्निहोत्रदर्शपौर्णमासादिनित्यनैमित्तिकाःक्रियाःकार्याः।औपा
सनाग्निसाध्याश्चप्रातःसायंहोमःपार्वणस्थालीपाकाद्याःश्रुतिचोदितत्वा
त्।कार्यएव।असंभवेहावयेत्।सर्वथानहावयेत्।स्मार्त्तत्वेपिंडपितृयज्ञश्र
वणाकर्मश्वयुजीकर्मादिकंसगोत्रेणकारयेत्।नहावयेत्।यजमानस्तुस्ना
त्वाचम्यउद्देशत्यागंकुर्यात्।सर्वकाम्यंनिवर्त्यमेव।स्मार्त्तत्वेपिसंध्यायांगाय ७७
त्र्यंजलिदानंकार्यं।मार्जनंकार्यंनवा।यद्वाप्राणानियम्यशक्त्यामनसामंत्र

मुच्चारयन्मार्जनादिकंकृत्वाचाग्गायत्रीमुच्चार्यांजलिंदद्यात्।दानप्रतिग्रहपंचम
हायज्ञनित्यश्राद्धस्वाध्यायादीनांस्मार्त्तानांत्यागएव।नित्यस्नानशौचाचमनभो
जनानांनअस्पृश्यस्पर्शनेस्नानंचकुर्यात्।सूतकान्नभोजनमस्वकुल्यानांन
कार्यं।स्वकुल्यानांनदोषः।दातृभोक्त्रोरन्यतरेणसूतकेज्ञानेनभोक्तव्यं।उभा
भ्यामपरिज्ञानेनदोषः।विवाहोत्सवयज्ञेषुअंतराजननमरणाशौचेपूर्वसंक
ल्पितद्रव्येनदोषः।तत्रपक्वान्नेषुपरैरन्नंदातव्यं।दातृभोक्तृसूतकिनंनस्पृ
शेत्।भुंजानेषुविप्रेष्वन्यतराभ्याद्यैआशौचेअन्यगृहोदकाचांताःशुद्धाः।
सर्वत्राशौचेलवणमधुमांसेषुपुष्पफलमूलेषुशाककाष्ठतृणेषुसूपयोद
धिघृतेषुतिलौषधाजिनेषुनास्त्याशौचं।स्वाम्यनुज्ञयास्वयमेवगृहीया
त्।अन्नसत्रप्रवृत्तानांतडागादिष्वपक्वेषुचसर्वेषुपण्यद्रव्येषुचनाशौचं।शाव

संसर्गनिमित्ताशौचं अनुगमनाशौचं च। शवसंसर्गिण एव न तद्भार्यापुत्रादीनां द्रव्या
७८ णां च॥ अतिक्रांताशौचं च तद्द्रव्याणां नास्त्येव। कारुशिल्पिवैद्यदासीदासराज
प्रेष्यराजमूल्यकर्मकारिणां सद्यः स्नातानां तत्तद्व्यापारिणां नाशौचं। गत्यंतराभा
वे क्वचित्स्पृश्यत्वं स्यात्। स्वविहितस्नातकव्रतिनां कार्येष्वाशौचमस्त्येव। कारवः सू
पकाराद्याः शिल्पिनश्चित्रकर्मचैलनिर्णेजकाद्याः॥ वृतानामृत्विजां मूल्यदी
क्षणीयेष्ट्यादिदीक्षितानां यज्ञियं कर्म कुर्वतां अन्नसत्रिणां कृच्छ्रचांद्रायणादिव्र
तिनां प्रायश्चित्तत्वेन प्रवृत्तनिवृत्तीनां च ब्रह्मचार्यादिव्रतीनां च प्रवृत्ते श्राद्धकर्मणि क
र्तॄणां निमंत्रितानां भोक्तॄणां यत्किंचिल्लियभस्कानां अप्रतिषिद्धग्राहिणां नित्यदातॄ
णामिते षां यावदुपाधिस्तावदाशौचं नास्त्येव। ब्रह्मचारिणां यतीनां च सर्वदाशौचं ना
स्त्येव। ऋत्विगादीनां स्नानमस्ति॥ पूर्वप्रवृत्तचौलोपनयनविवाहादिसंस्कार ७८
कर्मसु पूर्वप्रवृत्तयज्ञेषु च पूर्वप्रवृत्तप्रतिष्ठाद्युत्सवमात्रेषु च पूर्वप्रवृत्तवृषोत्स

र्गादिपाकयज्ञेषु युद्धार्थविहितशांतिकर्मसु च स्फोटादिभिरुपसर्गेणो राजभयेन वा
देशस्य विप्लवेन च विवाहोत्सवदुर्गयज्ञयात्रातीर्थयुद्धकर्मसु च सद्यः शौचं तत्तदर्थे ७९
शांतिकर्मणि च सद्यः शौचं। व्याध्यादिना मुमूर्षावस्थायां तदुपशमनार्थदाने च त
थासंकुचितवृत्तेः क्षुत्परिश्रांतमातापित्रादिबहुकुटुंबस्य तद्दक्षिणयोग्यप्रतिग्रहे
चाश्वस्तनिकस्य सद्यः शौचं। अतिकष्टापदि विप्लवे च विशेषेण सद्यः शौचं। एका
हसंचितधान्यस्यैकाहमाशौचं। त्र्यहः संचितधान्यस्य त्र्यहं चतुरहार्थसंचितधा
न्यस्य कुंभीधान्यस्य च चतुरहं। कुसूलधान्यस्य दशाहं। आशौचकालमध्ये नु
पपत्त्यपगमे च शिष्टशौचमस्त्येव। एवं दशाहस्थाने त्रिरात्रपक्षिण्येकाहः। सद्यः
शौचपराणि वाक्यानि आपद्विषयाणि योज्यानि। समानोदकविषयाश्च सं
कुचिताशौचाः कल्प्याः पक्षिण्येकाहः सद्यः शौचपरा या आपद्विषयाः। येन प्र
तिग्रहादिनावृत्तिस्तद्विषयानश्येत्। सर्वत्र ब्राह्मोऽकुनादिनिमित्तं बहुवेदस्य स्वा

ध्यायेन सद्यः शौचं॥ आशौचानंतरं सर्वे वर्णाः सचैलं स्नाति। ततो ब्राह्मणो दक्षि
णहस्तेनापः स्पृष्ट्वा शुध्येत्। क्षत्रियो वाहनमायुधं वा वैश्यः प्रतोदं रश्मीन्वा। शूद्रो य
ष्टीं स्पृष्ट्वा शुध्येत्। शवं सपिंडैः समानोदकैर्वस्त्रयुगादिभिर्भूषितं नयेयुः। नगर
ग्रामाभिमुखं प्रेतं नयेयुः। न शूद्राः पतिताश्च शवं तृणकाष्ठहवींषि नयेयुः। न नग्नं श
वं दहेयुः॥ धर्मार्थं ब्राह्मणशवनिर्हरणस्नानालंकारवाहनदहनादिके कृते द्वि
जानां सचैलस्नानाच्छुद्धिः। महापुण्यं शुभं चायुष्यं भवति तत्राप्युक्तं नाथ प्रेतेप्यनंतं
पुण्यं शुभं चायुर्वर्धते। धर्मार्थमुत्कृष्टजातिप्रेतनिर्हरणादिके सचैलस्नानाच्छुद्धिः
धर्मार्थं सजातिप्रेतनिर्हरणे सचैलस्नानप्राणायामैः शुद्धिः। धर्मार्थं हीनजाति
प्रेतनिर्हरणादिके सचैलं स्नात्वा निंबपत्रभक्षणादि गृहप्रवेशनांते कृते शुद्धिः।
स्नेहादिना सजातिषूत्कृष्टजातिषु प्रेतनिर्हरणमात्रे कृते त्वेकाहाशौचेन शुद्धिः। ७९
स्नेहादिना सजातिनिर्हरणे तद्गृहे स्थितौ त्रिरात्रमाशौचं। स्नेहादिना सजातिनि

र्हरणे तद्गृहे स्थितौ तदन्नाशने दशाहाशौचेनैव शुद्धिः। स्नेहादिनान्यजातिनिर्हरणे तु त
ज्जातीयमेवाशौचं कार्यं॥ अनुगमनं सजातिष्वपि ब्राह्मणाद्यैर्न कार्यं। स्नेहादिना
सजातिषु चोत्कृष्टजातिषु चानुगमने कृते सचैलं स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुध्ये
त्। घृतप्राशनं विशुद्ध्यर्थमेव। न भोजनस्थाने। सपिंडेष्वनुगमनं विहितमेव। हीनजा
तिषु त्वेवं। ब्राह्मणस्य क्षत्रियानुगमने एकाहमाशौचं। वैश्यानुगमने पक्षिणी। शूद्रानु
गमने त्रिरात्रमाशौचं। कृत्वा समुद्रगायां नद्यां स्नात्वा प्राणायामशतं कृत्वा घृतं प्रा
श्य शुध्येत्। क्षत्रियस्य वैश्यानुगमने त्वेकाहं। शूद्रानुगमने पक्षिणी। वैश्यस्य शूद्रानुग
मने त्वेकाहं। रोदनस्त्वेवं। असपिंड ×का× स्य दहनादिकरणे पादकृच्छ्रः॥ त्रिरात्रमा
शौचं। अशक्तस्य मरणभये सति शुद्धिः कार्या यथायोग्यप्रायश्चित्तैः। क्षौरस्ना
नपूर्वकं॥ रजस्वला त्रिरात्रमशुचिर्भवति। स्नाने नैमित्तिके प्राप्ते रजोदृष्टौ पा
त्रोत्तरित तोयेन स्नानाच्छुद्धिः। सिक्तमात्रा सवासा वस्त्रपीडनमन्यवस्त्रधारणं वक्त

८० त्वाव्रतानिचरेत्। रजस्वलां ज्वरितां चतुर्थेह्नि अन्या स्त्री सचैलावगाह्यावगाह्याचम्य
दशकृत्वो द्वादशकृत्वो वा स्पृशेत्। अंते वाससां त्यागः ततः सा रजस्वला शुद्धा तथा
दानं कृत्वा पुण्याहेन विशेषतः शुद्ध्येत्। आतुरे स्नान प्राप्ते अनातुरो दशकृत्वः श
तकृत्वो वा स्नात्वा स्नात्वा चम्याचम्यातुरं स्पृशेत्। ततआतुरः शुद्ध्येत्॥ सूति
कायां मृतायां कुंभजमादाय तत्र पंचगव्यं क्षिप्त्वाज्यो हिष्ठा वामदेव्यादि पुण्यैर
भिमंत्र्य ब्राह्मणवचनं कार्यमित्याहुः। तदा सूतिकां रजस्वलां च मलं प्रक्षाल्य स्ना
पयित्वा काष्ठवद्दग्ध्वा ब्राह्मणवचनं लब्ध्वा अस्थिनि विधिवद्दहेत्। जलनमरणं र
जोदर्शनं च कदाचिद्भवति तदाशौचादेरात्रिगणना कारा चौरजोदर्शनादिकं स्या
चेत्। तदा त्रयः पक्षाः। अर्द्धरात्रादर्वाक् दिनमित्येकः पक्षः। रात्रिं त्रिधा विभज्य पूर्व
भागयोर्जननादिकं चेत्। आद्यादिनमित्येकः पक्षः। उदयादर्वाग्दिनमित्येकः पक्षः ८०
एतेषां पक्षाणां देशाचारतो व्यवस्था॥ अतीताशौचे तु स्वाशौचकालादूर्ध्वं

ब्राह्मणादीनां सर्वेषां वर्णानां उपनयनादूर्ध्वं स्त्रीशूद्राणां विवाहादूर्ध्वं भवति। तत्रमा
सत्रये त्रिरात्रं। षण्मासे पक्षिणी। नवमासे त्वेकाहं। ततः परं स्नात्वोदकदाना च्छुद्धिः
। इदं सर्ववर्णसमं। अतीताशौचे स्वाशौचकालत्रिभागादूर्ध्वं स्पृश्याः। जन्मान्यतिक्रां
ताशौचं सपिंडानां नास्त्येव। पुत्रजन्मनि पितुः स्नानमेव॥ देशांतरादवीक्ते देशे
स्वाते स्वाशौचकालादूर्ध्वं श्रुते तद्देशविंशतियोजनाधिकं त्रिधा विभज्याद्यस्व समी
पभागे त्रिरात्रं। ततो दूरभागे पक्षिणी। ततो दूरभागे त्वेकाहं स्यात्। एवं देशकालं पर्या
लोच्य यथात्माशौचं तदेव ग्राह्यं। अत्राप्यहानि न वर्द्धयेत्। देशांतरस्थे मृते स्वाशौच
कालादूर्ध्वं श्रुते सर्वेषां सपिंडानां सचैलं स्नानं न त्रिरात्रादि। मातापित्रोर्मरणे
दशाहादूर्ध्वं दूरदेशेपि संवत्सरादूर्ध्वं शतमपि पुत्राः श्रुत्वा मरणश्रवणादिनमार
भ्य दशाहादिकं यथावर्णं पूर्णमाशौचं कुर्युः। उदकपिंडदानादिकं च महागुरु

८१ मरणे दूरदेशेपि अतीतेब्देपि आ ईवस्त्रोपधायिना तथैवाशौचादिकं कार्यं। स्त्रीपुरुषयोः
परस्परं चैवं। सवर्णोत्तमवर्णासु सपत्नीषु चैवं। देशांतरे कालांतरे च हीनवर्णाया मा
तुः सपत्न्या मरणे तु पुत्रस्य त्रिरात्रं। हीनवर्णसपत्नीषु चैवं संवत्सरे नीतेपि सपत्न्योः
परस्परं चैवं॥ इदं चाशौचं सर्ववर्णसमं। देशांतरगमनमनेकधा स्मृतं। स्मृतिपु
राणकल्पतीर्थे आशौचमध्ये यत्र स्मृतवार्त्ता न श्रूयते। योजनाद्बहिस्तद्देशांतरं। त
त्र योजनद्वयाधिके प्रमाणस्य निषिद्धत्वाद्विधिवशेन विप्रस्य दशाहाशौचविनोविं
शतियोजनैर्देशांतरं। क्षत्रियस्य द्वादशाहाशौचिनश्चतुर्विंशतियोजनं वैश्यस्य पं
चदशाहाशौचिनस्त्रिंशद्योजनं। शूद्रस्य मासाशौचिनः षष्टियोजनं। देशांतरं स्मृ
तं। तथा षष्टियोजनमेकं। चत्वारिंशद्योजनं चतुश्चत्वारिंशद्योजनमन्यं तत्त्रिंशद्यो
जनमपरं। एतानि योग्यतया व्यवस्थितानि इतिके विद्देशकालसुगमदुर्गममा ८१

र्गपर्यालोचनया सर्वेषामविशेषेण भवति। षष्ट्यन्यो योजनदेशांतरं क्षत्रियस्य द्वादशाहाशौचिनश्चतुर्विं
शतियोजनमित्यन्ये। तथान्यानि योजनानि तद्बहिश्च षड्चतुर्द्वियोजनानि त्रीणि देशांतराणि स्मृ
तानि त्रिरात्रपक्षिण्येकाहाशौचविषयाणि। तथा भाषाभेदविशेषः। महागिरिव्यवधानि महान
दीव्यवधानानि त्रीणि देशांतराणि द्वादशाष्टचतुर्योजनानि त्रीणि देशांतराणि। तानि समानि इत्यु
नितानि त्रिरात्रविषयाण्यपि भवंति। तानि भाषाभेदादीनि। त्रीणि पूर्वोक्तचतुर्विधदेशांतरेषु सं
ति चेत्। क्रमेण द्वादशाष्टचतुर्योजनन्यूनानि देशांतराणि भवंति। तत्रोभयोर्भेदमत्र गिरिव्यवधा
नित्रीणि देशांतराणि स्मृतानि। षड्चतुर्द्वियोजनसमानि वा तानि चेत्त्रिरात्रादीनि भवंति। ता
नि भाषाभेदादीनि पूर्वोक्तचतुर्विधदेशांतरेषु संति चेत्। क्रमेण षाड्चतुर्द्वियोजनानि तु ता नि
देशांतराणि भवंतीत्याकूरित्यादि॥ ॥तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयः स्त्रयः। प्रमाण
मंगुलस्यांगुलं वितस्ति द्वादशांगुला। वितस्ति द्विगुणारत्नी तत्किष्कुस्ततो धनुः धनुषां द्वे
सहस्रे भवेत्क्रोशश्चतुःक्रोशं तु योजनं। मातापितृगृहे व्यूढाः याः पुत्र्याः प्रसवे मातापित्रा

८२ दिकानामेकाहमाशौचं। तत्रतस्यामरणेमेर्षांत्रिरात्रंगृहांतरमरणेपित्रोरवं। ग्रामांतरमरणेपक्षिणी॥
असपिंडेगृहेमृतेत्रिरात्रंसपिंडामेकाहं। अन्यस्त्रीषुसपत्नीषुपरपत्नीपरातिषुवपुत्रुस्त्रिरात्रं।सपिंडा
नामेकाहं। असन्निधौपुत्रुरेकाहं।सपिंडानांस्नानमित्यादिधिकाशौचं। असन्निधौन्यूनंइदंचसर्ववि
र्णसमं मातापितृमरणेसर्ववर्णव्यूढपुत्र्यास्त्रिरात्रंतानाशौचेमृताशौचेचवसोदकानांत्रिरात्रंग्रामां
तरेपक्षिणी।मातामहगुर्वाचार्यदौहित्रस्वस्त्रीयसंबंधिश्रोत्रियबहुयज्ञकृत्कतुकर्मकृद्दलिग्याज्येषुगुण
ज्येष्ठेष्वेकग्रामेमृतेषुत्रिरात्रं।ग्रामांतरेपक्षिणी॥अगुणेष्वेकग्रामेपक्षिणी।ग्रामांतरेष्वेकाहं। अनौ
रसेषुपुत्रेषुक्षेत्रजदत्तकादिष्वेकाहं।याज्यर्त्विग्भ्रोगदौहित्रसहाध्यायिसहोपनीतात्मबंधुपितृबंधुमातृबंधु
षुश्वश्वशुरमातुलशिष्योपाध्यायानूचानगुरुपुत्राचार्यपुत्रसुमित्रभागिनेयेषुवस्वस्रभगिनीमा
तामहीषुचमातृष्वसृपितृष्वसृमातुलानीगुर्वाचार्यपत्नीषुचमरणेएकग्रामेपक्षिण्याशौचं।
ग्रामांतरेत्वेकाहं।अगुणवत्सुतुएकग्रामेत्वेकाहं।ग्रामांतरेत्वेकाहंस्नानं॥ ॥उपनयनादर्वा ८२
चीनसंस्कारपूर्वकंवेदाध्यापकोगुरुर्मंत्रज्ञानोपदेष्टाकश्चिउपनयनपूर्वकंवेदाध्यापकआचार्यः

शास्त्रकर्ताचार्यश्चवेदाध्यापकोपाध्यायोवेदैकदेशाध्यापकश्चानूचानोवेदांतवक्तासछात्रवक्ता
नश्रोत्रियएकशाखाध्यायीआत्मपितृष्वसुःपुत्राआत्ममातृष्वसुःपुत्राआत्ममातुलपु
त्राविज्ञेयाविज्ञेयाआत्मबांधवाः।पितुःपितृष्वसुःपुत्राःपितुर्मातृष्वसुःसुताः।मातुर्मातु
लपुत्राश्चविज्ञेयामातृबांधवाः॥ सब्रह्मचारिणित्रिरात्रं।एकाचार्योपनीतःसब्रह्मचारी
स्वराजराजमरणेस्वदेशराजमरणेतुदिनेमरणेदिनांतराशौचं।रात्रिमरणेरात्र्यंतराशौचं
॥ ग्राममध्येशवेस्थितेग्रामस्यतावदाशौचं।क्षत्रियादीनांभूमिरक्षार्थंप्रोषितिका
नामाशौचं।नास्तिभूरक्षार्थमनन्यसाध्येव्यापारेप्रतिवारादोषुरोहितादेर्वाशौचंस्व
विहितेषुप्रपादेनरधिकारएवस्त्रीविप्रार्थंगोरक्षार्थंचस्वग्रामेहतानांविकृताहतानां
सपिंडानांनाशौचं।फलाक्षतेनकालांतरेमरणेसग्रामेश्वरेकुलपतौचमृतेत्वेकाहं।भ
गिन्यांसंस्कृतायांसंस्कृतेभ्रातरिसंस्कृतेपितृजामातरिदौहित्रेभागिनेयेशाल
केतत्सुतेचएतेष्वसवर्णेषुसद्यःस्नानेनशुद्धिः।स्वल्पसंबंधेस्नानंसचैलमित्यादिसर्वं

८३ वर्णसमंसवर्णोत्तमवर्णाभ्यां नष्टभार्यामरणभर्तुरेकाहमाशौचं।जारजस्यत्रिरात्रं।प्रति
लोमगतानां कृतप्रायश्चित्तानामाशौचादिकं कार्यमेव। अकृतप्रायश्चित्तानामाशौचादि
कं नास्त्येव स्वैरिण्या धानामाश्रयस्यत्रिरात्रं सन्निधौ पितु स्त्रिरात्रं।जाताशौचमध्ये तत्स
मततोन्यूने वा जाताशौचे सति ततोन्यूने मृताशौचे सत्यपि पूर्वशेषेणैव शुद्धिः।जाताशौ
चमध्ये मृताशौचे नैव तत्र शुद्धिः।न जाताशौचेन।मृताशौचमध्ये तत्समे ततो न्यूने वा जाता
शौचे मृताशौचे सति पूर्वसूतकस्य स्वाशौचकाले नैव शुद्धिः।जन्ममरणनिमित्तस्व
ल्पकालाशौचमध्ये दीर्घकालाशौचे सति दीर्घकालाशौचेनैव शुद्धिः।न स्वल्पकालाशौचे
न।पितृमृताशौचमध्ये मातृमृताशौचे सति पित्राशौचेनैव शुद्धिः।न मात्राशौचेन पितृमृताशौ
चमध्ये मातृमृताशौचे सति पित्राशौचं समाप्याधिकं पक्षिण्याशौचं कुर्यात्।न पित्राशौचे
नैव शुद्धिः।मृताशौचे त्रिरात्रिमात्रावशिष्टे मृताशौचांतरे सति पूर्वाशौचं समाप्यानंतरं द्व ८३
भ्यां रात्रिभ्यां शुद्धिः।तस्या रात्रेश्चतुर्थयामे मृताशौचांतरे सति पश्चात्त्रिरात्रेणैव शुद्धिः।

न पूर्वाशेषेणैव जाताशौचमध्ये मृताशौचे सति प्रेतमुद्दिश्य दहनोदकपिंडदानादिकं कार्यमेव।
मृताशौचमध्ये जाताशौचे सति जातकर्मादिकं कार्यमेव।मृताशौचे गते कार्यमित्येके।मृताशौ
चयोः सन्निपाते प्रेतकृत्यं कार्यमेव।जाताशौचयोः सन्निपाते जातकर्मादिकं कार्यमेव।तत्र क
र्तुस्तात्कालिकी शुद्धिः।स्त्रीपुरुषमरणकाले एकस्मिन्दहनकाले प्राप्ते सवर्णानां समानधर्मि
णां पत्नीनां पत्या सह दहनं कृत्वा उदकपिंडादिकं पतिपूर्वं पृथक्कार्यं।सापिंड्यं तु पत्युः पश्चान्मर
णे तु च पत्युः पूर्वं कृत्वा पत्न्याः सापिंड्यं कार्यं।असवर्णानां असमानधर्मिणां पत्नीनां दहनादि
कं पूर्वं पृथगेव कार्यं।सवर्णानां समानधर्मिणां सपत्नीनां दहनादिकं सर्वं पृथगेव।पिता पुत्रयोः
सवर्णयोः ॥× सवर्णानां समानधर्मिणां सपत्नीनां च सह दहनोदकदानपिंडादिकं ज्येष्ठपूर्वं पृथगेव×
समानधर्मियोः कपालाग्निना दाह्ययोर्दाहः सहैव वा उदकादिकं पितृपूर्वं पृथगेव।भ्रातृणां स
वर्णानां समानधर्मिणां कपालाग्निना दाह्यानां सहैव दाहः।उदकादिकं ज्येष्ठपूर्वं पृथगेव।अस
मानानां सर्वं पृथगेव।पुंबालकानां भ्रातृणां स्त्रीबालकानां च दहने खनने चैवं। अन्वारोहणं
सर्वजातिस्त्रीणां पतिव्रतानां प्रशस्तं अत्मनो भर्तुश्च सर्वपापक्षयकरं नरकोत्तारणमनेकफ
फलदं मोक्षदं च।स्वर्गति आयुरारोग्यैश्वर्यपुत्रमित्रादिसर्वसंपत्प्रदं।दुःखदारिद्र्यवैधव्यादि

नाशाकरमित्यादिपुराणश्रुतिषु श्रूयते। तत्रान्वारोहणं गर्भिण्या निषिद्धं। ब्राह्मण्यां गर्भिण्यां ब्र
ह्महत्यासमं। क्षत्रियादिजातिगर्भिण्यां क्षत्रियादिजातिवध एव। सवर्णायाः सपत्न्याः स
ह एकचित्यारोहणं कार्यं। ब्राह्मण्या एकचित्यारोहणं कार्यं। ब्राह्मण्या एकचित्यारोहणमे
व न पृथक् चित्यारोहणं कार्यं। क्षत्रियादिस्त्रियो विभर्तुर्दिशांतरमृते पृथक् चित्यारोहण
मेव। असवर्णायाः पृथक् पृथक् चित्यारोहणं कार्यं। तथान्वारोहणमेव कार्यं। अन्वारोहणं
करिष्यामीति संकल्प्य पतिं नत्वा चितिमारुह्य सर्वप्रारुह्य योगं कारयेत्। संकल्पप्रयोगे कृ
ते दह्यमाने भर्तरि तं न त्वाग्निं प्रविशेत्। चितिभ्रष्टा नारी मोहाद्विचलिता च प्राजापत्यं चरेत्।
सहदहने पिंडश्राद्धादौ पाके क्यं काल ऐक्यं न भवति। एकचित्यारोहणे एकदिनमरणे स्त्रियाः
पृथक् सपिंडीकरणं न कार्यं। भर्तुः कृते स्त्रियाश्च कृतं भवति। पृथक् चित्यारोहणे दिनांतर
मरणे सर्वत्र पृथक् पिंडादिदाने योग्यः पुत्रो दद्यात्। पुत्राभावे मिथो दंपती सपत्न्यश्च पत्न्य
भावे तदभावे भ्रातृपुत्रो स्नुषा दुहिता दौहित्र मातामहो परस्परं दत्तः। मातामह्याश्च दौहि
त्र अन्यः सगोत्रः सपिंडः सब्रह्मचारी मित्रं शिष्या गुरुर्बांधवो यन संबंधी वा दद्या

त्। न पुत्रस्य पिता दद्यान्नाग्रजस्य तथानुजः। अपि स्नेहेन कर्तव्या सपिंडीकरणं विना॥ अदत्तानां
तु कन्यानां पितरो दत्तः पत्यभावे दत्तायाः अपि पितरो दत्तः। दौहित्रमातामहो परस्परं दत्तः। माता
मह्याश्च दौहित्रो जामाता श्वशुरो मिथः श्वश्वादिस्नुषा भ्रातरो न मिथो दः। श्वश्वादिस्न
स्नुषापतिपत्न्योः सिद्धो दत्तः। पत्न्यो न परस्परं भ्रातरो न मिथः गुरुशिष्यौ परस्परं। उक्तक
र्माभावे यः कश्चित् कुर्यात्। कुर्वंतः सर्वसंपत्प्राप्तिरिति देवज्ञैर्ज्ञायते। एकादशाहादौ पुत्रो
ज्येष्ठादियोग्यः कुर्यात्। नवश्राद्धानि षोडशश्राद्धानि सभक्तो विभक्तो वा एक एव कु
र्यात्। सपिंडीकरणं तु विभक्ताः सधनाः पुत्राश्चेदेकस्मिन्नेव दिवसे वृद्धिकामाश्चेत्
पृथक् पृथक् कुर्युः। नान्यथा। ततस्तु ध्वंसिव पृथगेव कुर्युः। शूद्रस्यामंत्रकं सर्वं द्विजवत्का
र्यं। सर्वं च गोत्रोच्चारणेन नाम्नैव कार्यं। व्रीह्यादिद्रव्यालाभे फलेन मूलेन पयसा शाकेन
गोधूमेन गुडेन वा कार्यं। दशाहांते कृतस्नायः सपाणिः स्यात्। श्रेनाहिताग्निं यजमा

नं लौकिकाग्निना दहेत्। पत्न्याः पतिपरोक्षे कपालाग्नेरप्यनुज्ञास्ति। दहनकालेऽग्नि
नाशे दग्धकाष्ठैरग्निं मथित्वा दहेत्। दशाहं प्रेतपिंडं दत्वा स्नात्वा भुक्त्वा च सपिंडस्य त्रि
रात्रं। असपिंडस्योपवासः। मत्यादिगुणं प्रेतकृत्यं कुर्वतः स्त्रवयनादर्वाक् स्त्रीसंगमे
चांद्रं। ऊर्ध्वं कार्यं। अन्येषां प्रेताशौचिनां पूर्वं त्रिरात्रं पश्चादुपवासः प्रेतकार्यमकृत्वा
तद्द्रव्यहरस्तत्त्वदर्णवध प्रायश्चित्तं कुर्यात्। देशांतरमरणे पराकद्वयं अष्टौ कृच्छ्रान्वा
कृत्वा दहेत्। दूरदेशांतरगते जीवद्वार्तां पुनः पुनः पर्यालोच्य पुनर्जीववार्तायामश्रूय
माणायां पूर्ववयस्के विंशत्यब्दादूर्ध्वं मध्यमवयस्के पंचदशाब्दादूर्ध्वं अपरवयस्के
द्वादशाब्दादूर्ध्वं चांद्रायणत्रयं त्रिंशत्कृच्छ्राणि वा कृत्वा पालाशवृंतैः कुशैर्वा प्रति
कृतिं कृत्वा दाहाशौचादिक पिंडश्राद्धानि कार्याणि। एवं कृते पुनः स आगतश्चेत्
तं घृतकुंडे निमज्ज्य जातकर्मादि संस्कारं तस्य कृत्वा पूर्वपत्न्या सह विवाहः कार्यः।

अथ श्राद्धक्रमः। तत्रादौ नवश्राद्धं प्रथमेऽह्नि तृतीयेऽह्नि पंचमे सप्तमे नवमे एकादशे
ऽह्नि विहितं तत्र प्रथमे चैकादशेऽह्नि उत्कृष्य तेन वा उत्कर्षणपक्षे तृतीयाहादिषु पं
चाहर्णसंज्ञं। अनुत्कर्षणपक्षे एकादशेऽह्न्येकस्य विकल्पितत्वात्। प्रथमाहादि
षु पंचाहर्णेर्गिसंज्ञं भवति। नवश्राद्धं यद्वा प्रथमाहे तृतीयपंचमसप्तमाहेष्वेक
स्मिन्नवमाहे च एव त्र्यहर्गणसंज्ञं। नवश्राद्धं कार्यं। यद्वा तृतीयेऽह्नि पंचमसप्त
मयोरेकस्मिन्नवमेऽह्नि द्व्यहर्गणमेव कार्यं। अहर्युग्मं तु न कार्यं। एवं नवश्रा
द्धमेकादशेऽह्नि वा कार्यं। तथा षोडशश्राद्धानि नवमिश्रसंज्ञानि कार्याणि। प
पविंशतिरात्र्यांते प्रकुर्यादिति नृसिंहोक्तं। तानि च मासिकानि प्रतिमासं मृतेऽहे
संवत्सरं विहितानि द्वादश। ऊनमासस्तथा द्वादशाहे त्रिपक्षे ऊनषाण्मासे
ऊनाब्दिके चेति चत्वारि एवं षोडशश्राद्धानि भवंति। तत्राद्यमेकादशेऽह्नि

 त्कृष्यविधीयते। तत्रक्रमः। त्रयोदशेऽह्नियच्छ्राद्धं प्रथमंमासिकंस्मृतं। आमेनैवतुकर्त्त
व्यंनपक्वेनकथंचन। त्रिपक्षेद्वादशेपक्षेचतुर्विंशतिपक्षके। पक्षात्रिपंचकंकुर्यादिंसं
मध्यादिपंचके। एकादशाहेद्वादशाहेद्वितीयमासेत्रिपक्षेतृतीयचतुर्थपंचमषष्ठ
मासेन्यूनषष्ठेसप्तमेष्टमेनवमेदशमेएकादशेन्यूनाब्दिकेद्वादशेमासेचेति। ततो
परेद्युः संवत्सरांतेसपिंडीकरणं। ततःपरे द्वितीयसंवत्सरादावाब्दिकं तृतीयसंव
त्सरादौप्रत्याब्दिकमितिक्रमः। यद्वासपिंडपितृयज्ञपार्वणश्राद्धार्थमग्निमान्दशा
हादूर्ध्वंद्वादशाहेत्रिपक्षेवावृद्धिश्राद्धेउपस्थितेवाऽयुष्यस्यानित्यत्वाद्वार्वाक्संव
त्सरात्सपिंडीकरणंकुर्यात्। तत्रषोडशैकोद्दिष्टानिकृत्वैवकार्यं। तत्रैकादशेऽह्नि
त्वारिश्राद्धानिसंभवंति। नवश्राद्धाद्यंनवश्राद्धांत्यंमासिकाद्यंस्वतंत्रैकोद्दिष्टं
चेति। तत्रस्वतंत्रैकोद्दिष्टेक्रियमाणेऽन्येषांतंत्रेणानुष्ठानसिद्धिमिच्छेचेत्सोस्ति

अतश्राद्धेकोद्दिष्टंनवसमिश्रमित्युच्यते। नवश्राद्धधर्मकंनवमिश्रधर्मकंचोभयदोषकं
भवति। ततोविशिष्टंनवश्राद्धंततोविशिष्टंमासिकं। पृथगनुष्ठानपक्षेचादौस्वतंत्रैको
द्दिष्टंकार्यं। तत्रोभयदोषकमेव। ततोनवश्राद्धंततोमासिकं। अेकादशेऽह्निएकादश
ब्राह्मणभोजनंप्रेतोद्देशेनवारुद्ररूपप्रेतोद्देशेनवाकार्यंएकादशरुद्रोद्देशेरुद्रग
णाइतिप्राहुः। वृषोत्सर्गश्चप्रशस्यते। द्वादशाहस्थानेन्यूनमासिकंक्षत्रादिषुभव
ति। संचयनेकृतेमनुष्यलोकात्प्रेतलोकंगच्छतआमेनपाथेयश्राद्धमेकोद्दिष्टेन
विधिनाकार्यं। सपिंडीकरणेकृतेप्रेतलोकात्पितृलोकंगच्छतआमेनपाथेयश्रा
द्धंपार्वणविधिनैवकार्यं। ततःपुण्याहवाचनंकार्यं। संवत्सरादर्वाक्सपिंडीकरणेकृ
तेऽनुमासिकानिपृथक्कार्याण्येकोद्दिष्टवत्। पार्वणवद्वामृताहश्राद्धवदनु
मासिकानिसंवत्सरविमोकश्राद्धंपुण्याहवाचनंकार्यमितिक्रमः अथसन्या
सविधिः सन्यासस्यविधिंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः। गोविंदराजस्यमतं

बोधायनमतंतथा। एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश। अग्निमान्पार्वणेनैव
विधिनानिर्वपेत्स्वयं। कृच्छ्रांश्चचतुरःकृत्वा पावनार्थमनाश्रमी। आश्रमी चेत्तत्कृ
च्छ्रंतेनासौयोग्यतामियात्। आश्रमीव्रतमेकंतुसन्यासेयोग्यतांव्रजेत्। तद्दैवमार्ष
कंदिव्यंपित्र्यंमात्रकमानुषं। भौतिकंचात्मनश्चांतेत्वष्टौश्राद्धानिनिर्वपेत्। केश
श्मश्रुलोमनखान्वापयित्वोपकल्पयेत्। यष्टिंजलपवित्रंतु शिक्यंपात्रकमंडलुं
।अनग्निरग्निमुत्पाद्यानि त्वनेनविधिनाततः। साग्नावेवाग्निमान्कुर्यादपवर्गांत
माहितः। ग्रामांतेग्रामसीमांतेअग्न्यागारेसुरालये। आज्यंपयोदधीत्येतत्त्रिवृ
त्प्राश्योपवासयेत्। अभावेग्नावप्सुवा। ॐभूःसावित्रींप्रविशामि। ॐतत्सवि
तुर्वरेण्यंॐभुवःसावित्रींप्रविशामि ॐ भर्गोदेवस्यधीमहि। ॐस्वःसावित्रीं
प्रविशामिधियोयोनःप्रचोदयात्इतिपच्छोर्धर्चशःसमस्तयावा ॐभूर्भुवः ८७
स्वःसावित्रींप्रविशामितत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियोयोनःप्रचोद

यात्इतिअन्वाधानमात्मानमात्मनाश्रमादाश्रममनुनीयब्रह्मभूतोभवतीतिविज्ञायते।
अथाग्निमुपवासमाधायसमित्पूर्वामोंस्वाहेतिपूर्णाहुतिंजुहुयात्। तेनब्रह्मान्वा
धानमितिविज्ञायते। अनाहिताग्नेरिष्टिःस्तोत्रस्थानेवैश्वानरश्चरुः। अनग्नेश्चा
ग्निवर्जंतुब्रह्मचारिणइष्यते॥ अथाग्निंसमारोप्यगुरवेसर्वस्वंदत्वा ॐभूर्भुवः
स्वःसन्यस्तंमयाइतित्रिरुपांशुत्रिरुच्चैस्त्रिषत्याहिदेवाइतिविज्ञायते। तथाच
कात्यायनः। पंचायुधधरंसौम्यंसर्वाभरणभूषितं। ध्यात्वाहृदित्वनुज्ञातोगु
रूणांप्रेषमीरयेत्। ततोभयंसर्वभूतेभ्योमत्तःस्वाहेतिमंत्रइतिचापांपूर्णमंज
लिंनिनयति ॐसखामांगोपायेतिदंडंगृह्णातियदस्यपारेरजसःपारेरजस
इतिशिक्यं। येनदेवाःपवित्रेणेतिजलपवित्रंसावित्र्याकमंडलुं। सर्वाभिर्व्या
हृतिभिर्ब्रह्मभोजनंगृह्णाति। ततउदुत्यंचित्रंतच्चक्षुर्हंसःशुचिषन्मामित्र=
स्येतिनमःसवित्रइत्यादित्यमुपतिष्ठेत्। तथाचन्यासः। कटिप्रक्षालनंकृत्वा

८८ प्रणवेनमद्दाषहि॥ततः स्नानंप्रकुर्वीतमंत्रवत्तु जलाशये।तिस्रश्चापिसंध्यास्कंअंज
लिंप्रदायॐ भूस्तर्पयामि ॐ भुवस्तर्पयामि ॐ स्वस्तर्पयामि ॐ भूर्भुवःस्वस्तर्प
यामिइतितर्पणंकुर्यात्।अथादितेभानोॐ भूर्भुवःस्वरिल्यंजलिंप्रदायउदु
त्यंचित्रंतच्चक्षुर्हंसःशुचिषदिदं विष्णुर्विचक्रमेतिर्देवोब्रह्मजज्ञानमित्या
दित्यमुपतिष्ठते।ॐ सर्वभूतेभ्योनमइत्यात्मानंप्रदक्षिणीकृत्यनमस्कुर्यात्॥
ॐ आदित्यायविद्महेसहस्रकिरणायधीमहि।तन्नःसूर्यःप्रचोदयात्॥इतित्रिर्ज
पेत्रिकाले।अथभिक्षिष्यन्नुद्वयंतमसस्परीतिचतसृभिरादित्यमुपस्थायमौनी
भूत्वापणागारंसभागारंवाप्रविशेत्।ततःपूर्णमसिपूर्णमिभूयास्सुपूर्णमसिसुपूर्णमिभूयादिति
जप्त्वापुनरावर्ततेशुचौदेशेशुचिर्भूत्वाचतुरःपिंडान्निर्वपेत्।ॐ भूः स्वधानमः।ॐ भुवः स्वधानमः
ॐ स्वः स्वधानमः।ॐ भूर्भुवःस्वः स्वधानमइतिसार्वभौतिकंचतुर्थंशेषंभुक्त्वाप्राणायामा ८८
न्षडाचरेत्ब्रह्मभूयापकल्पतइत्याहभगवान्बौधायनः॥ ॥इतिस्मृत्यर्थसारेसन्यासविधिः॥

॥नात्रशेषसंस्कारः पूर्वमनुष्ठितत्वात्॥सर्वसंगनिवृत्तस्यध्यानयोगरतस्यचानतस्यदहनंकार्यं
नाशौचंनोदकक्रियेति॥ अथसन्यासिनांदहनविधिः॥भूमिखातेखातेसन्निकृष्टेसन्यस्ते
पितर्युपरतेसुतैर्दहनंतस्यकर्तव्यं॥यच्चान्यच्छेषसंज्ञितंतस्यसमीपेग्निंप्रज्वाल्ययतेर्दक्षिणह
हस्तेउपावरोहेत्यवरोह्यतस्याग्निंपुत्राःपितृविधानतोग्निहोत्रविधानेनसावित्र्यावाप्रणवेनवा
दहेत्।यतीन्दहन्स्पृशन्वापिजलावगाहनादेवसद्यःशुद्धिःप्राप्नुवंत्यश्वमेधफलं॥ ॥अ
थपरिव्राजकसंस्कारविधिः।ग्रामात्प्राचीमुदीचींवागत्वाब्रह्मवृक्षस्याधस्तान्नदीतीरेवा
शुचौदेशेवादंडप्रमाणंवादेवयजनव्याहृतिभिःखात्वाव्याहृतिभिःप्रोक्ष्यदर्भान्सं
स्तीर्याल्लंकृत्यशवंनिदध्यातिभ्यात्रेहविस्तोहव्यंरक्षस्वेतिइदंविष्णुर्विचक्रमइतिदक्षिणह
स्तेत्रिदंडंनिदधातियदस्यपारेरजसइतिसव्यहस्तेशिक्यंयेनदेवाःपवित्रेणेतिमुखेजल
पवित्रंसावित्र्यांजलिभाजनंभूमिर्भूमिमगान्मेतिगुह्यप्रदेशेकमंडलुंचेतिचित्रिस्रगिरि
दर

तिदशाहोत्तरश्निश्निमंत्रयते। अहन्येकादशेप्राप्तेपार्वणंतुविधीयते। एकोद्दिष्टंनकुर्वीततत्रिदंडानांकदाचन। स
८९ पिंडीकरणंतेषांनकर्तव्यंसुतेनतु। त्रिदंडधारणात्प्रेतत्वंनष्टमोहोशनामुनिः। कुटीचनंसंप्रदहेत्सूरये
तुबहूदकं। हंसंजलेतुनिक्षिप्यपरहंसंप्रपूरयेत्॥ ॥इत्याहभगवान्बौधायनः॥ ॥इतिस्मृत्यर्थ
सारेआशौचप्रकरणं॥ ॥अथप्रायश्चित्तान्युच्यंते॥ ॥तत्रपापिनामचीर्णप्रायश्चित्तानांनर्कांतरे
भोगांतेयेकर्मविपाकाःस्युस्तेउच्यंते। अज्ञानाद्ब्रह्महाम्रगश्वसूकरोष्ट्रादीनांयोनिंयाति। सुपारःख
रपुल्कसवेनानां। स्वर्णस्तेयीविड्वराहादिजन्यक्रमिकीटपतंगत्वं। गुरुतल्पगस्तृणगुल्मलतात्वं
क्रमाद्याति। ज्ञानाद्ब्रह्महाश्वसूकरखरोष्ट्रगोजाविमृगपक्षिचांडालपुल्कसानांयोनिंयाति।
सुपारोबहुविड्क्रमिकीटपतंगपक्षिहिंस्रसत्वानां। स्वर्णस्तेयीऊर्णनाभिकृकलासतिरश्चांवाम्बु
वासिनांहिंस्राणांचपिशाचानांसहस्रशोयोनिंयाति। गुरुतल्पगस्तृणगुल्मलतानांक्रव्या ८९
दानांक्रूरकर्मणांचशतशोयोनिंयाति। तत्संयोगीचतद्वत्। ततोमनुष्यजन्मब्रह्महाक्षयरोगी

सुपारोनिजकृष्णदंतः। स्वर्णस्तेयीकुनखी। गुरुतल्पगः। कुष्ठीतत्संयोगीचतद्वत्। परस्यस्त्रियंद्रव्यं
व्याहृत्वाऽरण्येनिर्जलेब्रह्मराक्षसःस्यात्। अनध्यायेध्यायीबकप्रतिग्राहीच। अन्नंरत्नंवाहृत्वा
अजीर्णव्याधिः। अत्यंतदरिद्रोवा। ज्ञानंदेवंदेवार्चनंपुस्तकंचमूकः। पत्रशाकंबधिरः। हेमरत्ना
निहेमाकारीपक्षी। अत्यंतदरिद्रोवा। न्यासमपहृत्यातिदरिद्रोवा। शुभ्रंगंधान्छुछुंदरिःराज
मूषिका। धान्यानिमूषकः। तैलंतैलपायीकीटः। परस्वहर्तानानातिर्यक्त्वंप्रोप्नोति। अकृतंहवि
रश्नन्हरन्श्वाचदुःखीच। यानंहरन्नुष्ट्रः। फलंकपिः। जलंप्लवः। पतंगोवापक्षीमत्स्योवा। गृहो
पस्करंगृहकारीकीटः। मधुदंशाकीटः। मांसंगृध्रः। गांगोधासर्पोवा। अग्निंबकः। वस्त्रंकुष्ठीप
तंगोवा। रसंश्वा। लवणंचीरिकीटः। तैजसंमंडली। गोदेवब्रह्मस्वंपांडुरोगी। न्यासंकाणोल्प
सोवा। शय्यांक्षपक्षणकः। शंखंमुक्तिरत्नकपाली। दीपंकौशिकः। स्नेहंक्षयी। परस्वंपरप्रेष्यः।
यद्यदपहरतितत्तदाकारःप्राणीजायते। नतत्साध्याविकक्रोश्वा। ब्राह्मणींगछन्नूनिर्बीजी। मा
तरंस्नुषांवावीतवृषणः। चांडालीपुल्कसीवाजकरः। प्रव्रजितांमरुपिशाचः। शूद्रांदीर्घकी

टः॥सवर्णादरिद्रः॥राजस्त्रियंनपुंसकः॥गांगच्छन्मंडूकः॥पान्यमिश्रकोनिरिक्तांगः॥पिशुनोदुर्गंधनासि
१० कः॥सूचकोदुर्गंधास्यः॥देवब्राह्मणाक्रोशकोखलतिः॥गरदाग्निदावुन्मत्तौ॥गुरुप्रतिहंतापस्मारी॥रो
गीवा॥गोघ्नोंधः॥धर्मपत्नींमुक्त्वान्यत्रप्रवृत्तः॥शब्दवेधीव्रणीकुंडाशीभगाक्षः॥स्त्रीपण्यजीवीषंढः॥
कौमारदारत्यागीदुर्भगः॥मृष्टैकाशीवानरः॥वातगुल्मीवा॥अभक्ष्यभक्षकोगंडमाली॥क्रूरकर्मा
वामनः॥मित्रध्रुक्क्षयी॥मातापित्रोराक्रोशीखंडकारः॥अन्नतवाक्स्खलद्वाक्॥कूटसाक्षीउच्छिन्नजं
घाचरणः॥विवाहेविघ्नकर्ताविच्छिन्नांगः॥गोदारणच्छिन्नहस्तः॥चतुष्पथेविण्मूत्रविसर्गेमूत्रकृच्छ्री॥
कन्यादूषीषंढः॥ईर्ष्यालुर्मैशाकः॥पित्राविवदमानोपस्मारी॥विद्याविक्रयीपुरुषमृगः॥वेदविक्रयी
द्वीपी॥बहुयाजकोजलप्लवः॥अयाज्ययाजकोवराहः॥अनिमंत्रितभोजी॥वायसः॥इतस्ततोरम
न्मार्जारः॥कक्षनवगाहीखद्योतः॥दारकाचार्योमुखविगंधः॥पर्युषिताशीकृमिः॥अदत्तादायी
बलीवर्दः॥मत्सरीभ्रमरः॥अग्न्युत्सादीमंडलकुष्ठी॥शूद्राचार्यःश्वपाकः॥वार्द्धुषिकोंगहीनः॥ १०
अविक्रय्यविक्रयीगृध्रः॥राजक्रोशकोगर्दभः॥अनध्यायेनध्यायीशृगालः॥मत्स्यवेधको

गर्भीयासीसादान्यन्पूर्वगमनानि॥ ॥स्त्रियोप्येतेषुनिमित्तेषुतत्तज्जातिषुजायंते॥इदानींतत्पापकानांप्रा
यश्चित्तोन्मुखार्थंपूर्वजन्मकर्मविपाकाःदर्शिताः॥ब्रह्महासुरापोब्राह्मणसुवर्णस्तेयीगुरुतल्पगःएतेमहा
पातकिनः॥अष्टंनसंयोगीपंचमस्तद्वत्॥साक्षात्कर्तुरनुग्राहकः॥आज्ञापिताप्यर्थस्थिताउपदेष्टावेप्र
योजयितेतिस्वार्थंपरार्थंवानुमता॥अनिमित्तनिर्भर्त्सनसंताडनार्थहरणादिनाकोपजननयत्सनिमि
त्तैकर्ता॥तत्रकर्तृषुसाक्षात्कर्तुरनुग्राहकस्याल्पदोषस्तस्मात्प्रयोजकस्यतस्माच्चोपदेष्टुःप्रयोज
कादनुमंतुस्तस्मान्निमित्तकर्तुरल्पप्रायश्चित्तंचतद्वत्॥अथानुपपातकानि॥ब्रह्महत्यासमानि॥या
गस्थस्यक्षत्रवैश्ययोर्वधः॥शरणागतस्यच॥रजस्वलायाःगर्भिण्याश्चात्रिगोत्रायाअविज्ञातगर्भस्यच॥
सुहृन्मित्रस्यवधः॥विप्रगुरुविषयज्ञाताज्ञातिमिथ्याभिशंसनमधिक्षेपः॥सकृन्मत्यानिबंधश्वरा
जगामिपिशुनगुरोर्महाद्वेषोनास्तिक्याद्वेषनिंकुशास्त्रीतंत्र्यानावेदनाशश्च॥ ॥अथसुरापा
नसमानि॥लसुनविड्वराहछत्राकग्रामकुक्कुटगृंजनादीनांमत्याभक्षणंगुरुविषयेअमत्याभि
शंसनेनापवादर्दत्वं॥मत्याविदितामत्युकर्तृलजैल्पंकौटिल्यंतद्वत्॥आत्मोत्कर्षणार्थंराजकुला
दावनृतोक्तिः॥उदक्याचावक्रास्वादामित्रवधः॥कूटसाक्ष्यंवेदत्यागोवेदनिंदाचोतयोरन्नाशुक्तिः॥

॥ ॥अथस्वर्णस्तेयसमानि॥ ॥ब्राह्मणसंबंधाश्वरत्नमनुष्यस्त्रीभूधेनुहरणं।निक्षेपस्य चार्वीकसुव
९२ र्णस्तेयसमानि॥ ॥अथगुरुतल्पगसमानि॥ ॥स्नुषाभगिनीसगोत्राचांडालीसखिभार्यांनमजा
तिकन्यासुरेकःसेकः।तथापितुःस्वसारंमातुलानीमातुःसपत्नीस्नुषाभगिन्यौसकामेआचार्य
पत्नीतनयांश्वश्रूंपितृव्यमातामहमातुलश्रो त्रियार्त्विगुपाध्यायशिष्यस्त्रियमुत्तमामुदक्यांनि
क्षिप्तांप्रव्रजितांव्रतस्थामुत्तमांब्राह्मणींसगोत्रींसरणागतांसमातृसखींअंत्यपत्नींस्वधात्रीं
स्वमातरंमातुःस्वसुःसखीमातुलानांसखींचगच्छन्गुरुतल्पगवद्दंडःपतति॥तथापितृमातृ
योनिसंबंधस्तेनोनास्तिकोनिंदितःकर्मत्यागीपतितांतेनस्वपतित्यागिनःपतितपातकसंयो
जकाश्चेति॥अनुपातकानि॥ तत्रयाज्ञवल्क्यः॥ गोवधोव्रात्यतास्तेयमृणानाचान
पक्रिया।अनाहितापण्य-- विक्रयःपरिवेदनं।भृतकाध्ययनादानंभृतकाध्यापनंतथा। ९१
पारदार्यंपारिवित्यंवार्धुष्यंलवणक्रिया।स्त्रीशूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं।ना
स्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः।धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनं।पि

तृमातृसुतत्यागस्तडागारामविक्रयः।कन्यासंदूषणंचैवपरिवेदकयाजनं।कन्याप्रदानंतस्यै
वकौटिल्यंव्रतलोपनं।आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषेवणं।स्वाध्यायाग्निसुतत्या
गोबांधवानांतथैवच।इंधनार्थंद्रुमच्छेदःस्त्रीहिंसौषधजीवनं।हिंस्रयंत्रविधानंचव्यसनं
चात्मविक्रयः।शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणं।तथैवानाश्रमेवासःपरान्नपरिपुष्ट
ता।असच्छास्त्राधिगमनमाकरेष्वधिकारता।भार्यायाविक्रयश्चैवामेकैकमुपपातकं।गो
वधःप्रसिद्धः।कालेऽनुपनीतत्वंव्रात्यत्वं।ब्राह्मणसुवर्णेतरद्रव्यापरस्वहरणंस्तेयं।
गृहीतस्यस्ववर्णादेरप्रदानमृणानपाकरणं।देवर्षिपितॄणांमृणानपाकरणंच।सत्यधि
कारेनग्नित्वं।अपण्यस्यलवणादेर्विक्रयः।सोदरेज्येष्ठेत्रातरिस्थितेकनिष्ठस्यदारा
ग्निहोत्रग्रहणंपरिवेदनं।पणपूर्वाध्यापनंभृतकाध्यापनं।गुरुतल्पगतत्समव्यति
रिक्तपरस्त्रीगमनंपारदार्यं।ज्येष्ठस्यविवाहराहित्येकनिष्ठस्यविवाहःपारिवित्यं।

निषिद्धद्रव्युपजीवनंवा ईर्ष्यं।लवणस्योत्पादनंलवणक्रिया।अनात्रेयागर्भिण्याअपिस्त्रियो
वधः स्त्रीवधः।शूद्रवधोऽविवक्षितक्षत्रवैश्यवधश्च।अराजस्थापितार्थजीवनं।परलोका
ऽबुद्धिर्नास्तिक्यं।ब्रह्मचारिणः स्त्रीसंयोगेव्रतलोपः।देवताराधनार्थंगृहीतव्रतलोपश्च।अ
पत्यानांविक्रयोऽस्य दासीभावार्थं।आत्मनोभार्यायाश्च।तडागारामोपवनादेश्च विक्रयः।द्र
व्ययग्रहणेन।व्रीह्यादिधान्यानांस्तेयं।असासंत्रपुसीसादिकुप्यंचागवादेःपशोश्च।जातिदु
ष्टशूद्रादीनांकर्मदुष्टव्रात्यादीनांचयाजनंभोजनंचोभयत्र।अपतितानांपितृमातृसुतानां
गृहांनिर्गमस्त्यागः।अंगुल्यादिनायोनिविदारिणंकन्यादूषणं।परिवेदकयाजनंतस्मैकन्या
प्रदानंच।स्वगुरौकौटिल्यं।देवर्षिपितॄणामृणानपाकरणंच।आत्मार्थंपाकादिक्रिया।म
द्यपस्त्रियश्चोपभोगः।कुटुंबरक्षार्थमसच्छास्त्रपठनात्स्वाध्यायस्यपरित्यागः।श्रौतस्मा १२
र्ताग्नीनांचसंस्काररधकरेणान।सुतस्यचशाको।बांधवानांचपातकादिदृष्टकार्यार्थमाई

द्रुमच्छेदः।भार्यापण्यंभवनंप्रयुज्यतेनलब्धोपजीवनंस्त्रीजीवनंच।स्त्रीधनोपजीवनंच।प्राणिव
धेनजीवनंवाहिंसाजीवनं।वश्याद्यंत्रौषधिजीवनं।तिलादिपीडनार्थंहिंस्त्र नंच।व्यस
नानिमृगयादीन्यष्टादश।शूद्रसेवाशूद्रप्रेष्यंहीनेषुमैत्रीहीनस्यसख्यं।अकृतसवर्णविवा
होहीनवर्णविवाहोहीनयोनिनिषेवणं।साधारणस्त्रीसंभोगोगृहीताश्रमित्वमनाश्रमित्वं
परपाकरतिःपरान्नपरिपुष्टता।चार्वाकादिग्रंथाभ्यासोऽसच्छास्त्राधिगमः।सुवर्णाद्युत्प
त्तिस्थानेषुराजाज्ञयाधिकारित्वंआकरेष्वधिकारित्वं।अभिचारश्चालशुनादेरमत्या
भक्षणमित्यादीनि॥ ॥अथजातिभ्रंशकरसंज्ञानि॥ब्राह्मणस्यानुजकरणं।आघ्रे
यमद्ययोर्घ्राणं।जैह्म्यंपुंसिमैथुन्यं।अथसंकरीकरणानि।खरवरोष्ट्रमृगहस्त्यजावि
मीनाहिमहिषाणां।अन्येषांग्राम्यारण्यानांपशूनांवधः।अथापात्रीकरणानि।निंदितेभ्यो
धनादानंवाणिज्यंशूद्रसेवनं।कुसीदजीवनमसत्यभाषणं।अथमलिनीकरणानि।बकु

कृमिकीटजलस्थलजीवानांहत्यामद्यानुगतेभाजनंबहुफलेंधनपुष्पस्तेयं।अधैर्यंच।अन्या
९२ निपापानिप्रकीर्णसंज्ञानि॥ अथमहापातकप्रायश्चित्तानि॥ अज्ञानाद्ब्राह्मणंहत्वा
बालवाल्कलचीवरादिवासाजटीवापिस्वेनघातितस्यब्राह्मणस्यशिरःकपालंचिह्नार्थंतदला
भेन्यस्यवानाथब्राह्मणस्यवा।तदन्यदेवंशिरःकपालध्वजदंडौधारयन्वन्यैःपत्रादिभिरेकवारंप
चामात्रादिषुमितताशीसंत्यक्तस्त्रीकाकंस्नायीसंध्योपासनंविधिवन्मंत्रपूर्वकंकुर्वन्।अध्य
यनाध्यापनप्रवचनयागदानयाजनप्रतिग्रहादिवर्जयेत्।ब्रह्मचारीस्त्रीमधुमांसगंधमाल्यादि
वानिद्राजनाभ्यंजनोपानहछत्रकामक्रोधलोभमोहहर्षनृत्यगीतपरिवादादिवर्जयेत्।सर्व
भूतहितआचार्यसंदर्शनेयथोपक्रमस्थानासनाभ्यांविहरन्तीर्थान्युपवसन्वनेवापुण्या
श्रमेवाकुटींकुर्वन्वानिवसन्ग्रामांतेगोव्रजेवावृक्षमूलेवानिवसन्द्वादशाब्दमेवंव्रतंचरित्वा ९२
शुद्धिः।यदिवावन्यैर्नजीवतितदाभिक्षार्थंग्रामंप्रविशेत्।तत्रलोहितकेनमन्मयखंडश

रावेपावागृहद्वारिस्थितो।ब्रह्महास्मीतिस्वपापंप्रख्याप्यसप्तागारंएकाएकाविवेकेनवाचातु
र्वर्ण्यंत्रैवर्णिकंवाभिक्षांयाचयित्वैककालमेवमिताशीद्वादशाब्दंव्रतंचरित्वाशुद्धिः।यद्वाद्वा
दशाब्दंनियतःप्राजापत्यकृच्छ्रंनिरंतरमावृत्यषष्ठ्यधिकत्रिशतंचरित्वाशुद्ध्यति।द्विती
येब्रह्मवधेद्विगुणंप्रायश्चित्तं।तृतीयेत्रिगुणं।चतुर्थेनिष्कृतिः।यद्वाचतुर्थादिषुप्रति
पापंगोसहस्रंनिर्दह्नोग्निप्रवेशंमरणंकुर्यात्।अशीतिर्वाब्राह्मणांस्वयमेववरेचेयुः।गुरुप्रा पं॰५
यश्चित्तेलघुप्रायश्चित्तस्यां।तर्भावप्रसंगादनुष्ठानाशुद्धिः।सोमयागस्थब्राह्मणवधेद्वि
गुणव्रतं।तदशक्तौगवांसहस्रंविधिवत्पात्रेभ्योदद्यात्।आचार्यवधेद्वादशाब्दव्रतं
गोसहस्रंच।उपाध्यायवधेगवक्रनूचानेषुऋत्विग्वधेद्वादशाब्दव्रतादूर्ध्वंगोसहस्रंपा
दोनमर्द्धपादंचरेत्।इत्यादिब्रह्महननेतारतम्यंकल्प्यं।तथार्त्विक्क्षत्रंगुरुवधेयाव
ज्जीवंव्रतंचरेत्।त्रिगुणंचतुर्गुणंवा।तदशक्तौद्वादशाब्दं।व्रतंकृत्वागोसहस्रंकुर्या

९४ त्। अथ यदि द्वादशाब्दं चरन्मध्ये चोरव्याघ्रादिभिर्हन्यमानमेकं वात्मानमंतरेण कृत्वा रक्षेत्। असाव
संक्षादशाब्दोपि तदैव शुद्धिः। यदि च तत्र हन्यमानयोर्गुणविशेषेण प्रायश्चित्तविशेषो ज्ञेयः। त
त्र प्रवृत्तस्तद्दरूत्वैवं म्रियेत तथापि तदैव शुद्ध्येत्॥ ज्ञानब्राह्मणवधे चत्वारो वर्णा भृगुप
तनमग्निपतनं वा कुर्युः। तत्र ये त्रैवर्णिकाः इष्टप्रथमयज्ञास्तेग्निपतनोः स्वर्जितो गुणादि
पराश्वमेधादिमहायज्ञावभृथे यजमानसन्निधौ स्वपापमंजलिं जां प्रख्याप्य तैरनुज्ञाताः
स्नात्वा तदैव शुद्ध्येत्। यद्वा व्रतमध्ये कुष्ठादिदीर्घतीव्रव्याधिग्रस्तब्राह्मणं गां चौषधेः सं
रक्षेत्तदैव शुद्ध्यति। यद्वा व्रतमध्ये विप्रस्य स्वं हेमादि सर्वस्वं चोरैर्हृतं सर्वं दत्वा शुद्ध्येत्। त
त्र प्रवृत्तस्तैर्हतो वा बहुक्षतो मृतकल्पो जीवन्नपि तथैव शुद्ध्येत्॥ ज्ञाना ब्राह्मणव
धे चतुर्वर्णी भृगुपतनमग्निपतनं वा कुर्युः। तत्र ये त्रैवर्णिकाः इष्टप्रथमयज्ञास्तेग्नि ९४
पतनं वा स्वर्जितं गोसवमभिजिद्विश्वजितो त्रिवृदग्निष्टुतो वत्रतं वा क्रमेणाल्पदक्षि

णान्कुर्युः। क्षत्रियः सार्वभौमश्चेदश्वमेधं कुर्यात्। अथ ज्ञानावर्णिकाः साग्निका महापापं कु
र्युः। तदग्निना दोषक्षयात्तत्पुत्रादयो रक्षेयुः। ज्ञानाग्ने कृत्वाग्निं शमयेत्। वैतानिकानप्सु
प्रक्षिपेत्। ततोग्निना प्रायश्चित्ताकरणे कुर्वीतां मरणान्चैवं। सपरिच्छेदं। अविद्वांश्चेन्निर्धनो
गुणी हंता हतो निर्गुणोरण्ये नियतस्त्रिवारं वेदं जपेत्। तदशक्तश्चेद्वेदं जपन्योजनशतं व्रजे
त्। अविद्वांश्चेन्निर्धनो गुणी प्लक्षप्रस्रवणात्पश्चिमोदधेः प्रतिस्रोतः सरस्वतीं हविष्यमि
ताशी गच्छेत्। निर्गुणो धनी हंता चेत्पात्रे भूम्यादिजीवनसमर्थं दद्यात्। गृहावासोपस्का
रमुज्जीवसमर्थं दद्यात्। अनपत्यश्चेत्सर्वस्वं प्रयच्छेत्। तदीयमन्यतमं गृहीत्वा आहिता
ग्निर्वैश्वानरेष्टिमनाहिताग्निर्वैश्वानरस्थालीपाकं कुर्यात्। हंता मूर्खो निर्धनो विप्रमात्र
वधे धःशायी त्रिषवणस्नायी स्वकर्म वेदयन् भैक्षाशी महानदीसंगमादिषु पुण्याश्रम
गोष्ठपर्वतप्रस्रवणतपोवनविहारिस्थानवीरासनी वत्सरं कृच्छ्रं चरित्वा रत्नहेमगोधान्य

९५ तिलदधिसर्पिर्विविप्रेभ्योदद्यात्।मनसाब्रह्मवधेव्यवसायंकृत्वास्वयमेवोपरतोद्वादशा
हंजलाशीद्वादशाहमुपवसेत्॥इत्याद्यत्रसमेष्वपिविकल्पोविषयेषुव्यवस्थाकल्पनीया॥उ
क्तानिद्वादशाब्दादीनिब्राह्मणस्यैवद्विगुणं।क्षत्रियस्यत्रिगुणं।वैश्यस्यशूद्रादेश्चतुर्गुणं।
तत्रापिहंतृहन्यमानयोर्गुणविशेषेणप्रायश्चित्तविशेषोज्ञेयः॥एवंक्षत्रियवैश्यादाव
पिहीनोत्कृष्टवधेप्रायश्चित्ततारतम्यं।दंडगोरवात्कल्प्यं।अनुलोमप्रतिलोमजानांतु
दंडवत्प्रायश्चित्तंग्रहस्थात्।द्विगुणंब्रह्मचारिणोवानप्रस्थस्यत्रिगुणं।ब्रह्मचारिणो
द्विगुण्यंषोडशाब्दादूर्ध्वमेव।सर्वत्रप्रक्रांतप्रायश्चित्तस्यमरणेतदैवशुद्धिः॥ अथाति
देशः॥सोमयागस्थक्षत्रवैश्यवधेब्रह्महत्याव्रतंद्वादश्याब्दंचरेत्।ज्ञानाद्वैगुण्यमेव।न ९५
प्राणांतिकं।तत्रचज्ञातिशक्तिगुणाद्यपेक्षयाव्यवस्थासर्वत्र।स्त्रीपुंनपुंसकत्वेनावि
ज्ञातगर्भस्यवधेतुमत्यात्रेयी।अत्रिगोत्रावात्रेयीतस्याश्चवधेयथावधेपुरुषहत्या

वत्।व्यवहारेसाक्षात्सत्योक्त्यावर्णानांवधप्राप्तौसाक्षीच।गुरोःक्रोधावेशीच।ब्राह्मणनिक्षेपहृच्च।आहिताग्निब्रा
ह्मणभार्याचसगुणा।सोमयागस्थांघातकोब्रह्महत्याव्रतंचरेत्।अतिदेशेषुपादोनंप्रायश्चित्तं॥ ॥प्रायश्चि
त्तातिदेशोनापातित्यस्यच।ब्राह्मणादिवधार्थशस्त्रप्रहारेकेनचिन्मतिबंधेनासौनमृतः।तथापिब्रह्महत्यादिव्र
तंपादोनंचरेत्।आगतमनेर्द्धमप्यलेपादः॥ब्रह्महत्यासमानानामर्द्धप्रायश्चित्तंसर्वत्र।साक्षात्कर्तुरनुग्राहक
स्यपादोनं।प्रयोजकस्यार्द्धं।अनुमंतःसार्द्धपादः।निमित्तकर्तुःपादंप्रोत्साहकादीनांतुतरतम्येनविंद्यात्।सर्व
त्रबालवृद्धस्त्रियोरोगिणश्चसाक्षात्कर्तृत्वेपिप्रायश्चित्तार्द्धमर्हंति।अशीतिवर्षादूर्ध्वंवृद्धः।षोडशाब्दात्प्राग्बा
लः।अनुपनीतानांबालकानांकन्यानांचपादप्रायश्चित्तं।तत्रपिताभ्रातावान्योवासुहृत्सुतश्चरेत्।तेतो
द्वादशाब्दांतेतेश्चाचरेयुः।ऊर्ध्वंस्वयमेवचरेयुः।सर्वंचजातिशक्तिगुणाद्यपेक्षयाव्यवस्था॥ ॥इतिस्मृ
त्यर्थसारेब्रह्महत्याप्रायश्चित्तं॥ ॥अथसुरापानप्रायश्चित्तं॥ ॥तत्रमुख्यासुरापैष्टीगौडीमा
ध्वीच।तत्रसुरांत्रैवर्णिकास्तथाशूद्रस्त्रीचचातुर्वर्ण्येविवाहेउत्पाद्यापिनपिबेत्।यदिसुरांज्ञानास
कृत्पिबेत्।तत्रसुरांबुगोमूत्रक्षीरघृतानामन्यतममग्निसंभिन्नंपक्त्वाद्रवासालोहेनपात्रेणायसेन

९६ ताम्रेणवापीत्वामरणाच्छुध्येत्। अज्ञानाज्जलबुध्यासुरापानेजटीवाल्कचीरादिवासा ब्रह्महत्याव्रतंतच्चिह्न
वर्जंद्वादशाब्दंसंपूर्णंकुर्यात्। पादोनंसर्वत्रस्त्रीबालवृद्धादीनांचार्धंषडब्दं। अनुपनीतानांकन्यानांचपादं
त्र्यब्दमेवविदध्यात्। ज्ञानाच्चेत्तत्रद्विगुणं। यदिपीत्वाछर्दितवान्त्र्यब्दंरात्रौसकृत्पिण्याकमेवदिवान्नंनाश्नी
यात्। कणान्नंतथैववाद्यात्। सुरापानेताल्वमात्रसंयोगेवर्षंवाल्कवासाजटीध्वजीतथाकुर्यात्। सुरैकौ
षधरोगार्थपानेत्वज्ञानेकृच्छ्रार्धपादंचांद्रायणंवाकृत्वापुनरुपनयनंकार्यं। बालेतुतत्रपितामाताभ्रा
तावाकुर्यात्। ज्ञानेतुसप्तकृच्छ्रपराकंचांद्रायणंचक्रमात्कुर्यात्। सुरासंस्पृष्टपानमात्रभक्षणंचांद्रं। सुरा
भांडोदकपानंचसुरापानमेव। सुरासंस्पृष्टशुष्कस्नान्नस्यमूत्रविड्रेतमांसशवादीनांचज्ञानाद्भक्षणेकार्यंपुन
रुपनयनंच। शुष्कसुराभांडोदकपानेछर्दनेउपवासोघृतप्राशनंच। तज्जलंपर्युषितंपीत्वाशंखपुष्पीविप
क्वंनीरंत्र्यहंपिबेत्। अज्ञानाभ्यासेपंचरात्रंपिबेत्। सुरापस्यमुखगंधस्यामत्याघ्राणेदिनस्त्रुप्राणायामा
न्कुशोदकंचाद्यात्। साक्षात्सुरागंधघ्राणेतुजातिभ्रंशकरेषूक्तं। सांतपनंमत्याचेत्कार्यमिति+सोमपाश्वे×यमि ९६
ति॥ ॥इतिसुरापानप्रायश्चित्तं॥ ॥अथमद्यपानप्रायश्चित्तं॥ ॥तत्रगौडीमाध्वीचसुरा। म

द्यंतालंपानसंज्ञाक्षंमाध्वीकंखार्जूरंसैरमारिष्टंमैरेयंनारिकेलमेतान्येकादशमद्यानिविद्यात्। एतानि
मद्यादीनिउत्सत्यादिब्राह्मणानांस्त्रीणांवानुपनीतस्यकन्यायाश्चापेयानि। क्षत्रियवैश्ययोर्मद्यंनदु
ष्यति। अज्ञानाज्जलबुध्यातालादिमद्यपानेतप्तकृच्छ्रंपुनरुपनयनंच। मूत्राविड्रेतःप्राप्तशवादिमद्यस्पृष्ट
पानांचेवं। अज्ञानागौडीमाध्व्योःज्ञानात्तालादिमद्येषुपानेचकृत्वातिकृच्छ्रंचांद्रायणंचकृत्वा
पुनरुपनयनंघृतप्राशनंचा। गौडीमाध्व्योर्ज्ञानात्पानेतुपिण्याकेनकणैर्वात्रैवार्षिकं। अत्यंताभ्यासेषडब्दं।
अत्यंताभ्यासेनिरंतराभ्यासेद्वादशाब्दं। बहुकालाभ्यासेतुअग्निवर्णंमद्यंपीत्वामृतःशुध्येत्। ता
लादिषुतदर्धंकल्प्यं। सर्वत्रस्त्रीबालवृद्धादीनामर्धं। अनुपनीतस्यकन्यायाश्चपादं। मातापितरौभ्रातापि
तावापितेषांकुर्यात्। तालादिमद्यापेयालिह्याभक्ष्यमूत्रविड्रेतःमांसशवादीनांमुखमात्रप्रवेशे
क्षीरोदुंबरबिल्वपलाशकुशोदकंषडात्रंपिबेत्। गौडीमाध्व्योस्तद्द्विगुणं। अज्ञानागौडीमा
माध्वीमद्यवासितशुष्कभांडांबुपानेकुशामूलविपक्वंक्षीरंत्र्यहंपिबेत्। अज्ञानाभ्यासेतुक्षी

९६ रोदुंबरबिल्वपलाशकुशोदकं त्र्यहं। ज्ञानात्वा नैशंखपुष्पीघृतं क्षीरं पंचरात्रं पिबेत्। ज्ञानताभ्यासे तु गो
मूत्रयावकं सप्तरात्रं। अत्यंताभ्यासे ब्राह्मीसुवर्चलां पयसा द्वादशरात्रं। तालादिमद्यपांडोदकपा
नेषु अर्द्धकल्पं। सर्वतः स्त्रीबालादीनां योग्यकल्प्यमित्यादि ॥ ॥इति स्मृत्यर्थसारे मद्यपानप्रा
यश्चित्तं ॥ ॥अथ स्वर्णस्तेयप्रायश्चित्तं। स्तेयशब्देन समक्षं परोक्षं वा बलाच्छौर्येण वा कपटादिना
सहेतुं विना ग्रहणमुच्यते। तत्र सुवर्णप्रमाणमुच्यते। गवाक्षागतसूर्यरश्मिमध्ये दृश्यमानं त्रसरे
णुप्रमाणमुच्यते रजः। त्रसरेणवष्टानां लिक्षा। लिक्षा च लिक्षात्रयं राजसर्षपः। राजसर्षपत्रयं गौ
रसर्षपः। गौरसर्षपषट्कं यवः। यवत्रयं कृष्णलः। कृष्णलपंचकं माषः। माषषोडशकं सुवर्णं। अ
मत्या ब्राह्मणस्य सुवर्णं हृत्वा द्वादशवर्षाणि ब्रह्महत्याव्रतं। शवशिरोध्वजस्तु कपालधारण ९६
रहितं चरेत्। यस्य कस्यापि हिरण्यं यः यः कश्चिद्धरति तस्यैव स का दशगुणं दत्वा प्रायश्चित्तं स
माचरेत्। गुरूणां यज्ञकर्तॄणां श्रोत्रियाणां वा धार्मिकब्राह्मणानां वा सुवर्णं हृत्वाऽऽत्म

नो मुंडनं कृत्वाऽऽत्मशरीरं घृतेनाभ्यज्य करीषाच्छादितो दग्धः शुद्ध्येत्। निर्गुणविप्रसुवर्णहरणे न
वाब्दं नाद्दशमेव वा चरेत्। क्षुत्क्षामकुटुंबरक्षणार्थं हरणे कृच्छ्रषडब्दं स्वर्जिदादिक्रतुं वा कुर्यात्। म
त्वा यः कश्चिद्ब्राह्मणसुवर्णहारी। ऽनेकसुवर्णमारभ्य स्वपापं नृपाय निवेद्य आयसं दंडं खादिरं वा प्र
दाय मुक्तकेशो नृपं राज्ञा सकृद्दंडेन ताडितो मृतो वा जीवन्वा शुद्ध्येत्। स्वशक्त्याऽताडने राज्ञो दो
षः स्यात्। सुवर्णस्तेयी ब्राह्मणो व्रतमेव चरेत्। न दंडेनात्मानं पातयेत्। न च विप्रं राजा हन्यात्। हनने
क्ष ब्रह्महत्या भवत्येव। अग्निहोत्री धार्मिकश्च श्रोत्रियो विद्वान् ब्राह्मणसुवर्णहारी अश्वमेधेन यजेत्।
शुद्धो भवति। गोसवयज्ञेन वा। आत्मसंमितं हेम दत्वा वा शुद्ध्येत्। तावद्धनाभावे तपस्यशक्तो चाविप्र
स्य कुटुंबरक्षणपर्याप्तं धनं दद्यात्। अब्राह्मणश्चेद्ब्राह्मणसुवर्णहारी दंडताडनेनात्ममरणमनिच्छ
सुरापानव्रतं कृत्वा शुद्ध्येत्। यदि च प्रहारानंतरं जातानुतापः प्रत्यर्पयति त्यजति वा तत्रापस्तंबो
क्तं। चतुर्थकालमितं अशनं त्र्यहं। मनसा स्वर्णस्तेये प्रवृत्तः स्वयमेवोपरतश्चेद्द्वादशाहं वायु
भक्षः शुद्ध्येत्। सुवर्णस्तेयसमं अश्वरत्नमनुष्यस्त्रीभूधेनुहरणादिषु सुवर्णस्तेयप्रायश्चित्तं

१८ ईकार्यी। त्रसरेणुप्रमाणहेमस्तेये एकः प्राणायामः॥ लिक्षाप्रमाणस्तेये त्रयः। राजसर्षपप्रमाणहेमस्तेये च
त्वारः॥ षड्वाप्युप्राणायामाः॥ गौरसर्षपप्रमाणहेमस्तेयेष्टसहस्रं गायत्रीजपः। गोमूत्रपक्वयवभुक् मासत्रये
णशुध्येत् जपः॥ यवप्रमाणहेमस्तेये प्रातरारभ्य सायंकालांतं गायत्रीजपः॥ कृष्णलप्रमाणहेमस्तेये सांतप
नं। माषप्रमाणहेमस्तेये गोमूत्रपक्वयवभुक् मासत्रयेण शुध्येत्। सुवर्णप्रमाणात् किंचिन्न्यूनहेमस्तेये गोमूत्र
पक्वयवभुक् संवत्सरेण शुध्येत्। संपूर्णप्रमाणब्राह्मणहेमस्तेये द्वादशाब्दव्रतादिकार्यमित्युक्तं। सुवर्णप्रमा
णान्न्यूनरजतस्तेये सांतपनं। निष्कचतुष्कप्रमाणादूर्ध्वं दशनिष्कांतं रजतस्तेये चांद्रायणं। दशनिष्कप्रमाणादू
र्ध्वं शतनिष्कप्रमाणरजतस्तेये चांद्रद्वयं। शतनिष्कादूर्ध्वं सहस्रनिष्कांतरजतस्तेये चांद्रत्रयं। सहस्रप्रमा
णनिष्काधिकरजतस्तेये पादोनं ब्रह्महत्याव्रतं चरेत्। नागवंगापस्ताम्रपित्तलकांस्यानां सहस्रनिष्कप्रमा
णांतं स्तेये पराकः॥ एतेषां निष्कसहस्रादिमूल्यानां स्तेये ब्रह्महत्याप्रायश्चित्तं द्वादशाब्दिकं। चतुर्निष्कमू १८
ल्यरत्नस्तेये सांतपनं। चतुर्निष्कमूल्यादूर्ध्वं दशनिष्कमूल्यांतं रत्नस्तेये चांद्रत्रयं। सहस्रमूल्यादधिकर
त्नस्तेये ब्रह्महत्याप्रायश्चित्तं। पादोनं नवाब्दं। अब्राह्मणस्य निक्षेपस्य सुवर्णं हृत्वा षडब्दं चरेत्। नराश्वक्षे

मितुरंगहरणे षडब्दं॥ ॥अथ॥ इति सुवर्णस्तेयप्रायश्चित्तं॥ ॥अथ गुरुतल्पगप्रायश्चित्तं॥ तत्र जनको
गुरुः॥ तल्पं तस्य पत्नी भार्योच्यते। अज्ञानेन मातरं गत्वा मातृसपत्नीं सवर्णामुत्तमवर्णां वा तया प्रोत्साहितोऽज्ञानात्।
ज्ञानाद्गत्वा वा पितोलोहीं स्त्रियं सुतप्तामालिंग्य मृतः शुध्येत्। सुतप्तायःशयने सुप्त्वा मृत्वा वा शुध्येत्। उत्प्र
यप्रोत्साहे सुतप्तायःशयने तत्स्त्रियालिंगनाद्बुद्धिः॥ स्वयंप्रोत्साहे गतश्चेत्स्वस्य गुह्यत्रिकं स्वहस्तछिन्नं
स्वांजलिना धृत्वा नैर्ऋतीं दिशं गच्छन्नयतस्थितिमविचारयन् पृष्ठतोऽपश्यन् प्राणांतं गत्वा शुध्येत्। अ
मत्यासवर्णोत्तमवर्णास्त्रीगमने द्वादशाब्दब्रह्महत्याव्रतं चरेत्। अमत्याभ्यासे पतितस्त्यक्तो मुंडितः करी
षराशिमध्यस्थः पादादिसर्वांगदाहान्मृतः शुध्येत्। जनन्याममत्यास्यैवं। जनन्यां मत्या प्रवृत्तौ रेतः
सेकात्प्राङ्निवृत्तस्य द्वादशाब्दं। अमत्या षडब्दं। सवर्णोत्तमवर्णासु मत्या प्रवृत्तौ रेतःसेकात्प्राङ्निवृत्त
स्य षडब्दं। अमत्या मातुः सपत्नीं सवर्णां व्यभिचारिणीं गत्वा वेदजपसहितं चांद्रद्वयं। मत्याब्दं कृच्छ्रं।
क्षत्रियां पितृभार्यां मत्या विप्रः सकृद्गत्वा नवाब्दं चरेत्। मत्याभ्यासे तु वृषणौ विना लिंगछेदाच्छुध्येत्।
अमत्यासकृद्गमने चैव वार्षिकमष्टकालाशनं। अमत्याभ्यासे लिंगं विना वृषणछेदाच्छुद्धिः॥ क्षत्रि

यायांमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तौतत्प्रोत्साहितस्यत्रैमासिकंकार्यं।उभयप्रोत्साहप्रवृत्तस्यअतिकृ
९९ च्छ्रंत्रैमासिकं।स्वेनप्रोत्साहितायांकृच्छ्रातिकृच्छ्रंत्रैमासिकं।तत्रैवमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृ
त्तस्ययोषिदुभयप्रोत्साहप्रोत्साहेषुक्रमादतिकृच्छ्रतप्तकृच्छ्रचांद्राणि।वैश्यायांगुरुत्वांमत्यासकृद्गमने
षडब्दंचरेत्।मत्याभ्यासेलिंगार्धच्छेदनाच्छुद्धिः।अमत्यासकृद्गमनेत्र्यब्दं।अमत्याभ्यासेयावज्जीवं
व्रतंचरेद्।वैश्यायांमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तस्योभयथात्मायोषित्प्रोत्साहेषुक्रमात्तप्तकृ
च्छ्रपराकसांतपनमासानि।अमत्याप्रवृत्तस्ययोषिदुभयात्मप्रोत्साहेषुक्रमात्पंचरात्रसप्तरात्रा
र्धरात्राणि।शूद्रांगुरुभार्याभिसामत्याविप्रःसकृद्गत्वात्र्यब्दंचरेद्।मत्याभ्यासेद्वादशाब्दं।अम
त्यासकृद्गमनेब्दंकार्यं।मत्याभ्यासेनिरंतरंचांद्रत्रयं।शूद्रायांमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्नि
वृत्तस्ययोषिदुभयात्मप्रोत्साहेषुक्रमादतिकृच्छ्रतप्तकृच्छ्रपराकाः।तत्रैवामत्याप्रवृत्तस्यकार्यं ९९
सांतपनंसप्तरात्रोपवासः।एवंक्षत्रियपुत्रस्यवैश्यायांमातरिमत्यासकृद्गमनादिषुनवाब्दादी
नियोज्यानि।वैश्यपुत्रस्यचशूद्रायांचनवाब्दादीनियोज्यानि।सर्वत्रगमनंचरमधातुविसर्गो

नमुच्यते।सर्वत्ररेतःसेकात्प्राङ्निवृत्तौमरणांतिकेद्वादशाब्दमन्यत्रोक्तार्धंकार्यं।पुरुषवत्स्त्रीणांमहापातक
निसंत्येव।अतस्तासांमत्याप्रवृत्तौमरणांतिकंप्रायश्चित्तं।अमत्याप्रवृत्तौद्वादशाब्दादिषुसर्वत्रार्धंचर
कृत्वार्धकःस्यात्।योज्यं।पुरुषोक्तवत्कार्यं।जात्युक्तंपारदार्यंचकन्यादूषणमेवच।साधारणस्त्रियांनास्ति
गुरुतल्पत्वमेवच॥ ॥अथातिपातकानिउच्यंते।उपपातकानिउच्यंते।मत्यासमानगोत्रांसमान
प्रवरामूढांगत्वागुरुतल्पगव्रताच्छुद्ध्येत्।तज्जोगर्भश्चांडालःस्यात्।सापत्नीसंभोगेत्याज्यारस्यैव।
अमत्योढांगत्वात्रिचांद्रैःशुद्ध्येत्।गर्भःकश्यपःस्यात्।सवर्णकन्यांमित्रस्त्रियंभगिनींसजोषांस
मानगोत्रांचंडालींमातंगींवामजस्त्रियंसकृद्दशानाकृत्वाचांद्रद्वयाच्छुद्ध्येत्।ज्ञानात्सकृद्गमनेकृ
च्छ्राब्दाच्छुद्धिः।आसामन्यतमासेवाभ्यासात्तोबहुवारंगत्वाब्रह्महत्याव्रतं।त्रैवार्षिकंचरेत्।आ
सामन्यतमानेमकदिनेषुगत्वाब्रह्महत्याव्रतंषडब्दंचरेत्।आसामेकांबुद्धिपूर्वंबहुदिनेषुगत्वा
ग्निंप्रविश्यमतःशुद्ध्येत्।मातृष्वसारंपितृष्वसारंआचार्यभार्यांआचार्यपुत्रींअनुजपत्नींनिजा
मसुतांमातुलानींसकृद्दत्तानाकृत्वाअब्दकृच्छ्रेणशुद्ध्येत्।आसामेकामेकस्मिन्दिनेबहुवारंग

त्वा त्रैवार्षिकं ब्रह्महत्याव्रतं चरेत् आसामेकां बहुदिनेषु अनुबंधनबुद्धिपूर्वं गत्वा ब्रह्महत्याप्रायश्चित्तं कु
१०० र्यात्। आसामेकां सकृत् ज्ञानाद्गत्वा त्रैवार्षिकं ब्रह्महत्याव्रतं चरेत्। आसामेकामेकस्मिन्दिने स
कृत् ज्ञानाद्गत्वा षड्वर्षं ब्रह्महत्याव्रतं चरेत्। आसामेकां बहुदिनेषु बुद्धिपूर्वं गत्वाग्निं प्रविश्य म
तः शुध्येत्। चंडाली पुल्कसी व्याधस्त्रियं भगिनीं स्नुषां मातृष्वसारं पितृष्वसारं सखीं विश्वस्तां प्रव्रजि
तां मातुलानीं शरणागतां मंतः पुरस्त्रियं शिष्यपत्नीं गुरुपत्नीं पतितां सगोत्रां च गत्वा रेतो निःसरणात्पू
र्वं निवृत्तस्य मासोपवासेन शुद्धिः। चांद्रायणेन वा। एतासु व्यभिचारिणी यदि सकृद्गच्छेत्तदा चांद्रायणे
न शुद्धिः। अज्ञानात्तां स्त्रियं संस्कृत्य गत्वा तप्तकृच्छ्रेण शुद्धिः॥ इति गुरुतल्पगप्रायश्चित्तं॥ अथ म
हापातकिसंसर्गिप्रायश्चित्तमुच्यते। एतैर्महापातकिभिश्चतुर्भिरध्ययनाध्यापनविवाहादियजनया
जनसहभोजनानि कृत्वा सद्यः पातित्यमाप्नोति॥ एतैरेकासनस्थितिमेकपंक्तिभोजनमेकशयन १००
स्थापनमेकवाहनगतिं च एकसंवत्सरं चैव कृत्वा पातित्यमाप्नोति। येन महापातकिनायः संसर्गपि

तितः स तस्योक्तव्रताच्छुध्येत्। अस्य मरणोत्पादकप्रायश्चित्तस्थाने ब्रह्महत्याव्रतं द्वादशाब्दिकं स्यात्। अज्ञा
नाद्यस्येयेन संसर्गो जातस्तस्य तदुक्तव्रतार्धाच्छुद्धिः। अज्ञानाच्चतुर्भिर्महापातकिभिः पंचरात्रसंस
र्गे त्रिरात्रं दशरात्रसंसर्गे कायं कृच्छ्रं द्वादशरात्रसंसर्गे सांतपनं। पक्षसंसर्गे दशोपवासाः। मासंसंस
र्गे पराकः। त्रिमासे संसर्गे चांद्रं षण्मासंसंसर्गे चांद्रद्वयं। किंचिन्न्यूनाब्दे नैरंतर्ये संसर्गे षण्मासकृच्छ्रं
। ज्ञानाच्चतुर्भिर्महापातकिभिः पंचाहसंसर्गे कृच्छ्रं। दशाहसंसर्गे तप्तकृच्छ्रं। द्वादशाहसंसर्गे दशोप
वासाः। पक्षसंसर्गे पराकः। मासंसंसर्गे चांद्रं। त्रिमाससंसर्गे कृच्छ्रं चांद्रं। षण्माससंसर्गे त्रिमासकृ
च्छ्रं। किंचिन्न्यूनाब्दसंसर्गे चांद्रायणाब्दं। एतेश्चतुर्भिः संसर्गे स्त्रीबालवृद्धातुरास्तदुक्तव्रतार्धं कु
र्युः। महापातकिसंसर्गिसंसर्गे तु तत्संसर्गिव्रतस्यार्धं कार्यं॥ इति स्मृत्यर्थसारे संसर्गिप्रायश्चि
त्तं॥ अथोपपातकप्रायश्चित्तान्युच्यंते॥ अज्ञानाद्ब्राह्मणस्य गोमात्रं ब्राह्मणो हत्वा
त्रिरात्रमुपोष्य वृषभैकादशगां दत्वा शुध्यति। द्वादशप्राजापत्यैर्वा। प्रत्याम्नाये द्वादशधेनूर्वा
दत्वा शुध्यति। ज्ञानाच्चेद्गोहंता गोगर्भमनस्थानासनशयनेषु स्वयं च तथा कुर्वन्नुभयव्याधिक्ष

१००१ त्पिपासाशीतादिभ्योरक्षन्गां सीयपरकीयभक्ष्यपानेषु वास्यन्नवदन्त्रा चैगांनत्वावीरासनेनोनवशाकाद्या
हारोमासत्रयांतेवृषभैकादशगांदद्यात्। अशक्तःसर्वस्वंदत्वाशुद्ध्यति। प्राजापत्यप्रत्याम्नायपक्षेतु
पूर्वोक्तद्विगुणं। अज्ञानात्क्षत्रियस्यगोमात्रंहत्वागोहितोगोनुगामीगोष्ठशायीत्रिषवणस्नायीसं
यतःपंचगव्यंपिबेत्। मासांतेधेनुंदत्वाशुद्ध्येत्। षड्प्राजापत्यैर्वाप्रत्याम्नायेषड्धेनवोदेयाः। ज्ञानाच्चे
च्चतुर्थकालेहविष्यमक्षारलवणंमिताशी अनुगोमूत्रस्नायीहोमासेनीत्वाशुद्ध्येत्। प्राजापत्यप्रत्या
म्नायोचेद्द्विगुणो। अज्ञानाद्वैश्यगोमात्रंहत्वागोहितादिकृदतिकृच्छ्रंचिरतरंचरन्मासांतेधेनुंदत्वाशुद्ध्य
ति। येवप्राजापत्यैर्वाप्रत्याम्नायेपंचधेनूर्दद्यात्। ज्ञानाच्चेद्वैश्यस्यगोमात्रंहत्वातद्द्विगुणंसर्वंचरेत्। अज्ञा
नाच्छूद्रस्यगोमात्रंहत्वागोहितादिकृत्प्राजापत्यंनिरंतरंचरन्मासांतेधेनुंदत्वाशुद्ध्यति। प्रत्याम्नायेधे
नुचतुष्कं। ज्ञानेचेत्कृतवधगोचर्मणार्द्रेणसंवृतोगोष्ठेवसन्षण्मासंयवागूंपिबन्शुद्ध्यति। प्र
त्याम्नायेप्रायश्चित्तप्रत्याम्नायोचद्विगुणो। अकामीसोमयागस्थश्रोत्रियस्यगोमात्रंहत्वागो १००१
हितादिकृच्छ्राकादिभुग्वर्षांतेवृषभैकादशंदद्यात्। गोघ्नासप्तकृच्छ्रषण्मासैर्वाशुद्धः। कामाच्चेच्छ्रो

त्रि हितादिकृन्मुंडीशाकादिभुक्त्र्यब्दंचरेत्। पत्नीवक्ष्यमाणंगोशतंचरेत्। ज्ञानाच्छ्रोत्रियागस्थश्रो
त्रियातिदुर्गत्वकुटुंब्यातिथ्यकृद्विप्राणिहन्तेस्यकपिलांहोमार्थंगर्भिणींबहुक्षीरांसुवृत्त
तरुणांद्विगुणांनिर्गुणोधनवान्प्रतिज्ञयाखड्गादिनाहत्वाभ्रूणहाभवतीतिब्रह्महत्याद्विगु
णंव्रतंचरेत्। यद्वागोहितादिकृन्मुंडीदंडंबिभ्रन्नक्षारलवणंरूक्षंषष्ठेकालेअश्नन्गोम
तींप्रणववेदंवाजपन्द्विमासांतेगोसहस्रंदद्यात्। अज्ञानान्मुंडीशाकादिभुक्त्र्यब्दंचरेत्। ब्र
ह्महत्याव्रतंत्रैवार्षिकंवृषभैकशतगोदानं। अगर्भिण्याःकामतश्चैतत्। अकामतश्चगोहितादि
कृन्मुंडीशाकादिभुक्। त्र्यब्दंचरेत्। यदितांकाष्ठेनहन्यात्सांतपनंपूर्वंगोसहस्रशतदानं
त्र्यब्दादिषु। लोष्ठेकायंपाषाणेतप्तकृच्छ्रःशस्त्रेतिकृच्छ्रंपूर्वव्रतांतेविप्रान्संभोज्यतेभ्यस्त्रिं
शद्गोवृषभंचदद्यात्। अकामतिकृच्छ्रामतिकृशांरोगिणींचहत्वासर्वत्रव्रतोक्तार्द्धव्रतंकृत्वा
विप्रान्संभोज्यशक्त्याहोमंतिलान्दद्यात्। एकाब्देगविहतेपादंद्व्यब्देर्द्धंत्र्यब्देपादोनंततः
सर्वंकार्यं॥ गर्भिण्यावधेनूच्यते॥ उत्पन्नेगर्भेपादोद्वौघ्रेर्द्धं। आपूर्णेपादोनंचैतन्येगोव्रतं॰

१००२ द्विगुणं। अज्ञानादेकां बहवो हतवन्तश्चेत्तस्य पादं प्रत्येकं कुर्युः। दाहे त्वर्द्धं। बन्धने पादोनं। ज्ञानाच्चेत्प्र
त्येकं कृत्स्नमेव। एकत्र रोधादिना बहूनां वधे द्विगुणं व्रतं। अज्ञानाद्दैवेन मिथ्यौषधेन कृ
त्स्नाश्ववधे चैकं द्विगुणं। अज्ञानाद्दैवेन हितबुध्या चौषधदानेन पादं व्रतं रोधादौ व्याधिहितं कर्तव्येषु
रोधने पादः। बंधने अर्द्धं। योजने पादोनं। निपातने सर्वं। अज्ञानाद्रोधादिकृते तज्जन्यप्रमादप
रिहारार्थमवेक्ष्यमाणो मृते कार्यं कृत्वा विप्रान्संभोज्य गोमिथुनं दद्यात्। रोधनादिप्रमाणपर
क्षणाकरणे क्रमात्पादार्द्धत्रिपादसर्वाणि त्रिमासिकादीनि कार्याणि। चिकित्सार्थमन्यत्र दा
हे तिवाहने नासापुच्छच्छेदे नदीपर्वतादिरोधे तिदाहे दमने संघाते योजने शृंखला नारिकेलशा
णवाल्मीजादिदृढपाशादिबद्धे मृते पादोनं। सर्वत्र घंटादिभूषणनिमित्ते कृच्छ्रं। मतकल्पवधे
तुसकृत्पावकभैक्ष्यपयोदधिघृतानि क्रमान्मासार्द्धं भुक्त्वा विप्रान्संभोज्य गाः दद्यात्॥ १००२
मरणहेतुव्याधिमुक्ता चेद्दशरात्रं पंचगव्यं पिबेत्। शृंगादिभंगे चर्मविलोचनादौ गवि जी
वति मासार्द्धं यवाग्रं पिबेत्। अशक्तो पयोदधिघृतं वा दशरात्रं पिबेत्। अनुग्राहकप्रयोज

कादीनां पूर्वदोषतारतम्यं कल्प्यं। अथ रक्षोपेक्षानिमित्तं जलपंकोश्वनीचादिविषमस्थाने दुर्गे च शून्य
गृहबंधनविद्युत्सर्पमृगव्याघ्रश्वपदाद्यैः शीतवाताद्यैरुद्बंधनाद्यैश्च मृते गोस्वामी कार्यं कुर्यात्।
कार्पीतखव्ययश्चेद्दंतच्छेदव्यूढगर्भनिगमनाश्वसंदंशांकुशादिप्रवेशनिमित्ते बाधा रक्षार्थं च रोध
बंधने दोषः। औषधस्नेहाहारदीयमाने च हितार्थं दाहच्छेद शिराभेदेषु च ग्रामपाते शरोपि गृहदी
प्तिसृष्टौ कूपादिपाते रण्यगृहग्रामादिदाहे च नाशदोषो नास्ति। बद्धे मृते पादं चरेत्। गवां स्त्रीत्वम
विवक्षितं सर्वत्र गोहतो गोसहस्रांगां तन्मूल्यं घातो स्वामिने दद्यात् प्रायश्चित्तं राजदंडं च तत्समं।
एतत्सर्वं हंतुर्ब्राह्मणस्य क्षत्रियस्य पादोनं वैश्यस्यार्द्धं शूद्रादेः पादं विं द्यात्। सर्वत्र स्त्रीबा
लवृद्धादीनां त्वर्द्धं अनुपनीतस्य कन्यायाः पादं। तत्पित्रादिश्चरेत्। स्त्रीणां तु वपनमनुगमनं
गोष्ठशयनं चर्मप्रावरणं च नास्ति। सर्वत्र केशान्समुद्धृत्य छित्वा गुल्फं छेदयत्सर्वत्रैव। एतासां स्त्री
नपुंसकानां तु पादव्रतं। आकंठाद्रोम्णां वपनं अर्द्धं श्मश्रूणां च त्रिपादे शीर्षवर्ज्यं। समस्ते सशी
र्षवपनं। ज्ञानाच्च सर्वत्र द्विगुणं॥ ॥इति गोवधप्रायश्चित्तं॥ ॥अथ ब्रात्यादोप्रायश्चित्तं।

॥ ॥तत्रसर्वोपपातकार्थंचांद्रंपंचगव्यंमासंपयोमासंपराकंत्रैमासिककृच्छ्रंवाप्रतिपदोक्तंमासा
वेकुर्यात्॥व्रात्यत्वेपि उपनेत्राद्यभावेनोपनयनकालातिक्रमे चांद्रादिव्रतचतुष्केन्यतमंशक्त्या
१०३ कारयित्वोपनयनंकार्यं।अनापदिकालातिक्रमेत्रैमासिकंकारयित्वोपनयेत्॥तत्रैवपंचदश
वर्षादूर्ध्वमपिकियत्कालातिक्रमेतद्दालकव्रतं।तच्चैवं।द्वौमासौयावकेनवर्तयेत्।मासंपयसा
पक्षमामिक्षयाष्टरात्रंघृतेनषड्रात्रमयाचितेनत्रिरात्रमब्भक्षेणाहोरात्रमुपवसेदिति।व्रात्यस्तो
मेनवाचरेत्॥यस्यपितापितामहावनुपनीतौस्यातांतस्याब्दंत्रैविद्यकंब्रह्मचर्यं। इत्यापस्तंबोक्तं
कृत्वोपनयनं॥ अथस्तेयेनविप्रोविप्रस्यदशकुंभधान्यंवातत्परिमिततंदुलादिवातावत्ताम्र
रजतादिकंवाऽमत्याहृत्वात्रैमासिकंकुर्यात्।मत्याभ्यासेकृच्छ्राब्दं।क्षत्रियादेर्हर्तुःपादपादह्रासः
।क्षत्रियस्यविप्रोहृत्वाषाण्मासिकं।वैश्यस्यत्रैमासिकं।शूद्रस्यचांद्रं।एवमुत्तमस्यत्राप्यूह्यं।कुं
भःपंचसहस्रपलपरिमाणं।विप्रस्यक्षेत्राणांनिक्षेपरजतवस्त्रमणीनांनराश्वस्त्रीणांचसार्द्धशत १०३
द्वयपणपानीयरसवापीकूपजलानांचहर्तुर्विप्रस्यसुवर्णस्तेयसमंव्रतं।क्षत्रादिष्वेवंचांद्रव

र्द्धपादादि। त्रपुसीसादिद्रव्याणामल्पप्रयोजनानांसार्द्धशतद्वयपणपंचदशांशार्द्धानांहर्तुः
सांतपनं॥भक्ष्यभोज्यहरणादीनामेकवारभोजनपर्याप्तानांयानशय्यासनानांपुष्पमूल
फलानांचहर्तुःपंचगव्येनाहोरात्रं।त्रिवारभोजनपर्याप्तेत्रिरात्रं।तृणकाष्ठद्रुमाणांत्रिवा
रभोजनपर्याप्तमूल्यार्घाणांशुष्कान्नगुडचैलचर्ममांसानांचहर्तुस्त्रिरात्रं मणिमुक्ताप्रवा
लताम्ररजतायःकांस्योपलानांतुद्वादशाहाहारपर्याप्तमूल्यार्घाणांहर्तुःद्वादशाहंक
णान्नंवा।कार्पासकीटजोर्णानांद्विखुरैकखुररज्जुपक्षिगंधौषधीनांचहर्तुस्त्रिवारभोज
नपर्याप्तमूल्यार्घाणांहर्तुःपयः।अपहार्यसर्वत्रक्रियमाणद्रव्याल्पत्वबहुत्वाभ्यांप्रायश्चित्ता
ल्पत्वबहुत्वेकल्प्येसर्वस्तेयेप्रायश्चित्तंद्रव्यंस्वामिनीसतिदत्त्वैवकार्यं॥ इतिस्तेयप्रायश्चि
त्तं॥ अथऋणानपाकरणे॥ तत्रऋण्यात्मपितृमातामहादिकृतं यथाब्रह्मचर्याक
रणेऋषीणामृणंयज्ञाकरणेदेवानामृणंप्रजोत्पत्त्यकरणेपितॄणामृणं।एषामृणाना
मनपाकरणेचांद्रादिष्वेकंशक्त्याकार्यं।यद्वासंभवेवैश्वानरेष्टिःकार्या।अनाहिता

ग्निलंतुसत्यधिकारित्वे अऽग्न्याधाने द्वादर्वांक्त्र्यतिमासं त्रिरात्रं। ततः प्रसद्दं वां द्वादिद्वैके
अनापदि त्रैमासिकं। पितर्यनाहिताग्नौ वा धातुरष्ट्यर्यरियष्टश्च सुतस्य व्रात्यः प्रभुः का
र्यः। औपासनाग्न्यसंधाने त्वर्द्धं प्रतिमासमुपवासो द्वांते वां द्वादशिकं प्रोक्तं। यद्वाऽधाद्वेक कृच्छ्रादि
तीयेति कृच्छ्रं। त्वतीयेकृच्छ्रातिकृच्छ्रं। ततश्चांद्रं॥ अपण्यविक्रयेत त्रगुडतिलपुष्पमूलपक्व
फलपुष्पान्नविक्रये सौम्यकृच्छ्रः। लाक्षालवणमधुमांसतैलक्षीरदधिघृततक्रगंधचर्मवा
ससां विक्रये चांद्रं। ऊर्णाकेशकेसरिशृंगे तु वेश्मशस्त्रविक्रये चांद्रं। भक्ष्यमांसस्त्राय्वस्थिशृं
गनखशुक्तिविक्रये तप्तकृच्छ्रः। हिंगुगुग्गुलुहरितालमनः शिलांजनगैरिकक्षारलवणामु
क्ताप्रवालमणिवेणववेणुमृन्मयेषु च तप्तकृच्छ्रः। आरामतडागोदपानपुष्करिणीसुकृतविक्र
ये त्रिषवणं स्नानं अधःशायी चतुर्थकालाहारो दशसहस्रं जपन्न वेदेनशुद्ध्येत्। हीनमानमा
नमानोन्मानसंकीर्णविक्रये चैवं। एवमन्येः शास्त्रविस्ताधेरुक्तं ज्ञेयं। यत्र प्रायश्चित्तं त
त्रापदि चांद्रादिद्वैकमनापदि त्रैमासिकमिति॥ ॥इत्यपण्यविक्रयप्रायश्चित्तं॥ ॥

॥ ॥अथपरिवेदनं॥ ॥तत्राप्तमत्यापरिवेत्ता चांद्रादिद्वैकं कृत्वा ज्येष्ठाय स्वोढां स्त्रियं दत्वा तेनानु
ज्ञातः उद्वहेत्। अमत्या च तत्रापि कन्यापित्राज्ञानेद्वं कार्यं। ब्राह्मणगृहभिक्षाशनं च कृत्वैवं का
र्यं। कन्यापित्रादिदत्तोद्वाहे त्रैमासिकं कृच्छ्रातिकृच्छ्रो वा कृत्वैवं कुर्यात्। परिविद्यस्य तु देहकृ
च्छ्रं कन्यायाः कृच्छ्रः। दातुरतिकृच्छ्रः। होतुश्चांद्रं। एवं परिवेद्यवत्। पर्याहितपरिइष्टपरिविन्नका
नां कायद्वयं। परिवेत्तृपरिविन्नकपर्याधातृपरियष्टृअग्रेदिधिषूपपतीनां चांद्रं गौतमोक्तं प्रा
कृतब्रह्मचर्यं कृत्वा पश्चाद्विवाहः। अग्रेदिधिषूपतिः कृच्छ्रः कृत्वा तामेवोद्वहेत्। दिधिषूप
तिस्तु कृच्छ्रातिकृच्छ्रौ तां तस्मै दत्वानुज्ञातस्तामेवोद्वहेत्। यद्वाग्रेदिधिषूपतिः कार्यं कृत्वा ता
मेतामेव ज्येष्ठां पश्चादन्येनोढामुद्वहेत्। दिधिषूपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां
कनीयस्याः पूर्वं दत्वान्यामुद्वहेत्। ज्येष्ठे स्थिते कनिष्ठः कृतविवाहः परिवेत्ता परिविंदा
नश्च सतेज्येष्ठः परिवित्तिः परिवेद्यश्च सः। परिविन्ना गवेत्तापरिविन्नागविदित्यादिरभ्यैवं। ज्ये
ष्ठायां कन्यायामनूढायां अनुजोढा चेत्साग्रेदिधिषूः पूर्वा दिधिषूः॥ भतकाध्यापकोभ्य

तकाध्यायीचपयसाब्राह्मींसुवर्चलांत्रीन्पक्षान्नियतःपिबेत्। चांद्रादिषेकंवाकुर्यात्। अनुयो
१००५ गप्रदानेचैवं। उत्कर्षहेतोरधीयानस्यकिंपठसिकिंपठसिनाशितंतयेत्येवंपर्यनुयोग
प्रदानाभ्यासेपातित्यमाह॥ ॥अथपारदार्यं॥ ॥तत्रगुरुतल्पतत्समादिषुप्रायश्चित्तविशेष
उक्तः। ऋतुकालेजातिमात्रब्राह्मणीगमनेवार्षिकंप्राकृतंब्रह्मचर्यं। ऋतावेवधर्मकर्मादिसाध
नत्वादिगुणवत्यांब्राह्मण्यांब्राह्मणगमनेद्विवार्षिकं। तादृशामेवश्रोत्रियपत्न्यांत्रैवार्षिकं। ता
दृशामेवक्षत्रियायांद्विवार्षिकं। तादृश्यांवैश्यायांवार्षिकं। तादृशामेवशूद्रायांषाण्मासिकं।
एवंक्षत्रियस्यापिक्षत्रियादिषुद्विवार्षिकवार्षिकषाण्मासिकानि। वैश्यस्यवैश्यायांशूद्रायां
वार्षिकषाण्मासिकेशूद्रस्यचशूद्रायांपरपत्न्यांषाण्मासिकमेव। अनन्यपूर्विकासुचतुर्थेष्वा
सेद्वादशाब्दं। एकस्यामेवगमनाभ्यासेपादंपादंन्यूनंस्यात्। अमत्यासर्वत्रार्धमेतत्। अन्ततो
जातिमात्रब्राह्मण्यांत्रैमासिकंक्षत्रियादिषुस्त्रीद्विमासिकंचांद्रमासिकानिक्षत्रियादी १००५
नांक्षत्रियादिस्त्रीषुद्वैमासिकादीन्येव। अमत्याब्राह्मण्यादीषुवृषभैकादशगोदानंमासं
पंचगव्यंमासंकायंचकृच्छ्रमाकुर्युः। शूद्रीगमनेमासंकायार्धं। ब्राह्मणश्चेदप्रेक्षापूर्वकंब्राह्मण

भार्यांशूद्रामपिगच्छेत्। निवृत्तकर्मधर्मणाकृच्छ्रं। अनिवृत्तधर्मकर्मणोतिकृच्छ्रः। द्विजा
तिस्त्रीषुविप्रोक्तासुद्वित्रिव्यभिचारितास्वमत्यागमनेचैवं। मत्याकृच्छ्रद्वयं। वर्णस्त्रियापिच
तुर्थेव्यभिचारेस्वैरिण्यःपंचमेबंधक्यः॥ स्वैरिणीगमनेतुशूद्र्यांसचैलंस्नात्वोदकुंभानि
धापदद्यात्। वैश्यायांचतुर्थकालाविप्रोहोरोन्भोजयेत्। क्षत्रियायांत्रिरात्रोपोषितोयवा
ढकंपिबेत्। बंधकीषुतुब्राह्मण्यांकिंचिद्दद्यात्। क्षत्रियायांचेद्धनुः। वैश्यायांचेलकंशूद्रा
यामुदकुंभंदद्याद्विप्रः। इदंतुप्रायश्चित्तंजातगर्भानुत्पन्नविषयं। गर्भोत्पत्तौयद्विशेषेणाय
प्रायश्चित्तमुक्तंतदेवतत्रद्विगुणंकुर्यात्। प्रातिलोम्यागमनेपुंसोवधःस्त्रियःकर्णा
दिकर्तनं। स्वस्त्रीभ्रांत्याप्रातिलोम्यागमनेतुब्राह्मण्यांशूद्रस्यद्वादशाब्दं। वैश्यादेःपा
दपादह्रासः। अत्यंतव्यभिचारितब्राह्मण्यांतुशूद्रस्यगोमूत्रयावकंमासंवैश्यक्ष
त्रियस्यकृच्छ्रं। सांतपनंवा। रजकचर्मकारभिल्लव्याधलूषनटबुरुडकैवर्तमेदम्ले

छायाएतेरजकाद्याः।कापालिकाश्चतद्वत्रजकाधंत्सजागमनेतमस्याब्राह्मणस्यपराकः॥चांद्रंवा॥म
१०६ सासांदद्वयं।क्षत्रियादीनांपादपादह्रासः॥अभ्यासेकृच्छ्रात्ब्दं।रेतःसेकात्प्राङ्निवृत्तौकार्यं।त्रं
अन्त्याधंतेवसायस्त्रीगमनेगुरुतरंप्रायश्चित्तंगुरुतल्पगप्रकरणेदर्शितं।चंडालादिषुगर्भोत्पत्तौ
द्वादशाब्दंगुरुतल्पगव्रतं।स्त्रीणामपिवर्णानुलोमगमनेयत्पुरुषस्योक्तंत्रैवार्षिकादिकंतदेवका
र्यं।प्रातिलोम्यगमनेतुशूद्रो।ब्राह्मणींगच्छेत्वीरणेर्वेष्टयित्वाग्नौतंक्षिपेत्।ब्राह्मण्याःशिरो
वापयित्वासर्पिषाभ्यज्यनग्नांखरमारोप्यमहापथंगमयेत्सापूताभवति।वैश्यश्चेल्लोहि
तदर्भैर्वेष्टयित्वाग्नौतंक्षिपेत्।ब्राह्मणींपूर्ववद्गमयेत्।क्षत्रियश्चेच्छरपत्रैर्वेष्टयित्वाग्नौ
तंक्षिपेत्।ब्राह्मणींपूर्ववद्गमयेत्।एवंक्षत्रियायांवैश्यशूद्रयोः।वैश्यायांशूद्रस्यचाए १०६
वंस्त्रीपुंसयोःप्रायश्चित्तं।यद्वाब्राह्मण्यांक्षत्रियगमनेतिकृच्छ्रो।वैश्येकृच्छ्रातिकृच्छ्रौ।
क्षत्रियायांविप्रक्षत्रवैश्यगमनेषर्धकायातिकृच्छ्राणि।वैश्यायांविप्रक्षत्रियवैश्यग

नेषुकृच्छ्रपादकृच्छ्रार्धकायानि।शूद्रायाःशूद्रेकार्यं।विप्रक्षत्रवैश्येषुत्वहोरात्रंत्रिरात्रार्द्ध
कृच्छ्राणि॥ब्राह्मण्याःप्रातिलोम्यगमनेगर्भानुत्पत्तौविशेषः।ब्राह्मण्याःशूद्रसंगमनेकृ
च्छ्रंचांद्रत्रयंच।वैश्येकृच्छ्रंचांद्रद्वयंचक्षत्रियेकृच्छ्रंचांद्रं।क्षत्रियायाःशूद्रसंगमनेतुकृच्छ्रं
चांद्रद्वयंच।वैश्येकृच्छ्रंचांद्रंच।वैश्यायाःशूद्रसंगमनेतुकृच्छ्रंचांद्रंच।गर्भेप्रच्युतेतुब्राह्म
ण्याविप्रगर्भेपराकः।क्षत्रगर्भेचांद्रं।वैश्यगर्भेचांद्रंपराकश्च।शूद्रगर्भेचांडलत्वात्त्यागः
एतत्तुदोषैर्गर्भस्रावेचांद्रद्वयं।मत्यागमनेपराकादिद्विगुणं।द्विजभार्याःशूद्रेणसंगता
अनुत्पन्नगर्भाःप्रसूयंतेचेत्प्रायश्चित्ताभावः।गर्भधारणोत्तरकालेतुशूद्रादिसंगम
नेतुप्रसवोत्तरकालमेवप्रायश्चित्तंकार्यं।अन्यथागर्भबाधात्।तत्रमासंयावकोऽस
गर्भोदोषाभावात्संस्कार्यः॥ओढत्वात्प्रायश्चित्ताकरणेस्त्रियाःप्रायश्चित्तं।सागृहेन
प्रचरेत्।नभर्त्रासहशयीत।कर्णादिकर्तनंकार्यमित्यादिकार्यं।असत्शूद्रगमनेस्त्री

स्मृ·सा· णांब्राह्मण्याः अमत्या रजकाद्यंत्यजसंगमे चांद्रत्रयं। चंडालाद्यंतेवसायिसंगमे त्वमत्या ब्रा
ह्मण्याश्चांद्रचतुष्कं। मत्यादिगुणं। गर्भिण्याः पश्चादंत्यजसंगमेपि प्रसूतायाएव प्रायश्चित्तं
१०८ सा गृहे न प्रचरेत्। न मत्रीं सह शायीत। न च बांधवैः सह भुंजीत। न धर्मे कर्मसाधनं साक्षा
च्चरेत्। हिरण्यं धेनुर्वा दक्षिणा॥ सत्यांत्यजसंसर्गे तु सा प्रदीप्ताग्नौ प्रविश्य मृत्कुनाशु
ध्येत्। प्रायश्चित्तमकुर्वाणां तामंकयित्वा निर्वास्या वध्या वा स्यात्॥ ॥इति पारदार्य
प्रायश्चित्तं॥ ॥परिवेत्तृप्रायश्चित्तवत्तत्र कृच्छ्रातिकृच्छ्रस्थाने कार्यः॥ वार्धुष्ये चांद्रा
दिष्वेकं त्रैमासिकं च जातिशक्तिगुणाद्यपेक्षया योज्यं। लवणक्रियायां त्वेवं॥
अथ स्त्रीशूद्रक्षत्रविट्वधेषु। तत्रामत्या जातिमात्रक्षत्रवैश्यशूद्रवधेषु क्रमेण ब्रह्म
हत्याव्रतं त्रैवार्षिकं वार्षिकं षाण्मासिकानि कुर्यात्। यद्वा वृषभैकसहस्रं गाः वृषभै १०८
कशतं गाः सवत्सा धेनुर्दश दद्यात्। ईषद्वृत्तस्थक्षत्रादिवधेषु। ब्रह्महत्याव्रतचतुर्था

शषांशषोडशांशव्रतानि। सम्यक्प्रवृत्तस्य वधेष्वेकांशाधिकानीमानि। सदाचारगुरुपूजा
(दण्णा शौचेंद्रियनिग्रहभूतहितायगुणकृत्तेवृत्तस्थं तु हत्वा मत्याषड्वार्षिकं त्रैवार्षिकं। पि
वार्षिकाणि। श्रोत्रियक्षत्रादिवधेषु नवषट्त्रिवार्षिकाणि व्रतस्थश्रोत्रियक्षत्रादिव
धे दशवार्षिकं। प्रारब्धसोमयागस्थश्रोत्रियक्षत्रियादिवधे द्वादशाब्दं भृतार्थसोमया
गस्थश्रोत्रियक्षत्रियादिवधे षड्वार्षिकं ब्रह्मचर्यं। वृषभैकसहस्रगोदानसहितं त्रैवार्षि
कं वृषभैकशतात्मगोसंदानसहितं वार्षिकं वृषभैकादशगोदानसहितं च गौतमोक्तं
। दुर्वृत्तक्षत्रादिवधे मत्या त्रैवार्षिकं त्रैमासिकं चांद्राणि। अमत्या त्रिरात्रोपवाससहितं
वृषभैकादशगोदानं पंचगव्यं मासं पयोमासं वा कुर्यात्। इदं प्रायश्चित्तं जातं ब्राह्मण
स्य हंतुर्ज्ञेयं। क्षत्रियादिहंतुः पादपादन्यूनं ज्ञेयं। मूर्धावसिक्तादीनां नैतत्प्राय
श्चित्तं। तत्र सर्वत्र उत्कृष्टिह्रासाभ्यां प्रायश्चित्तवृद्धिह्रासौ विज्ञेयौ अथ स्त्रीवधे
तत्र ब्राह्मण्यादिस्त्रीणां प्रातिलोम्येनांत्यजातिप्रसूतानां ब्राह्मणादिभार्याणां

स्वैरिण्यानां अमत्यावधेषु जलाधारचर्मकोशदृतिं धनुः छागंमेषं क्रमाद्द्यात्॥ प्रातिलोम्ये
नव्याभिचारितब्राह्मण्यादिवधेच ब्राह्मण्यावधेच मत्याषाण्मासिकं दशधेनुदानंवा। क्ष
१०८ त्रादिस्त्रीवधे त्रैमासिकं। तत्र दशधेनि। मत्याब्राह्मण्यादिषु द्विगुणं। तथा वैश्यायांधे
नुदानं। शूद्रायां चांद्रादिष्वेकं। धर्मकर्मसाधनं ब्राह्मण्यादिवधेतु ब्राह्मण्यां षड्वार्षि
कं। प्राकृतं ब्रह्मचर्यं। क्षत्रियायांत्रिवार्षिकं। वैश्यायां सार्द्धवर्षं शूद्रायां नवमासं।
अमत्या सर्वत्र सार्द्धचांद्रं। आत्रेय्यां तु प्रायश्चित्तमुक्तं। अथान्यहिंसायां॥ ॥तत्रा
स्थिमतां कृकलासादीनां अनुक्तनिष्कृतीनां सहस्रवधेवानस्थिमतां लक्षोद्दिष्टा
नां यूकामत्कुणदंशादीनां शकटपूर्णमात्रवधेषाण्मासिकं प्राकृतं ब्रह्मचर्यं। दशधेनु १०८
दानं वा तत्प्रमाणाधिक्येऽधिकं कल्प्यं। ततो वा क्षुद्रशास्थिप्राणिवधे किंचिद्देयं। अष्ट
मुष्टिमितं धान्यं किंचिदष्टौ च पुष्कलं। चतुः पुष्कलं पूर्णपात्रं आढकः एभ्यस्तु यद्ढको
द्रोणः चतुर्द्रोणा खारिका। हिरण्यं तु पणं किंचित्। अनस्थिकेक्षोद्दिष्टप्राणायामः॥

स्थिविधानस्थिघुणादिप्राणिवधेतु तत्रयावर्कं त्र्यहं। फलपुष्पान्नरसजातिप्राणिवधेप्यता
होरात्रं। मार्जारगोधानकुलमंडूकश्वानां चाषकाकोलूकानां प्रत्येकं वधे त्रिरात्रं पा
दकृच्छ्रंवा। योजनगमनंवा। स्रवंत्यां समुद्रगायां नद्यां स्नानंवा। अथैवतत्सूक्तजपंवा।
तानि प्रत्येकं त्रिरात्रं कुर्यात्। एकवर्षवत्सो वादेयः। मत्याद्विगुणं। अभ्यासे त्रिगुणं कार्यं
।एषां समुदितानां वधे षाण्मासिकं॥ जगोपंचनालवर्णा वृषादेयाः। हयेवरवस्त्रयु
ग्मं। उष्ट्रे भारः सुवर्णं गुंजावा। खरे वृषः एकवर्षवत्सोवा। अजे त्रिरात्रमनड्वान् वृषोवा
।मेषेचैवं। हंससारसपारावतमयूरचक्रवाकबककबलाकाकंकप्लवाविड्डा रंडवश्ये
नभासराजपक्षादिषु गौर्देया गृध्रकाकोलूककपोतकुक्कुट बृहत्पक्षादिषु त्रिव
र्षवत्सः। शुकचाषखंजरीटलावकसारिकादिषु द्विवर्षवत्सः। टिट्टिभतित्तिरिमं
खादिषु पक्षिष्वेक वर्षो वत्सः। क्रव्याद व्याघ्र स्रगालादिमृगवधेषु वानरेच हंस

श्येनकंकगृध्रादिषुजलचरबलाकादिषुचस्थलचरबकादिषुचमासेमयूरेचैतेषुप्रत्येकंव
१०८ धेगौर्देया।अक्रव्यादहरिणादिमृगेषुखंजरीटादिपक्षिषुवत्सतरीदेया।सरास्थेष्वयोदंडस्ती
क्ष्णोदेयः॥यद्वाशुकेत्रिवर्षोवत्सः॥क्रौंचेत्रिवर्षोवत्सः॥मृगपक्षिषुनपुंसकवधेत्रपुसिकंमा
षप्रमाणंदेयं।पललभारोवा।सूकरेघृतकुंभोवा।तित्तिरेतिलद्रोणोवा॥एतद्दानाशक्तौद्र
व्यकल्पनयातत्समंवाकृच्छ्रादिकार्यं। यद्वादानाशक्तौगजदंडसाराश्वोक्षखरगो
रगवयशशकमहिषाजमेषादिष्वमत्याप्रत्येकवधेसार्द्धकृच्छ्रं।समस्तवधेचांद्रं।मत्याप्र
त्येकंवधेचांद्रं।समस्तवधेसौम्यावृत्तिः॥हरिणासर्परुरुवराहसिंहगंडकेसरिव्याघ्रमकरम
हामत्स्यग्राहशशिमारादीनाममत्याप्रत्येकंकृच्छ्रं॥समस्तवधेकृच्छ्रद्वयं।मत्याप्रत्येकं १०९
वधेचैवं।श्वयकजंबूकवानरविड्वराहादिष्वमत्याप्रत्येकवधेत्रिरात्रं।समस्तवधेकृच्छ्रं
मत्याप्रत्येकवधेचैवं।समस्तवधेद्विगुणं।मार्जारसर्पाजगरडुंडुभनकुलमंडूकलूका

निकर्कटशलभगोधाशल्यककूर्मशशादिष्वमत्याप्रत्येकंपादकृच्छ्रं॥समस्तवधेऽर्धकृ
च्छ्रं॥मत्याप्रत्येकंचैवं।सिंहादिष्वमत्याप्रत्येकवधेकृच्छ्रं॥गृध्रादिषुपादन्यूनकृच्छ्रं॥शुकादि
ष्वर्धकृच्छ्रं॥टिट्टिभादिषुपादकृच्छ्रं॥समस्तवधादौतत्तद्द्विगुणं।सर्वत्रैकहंतृविषये
चैवं।हंतृद्वित्वेतुप्रत्येकंतत्रतत्रोक्तार्धंस्यात्।हंतृबहुत्वेगजादिषुकृच्छ्रं॥हरिणादिषु
त्रिरात्रं।पश्वादिषुत्र्यहं।मार्जारादिषूपवासः॥हंसादिषुत्रिरात्रं।गृध्रादिषुत्र्यहं।शुका
दिषूपवासः॥टिट्टिभादिषुनक्तं।मतप्रायेष्वमत्याप्रत्येकवधेतुगजादित्रिरात्रं।हरि
णादित्र्यहं।श्वादिषुचतुर्थकालः॥मार्जारादिषूपवासः।तथाहंसादिषुगृध्रादिषु
चनक्तं।शुकादिष्वेकभक्तं।टिट्टिभादिषुजलेप्राणायामः॥अविज्ञातसर्वमृगप
क्षिषुत्रिरात्रं।इत्यादिदेशकालजातिशक्तिगुणाद्यपेक्षयागुरुविषयेगुरुलघुविष
येलघुयोज्यं॥ ॥इतिहिंसाप्रायश्चित्तं॥ ॥वृक्षगुल्मलतावीरुधांफल

पुष्पादिभिरुपयोगिनांछेदेगुल्मवल्ल्यादीनांऋचांसप्तशतंजप्तव्यं।तावद्गायत्रीजपोवा।ओष
१०१ धीनांग्राम्यारण्यानांवृथैवछेदनेदिवागोपरिचर्यंकृत्वारात्रौक्षीरंपीत्वैवस्वपेत्।यज्ञाद्यदृ
ष्टार्थलेपंचमहायज्ञाद्यदृष्टार्थलेचछेदनेनदोषः।चैत्यश्मशानसीमापुण्यस्थानदेवालय
स्थेवृक्षेन्यस्मिन्प्रख्यातेवावृक्षछेदनेचऋक्शतंजपेत्।द्विगुणं।दंडानुसारेणप्रायश्चि
त्तंकार्यं।सर्वत्रशूद्रस्त्रीणांजपस्थानेदंडानुसारेणद्विरात्रादिकल्प्यं।वृक्षछेदाभ्यासेचांद्रा
दिष्वेकंकार्यं॥ ॥इतिवृक्षादिछेदप्रायश्चित्तं॥ ॥अथमार्जारादिदष्टेषुश्ववृकसृ
गालखरोष्ट्रविड्वराहाविकाककुक्कुटवानरपुंश्चलीक्रव्यादांत्यजातिभिर्दष्टः।शक्तश्चे
न्नाभेरधःपयसाद्विरात्रं।अग्निहोत्र्येकरात्रं।ब्रह्मचारीचेत्त्रिरात्रं।नाभेरूर्ध्वंचेत्तदेवद्विगु १०१
णंवक्त्रेत्रिगुणं।मस्तकेचतुर्गुणं।यद्वोत्तमांगेसमुद्रगागंगादिस्नानं।प्राणायामशतंच
कृत्वाघृतेनैकरात्रं।अशक्तश्चेज्जलेप्राणायामंकृत्वाघृतेनैकरात्रं।अत्यशक्तोगत्वा

ब्राह्मणान्प्रणिपत्यतैर्निरीक्षितःशुद्ध्येत्।अत्यंताशक्तोहिरण्योदकमिश्रंघृतंप्राश्यशुद्ध्येत्।ईषद्दष्टे
तुनाभेरधश्चेदापोहिष्ठीयाभिःस्नानंप्राणायामत्रयंच।नाभेरूर्ध्वंद्विगुणं।मार्जारमूषककोलूक
निनकुलाश्वाजमहिषहीनजात्यारण्यमृगैर्दष्टस्यजलेदशप्राणायामाः।ईषद्दष्टस्यपंच।
क्षत्रियादेःपादपादन्यूनं।शूद्रस्यतूपवासेनदानेनगोमिथुनेनवा।अमंत्रकप्राणायामैवः
शुद्धिः।ब्राह्मणीदष्टास्नात्वोदितनक्षत्राणिदृष्ट्वाशुद्ध्येत्।कृच्छ्रादिव्रतस्थदष्टस्त्रिरात्रमुपो
ष्यघृतपावकंभुक्त्वाव्रतशेषंसमापयेत्।ब्राह्मण्यनुसारेणक्षत्रियादिस्त्रीणांचैवं।रज
स्वलाश्वादिदष्टापंचरात्रंनिराहारापंचगव्येनशुद्ध्येत्।नाभेरूर्ध्वंमस्तकेचद्वित्रिचतुर्गुणं।
श्वादिजिघ्रितस्यावलीढस्यनखैर्विलिखितस्यवाद्भिःप्रक्षालनमग्निनाचोपतापनंच।
श्वादिदंशशस्त्रपाताद्विजनितव्रणकृमिजननेगवांमूत्रपुरीषेण।त्रिसंध्यंस्नानमाचरेत्।
नाभेरधश्चेत्त्रिरात्रं।पंचगव्याशीस्यात्।ततकषात्षड्रात्रं।शिरोव्रणेतुकार्यं।तत्रश्वादिदंश

व्रणेतद्दंशप्रायश्चित्तानंतरमिदं कृमिप्रायश्चित्तं कार्यं। शस्त्रादिव्रणे तु लिदमेव त्र्यहं पंचगव्याश
१-२१ नादिकं। क्षत्रियादिषु पादपादह्रासः। अन्यव्रणे कृमिदोषे तूपवासो हिरण्यं दत्वा कृच्छ्रेणैव
शुद्धिः॥ निंदितार्थोपजीवने चांद्रादिष्वेकं त्रैमासिकं वा। नास्तिक्यं वेदोक्तकर्मनिंदनं तेन
जीवनं नास्तिकावृत्तित्वं नास्तिक्ये सकृत्कृते कृच्छ्रः। नास्तिकवृत्तेरतिकृच्छ्रः॥ अभ्यासे चांद्रादि
ष्वेकं। अत्यंताभिनिवेशेन बहुकालाभ्यासे पंचाब्दं ब्राह्मणगृहे भैक्षाचर्या॥ ॥अथव्रत
लोपेतच्चोपकुर्वाणकोनैष्ठिकस्य श्च। त्रैवर्णिकब्रह्मचारी स्त्रीयं गत्वा वकीर्णी भवति। तत्रगु
रुतल्पेतत्समेवगुरुप्रायश्चित्तमुक्तं। ततोन्यत्स्त्रियं गत्वा सनिर्ऋतिदैवतेन वैकाक्षेण गर्दभे १-२२
न पशुनारण्य चतुष्पथे रात्रौ लौकिकेऽग्नौ पाकधर्मेणाश्वलायनादिगृह्योक्तपशुकल्पतं
त्रेणेष्ट्वा तस्याजिनमूर्ध्वबिलं परिधाय त्रिषवणस्नायी लोहितपात्रः स्वकर्मान्वक्षाणः सप्त
गृहं भैक्षेण कृतवाराशी वत्सरेण शुध्येत्। उपवासशक्तौ तु नैर्ऋतं चरुं पक्त्वा निरूप्य काम

रूपायस्वाहा। कामकामायस्वाहा। नैर्ऋत्यैस्वाहा। परोक्षदेवताभ्यः स्वाहेति हुत्वा होमशेषं समाप्याब्दं व्रतं
चरित्वा शुद्ध्येत्। इदं वार्षिकव्रतमश्रोत्रियब्राह्मणपत्न्यां वैश्यायामश्रोत्रियपत्न्यां वा ज्ञेयं। गुणवत्यां क्ष
त्रियायां श्रोत्रियपत्न्यां द्विवार्षिकं। गुणवत्यां ब्राह्मण्यां श्रोत्रियपत्न्यां त्रिवार्षिकं। असत्यावकीर्णीत्वा
र्षिकस्थाने ब्रह्महत्याव्रतं षण्मासं चीरवासा श्चरेत्। ईषद्व्यभिचारिण्यामेवं। द्विवार्षिकादिष्वसत्या
दौ अत्यंतव्यभिचारिण्यां शूद्रायां सचेलं स्नात्वोदकुंभं दद्यात्। वैश्यायां चतुर्थकालाहारो ब्राह्मणा
न्भोजयेत्। यवसभारं च गोभ्यो दद्यात्। क्षत्रियायां त्रिरात्रोपोषितो घृतपात्रं दद्यात्। ब्राह्मण्यां षड्रा
त्रोपोषितो गां दद्यात्। गोवकीर्णिकायां षंढायां पलालभारं सीसमाषकं च दद्यात्। स्त्रीसंभोगं वि
नामत्यारेतो विसर्जयन्नैर्ऋत्ययागमात्रं कार्यं। दिवास्वप्नेप्येवं। कृच्छ्रचांद्रादिव्रतेषु अनिर्दिष्टब्र
ह्मचर्येष्वपि रेतस्कंदने चैलदेव यागमात्रं। स्वप्ने रेतस्कंदने ब्रह्मचारी स्नात्वार्कमर्चयित्वा पुनर्मामैत्विं
द्रियमित्यृचं त्रिर्जपेत्। वानप्रस्थोयतिश्च मत्या ब्रह्मचर्यलोपे पराकत्रयमवकीर्णिव्रतं चरेत्।
अमत्या कृच्छ्रत्रयमुक्तं। संन्यस्तस्य गार्हस्थ्यपरिग्रहे षण्मासं कृच्छ्रं कृत्वा पुनर्जातकर्मादि

सर्वसंस्कारैः शुध्येत्। संन्यासेन क्षत्रियस्य चांद्रत्रयं वैश्यस्य कृच्छ्रत्रयं। यद्वैतानि ब्राह्मणस्यैव॥
१०१२ शक्तिसकृदभ्यासाद्यपेक्षया योज्यानि। ।अनाशकनिवृत्तानां चैवं॥ मरणसंन्यासिनां तु
जलाग्न्युद्बंधनभ्रष्टानां प्रव्रज्यानाशकच्युतानां विषप्रपतनप्रायःशस्त्रघातच्युतानां चचां
द्रतप्तकृच्छ्रद्वयं। शक्त्याद्यपेक्षया योज्यं। आत्मत्यागाद्यशास्त्रीयमरणाध्यवसितस्य ताव
न्मात्रे त्रिरात्रं। शस्त्रादिक्षते त्रिकृच्छ्रः। दष्टक्षते चांद्रं। शस्त्रादिमृतस्य पुत्रादयश्चांद्रं। तप्तकृच्छ्र
द्वयं वा कुर्युः॥ ॥इत्याद्यवकीर्णिप्रायश्चित्तं॥ ॥ब्रह्मचारी त्वनातुरो गुरुशुश्रूषणादिकृ
त्यागुरुतरकार्यव्यग्रतया सप्तरात्रं भैक्षाग्निकार्यस्य वा लोपे कामवकीर्णोस्म्यवकीर्णोस्मि
कामकामाय स्वाहा कामावपन्नोस्मि कामकामाय स्वाहा इत्याद्या आहुतीर्हुत्वा समासि १०१२
ञ्चतु मा मरुतः समिंद्रः सं बृहस्पतिः समायमग्निः सिंचत्वनेनोपतिष्ठेत॥ अव्यग्रतया लोपे
वकीर्णिव्रतं॥ ॥उपनयनानंतरं व्रतमध्ये यज्ञोपवीतादिवस्त्रं सूत्रांतरं वा धृत्वा म
नोज्योतिरित्यादिमनोलिंगाभिस्त्वमग्ने व्रतपा असीत्यादिव्रतलिंगाभिश्चा तस्त्र आज्या

हुतीर्हुत्वा विधिवद्धारयेत्। असकृद्भैक्षभोजने भ्युदिते भ्यस्तमिते वा अंते दिवास्वप्ने नग्नस्त्रीदर्श
ने नग्नस्वापे श्मशानमाक्रम्य हयादीश्चारुह्य सत्पूज्याननतिक्रम्याग्निकार्यलोपे चैतैर्हुत्वा
त्। मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्। स्थावरं जंगमं वृक्षवल्लीसर्पभु
सरीसृपादिप्राणिवधे कूष्मांडहोमः। तथा च श्रुतिः। कूष्मांडैर्जुहुयाद्योऽपूत इति मन्येतेति सा
यज्ञोपवीतं विना यज्ञोपवीतमन्यथा कृत्वा हत्वा वा भोजने विण्मूत्रोत्सर्गे वा गायत्र्यष्टस
हस्रेण प्राणायामेन शुद्धिः। पाने त्रिप्राणायामाः। भक्षणे षट् प्राणायामाः। भोजने मेह
ने चैवं। यज्ञोपवीतमेखलाजिनदंडानां लोपे व्याहृतिहोमः। षट् प्राणायामान्कृत्वा पु
नर्धारयेत्। संध्यादिकार्यलोपे स्नात्वाष्टसहस्रगायत्रीजपः। भिक्षाटनमकृत्वा स्व
स्थश्चेकान्नाशनेष्टशतजपः। भिक्षां याचित्वैकाशने न दोषः। गुरुशुश्रूषादिलोपे
ष्टशतजपः। मधुभक्षणे मेध्यमांसभक्षणे च कृच्छ्रः। मत्स्यापराकः। अभ्यासे द्विगुणं।
पुनः संस्कारः। ततो व्रतसमापनं। तदेकवैद्यार्थे गुरूच्छिष्टं देयं। ततो निरुज्जो हंसः शु

शुश्रूषयित्वा दिनसमुपतिष्ठेत्। अज्ञानाद्विषपातादि गुरुप्रतिकूलकर्माचरणप्रतिषेधादिनाप्रसाद्यैवशुद्धिः।

१-१२ चोरव्याघ्रादिभयाकुलप्रदेशे महांधकाररात्रौ गुरुणा स्वकार्यप्रेषितः शिष्यो दैवान्मृतश्चेत्स गुरुः कृच्छ्रत्र

यं कुर्यात्। सर्वत्रारोग्यार्थमौषधपथ्यान्नप्रदाने तदर्थे यत्नेन मृते न कस्यचिद्दोषः॥ ॥अथ मिथ्या

भिशंसने॥ ॥यस्तु ब्राह्मणो ब्राह्मणं महापातकाद्यैर्मिथ्याभिशंसति स मासमंबुभक्षो नियतेंद्रि

यः शुद्धवतीमंत्रजपशीलः शुध्येत्। क्षत्रियाद्यभिशंसने द्वादशाहानि कुर्यात्। क्षत्रियाद्या ब्राह्मणा

भिशंसने द्वित्रिचतुर्गुणं कुर्युः। शूद्रस्य जपस्थाने ऽमंत्रप्राणायामाः। भूताभिशंसिनां तदर्धं। अतिपा

तकाभिशंसिनां पादोनं। अनुपातकाभिशंसिनां ततो न्यूनं। मिथ्याभिशस्तः॥ कृच्छ्रं वाग्नेयं पु

रोडाशं वा यव्यं पशुं कुर्यात्। अतिपातकादिषु पापेषु पादह्रासः॥ ब्रह्मघाताकनिर्घ्णा तु भार्यामनु

युक्तो ऽमत्यागत्वा वांई मत्या सांवत्सरं ब्राह्मणगृहे भैक्षं चरेत्। रजस्वलां स्वभार्यां ममत्वा स कृच्छ्र १-१३

त्वा त्रिरात्रं कृत्वा तं घृतं प्राश्य शुध्येत्। अभ्यासे सप्तरात्रं। मत्या स कृच्छ्रे सप्तरात्रं। अभ्यासेति

कृच्छ्रः। अत्यंतानवच्छिन्नाभ्यासे त्रैमासिकं॥ अथ रजस्वलानां परस्परं स्पर्शने अन्यस्पर्श

नेन्यस्य च स्पर्शने प्रवक्ष्यते। रजस्वले द्वे वर्णे ऽसवर्णे वा चैकभर्तृके मत्या ऽमत्या वा परस्परं स्पृष्टे सद्यः

स्नानेन शुद्धिः स्यात्। असपत्न्योः सवर्णयोर्योनिमात्रसंबंधयोरमत्यास्पर्शने स्नानमात्रं। मत्या

त्वेकरात्रं निराहारा रत्नं पंचगव्याशनं। असंबंधयोः स्पर्शे त्वमत्या स्नानादिनांते रात्र्यंते वा शुद्धिः॥ म

त्यास्पर्शे त्वा शुद्धेर्नाश्नीयात्। भुंक्ते प्रतिदिनमुपवासस्तावद्दानं वा। असवर्णयोः स्पर्शने तु ब्रा

ह्मणीशूद्र्योर्मत्यास्पर्शे ब्राह्मण्याः कृच्छ्रः शूद्र्याः पादकृच्छ्रः। तावद्दानं वा ब्राह्मणीवैश्ययोः स्प

र्शे ब्राह्मण्याः पादोनकृच्छ्रः वैश्यायाः पादकृच्छ्रः ब्राह्मणीक्षत्रियायाः स्पर्शे ब्राह्मण्याः कृच्छ्रार्धं

क्षत्रियायाः पादकृच्छ्रः क्षत्रियाशूद्र्योः स्पर्शे क्षत्रियायास्त्रिरात्रं शूद्र्यास्त्वहोरात्रं क्षत्रियावै

श्यायाः स्पर्शे क्षत्रियायास्त्रिरात्रं वैश्यायामहोरात्रं। वैश्याशूद्र्योः स्पर्शे वैश्यास्त्रिरात्रं शू

द्र्याः चतुर्थकालं। एतासामशुद्धावर्णस्त्रीणां मत्यास्पर्शे शुद्धिः। अमत्यास्पर्शे तु सवर्णा

मधिकवर्णां वा स्पृष्ट्वा स्नायादेव। हीनवर्णां स्पृष्ट्वा स्नात्वा शुद्धेर्नाश्नीयात्। यदि शुक्लाप

श्वासपतितभोजनमुपवासस्तावद्दानं वा। विप्रभोजनादिकं वा प्रत्याम्नायं कुर्यात्। चंडालाद्यंतेवसायि
१..२४ पतितशवादीनां मत्या स्पर्शने सद्यो हनि अंबु भुंजानातिक्रम्य प्रायश्चित्तं कुर्यात्। तत्र प्रथमेह्नि
स्पर्शे त्रिरात्रं। द्वितीये द्व्यहं। तृतीये त्वहोरात्रं। ततो नक्तं। प्रथमादिदिने यदि भुक्ते पश्चार्धं पा
दपादन्यूनं दिनानुसारेण कुर्यात्। अमत्या चंडालादिस्पर्शे तु तदाद्यनाहारात्काले नैव शुध्ये
त्। अत्र प्रथमदिने भुक्ते प्रत्याम्नायः। मत्या रजकादिस्पर्शनेव चंडालादिस्पर्शवत्। किं तु प्र
थमादिदिने भुक्ते कृच्छ्रः। द्वितीयाहाद्यर्धन्यूनं कुर्यात्। अमत्या रजकादिस्पर्शनेव तदाद्य
भुंजानैव काले न शुध्येत्। भुक्तौ प्रत्याम्नायः। श्ववृकसृगालवानरखरोष्ट्रादि विड्वराहका
ककुक्कुटपंचमोच्छिष्टमूत्राणां मत्या स्पर्शने तदाद्यहां भुंजाननीला प्रायश्चित्तं। प्रथमे
ह्नि स्पर्शे द्व्यहं। द्वितीये होरात्रं। तृतीये नक्तं। तत एकभक्तं। अत्र प्रथमादिदिने भुक्ते का १..२४
यं पादपादन्यूनं कुर्यात्। अमत्या श्वादिस्पर्शे तदाद्य भुंजानैव काले न शुध्येत्। भुक्तौ प्र

त्याम्नायः। चंडालरजकरजस्वलादिस्पृष्टानां मत्या स्पर्शने तिहीनाभेर्ध्यादि मक्तोच्छिष्टस्पर्शने तदा
द्यहान्यभुंजानातिक्रम्य नीला प्रथमेह्नि स्पर्शे त्रूपवासः। द्वितीये नक्तं। तृतीये त्वेकभक्तं। परतः पं
चगव्यं। प्रथमादिदिने भुक्ते त्रिद्व्येकरात्रोपवासनक्तानि। अमत्या स्पृष्टस्पर्शे चाभुक्ता काले
न शुध्येत्। भुक्तौ प्रत्याम्नायः। अशक्तावमत्या चंडालकरजस्वलादिस्पर्शने सद्यः स्नात्वा शुद्धिः।
रात्रौ चंद्रदर्शनान्नाद्यात्। अत्यशक्तो स्नात्वा न दैवाद्यात्। उच्छिष्टयोरजस्वलयोरमत्यास्प
र्शने ब्राह्मणी कृच्छ्रेणास त्रिरात्रेण शुध्येत्। शूद्रादाने रूपोषिता। अन्यवर्णस्त्रीणामनुच्छिष्टा
नां मत्या परस्परस्पर्शने यत्प्रायश्चित्तं तदेवोच्छिष्टानां अमत्या स्पर्शनेपि। मत्योच्छिष्टयोस्प
र्शने न तद्द्विगुणं। उच्छिष्टां द्विजां रजस्वलां स्पृष्ट्वा त्रिदध स्तनोच्छिष्टे त्रूपवासः। ऊर्ध्वोच्छि
ष्टस्पर्शने त्रिरात्रं। रजस्वला भुंजानोच्छिष्टचंडालादि तदा लं भुंजानानीला प्रथमेह्नि
स्पर्शे गोमूत्रयावकं षड्रात्रं द्वितीये त्रिरात्रं तृतीये द्विरात्रं चतुर्थे त्र्एवासः। अत्र प्रथमा

द्विदिनेभुक्तौकायोत्तरंवाई। उच्छिष्टारजस्वलारजकादीन्स्पृष्ट्वा तदाद्यंस्पृष्ट्वानैवस्थिताप्रथमा
दिदिनस्पर्शेपंचरात्रावेकैकदिनह्रासंकुर्यात्। अत्रप्रथमादिदिनेभुक्तौत्रिरात्रोत्तरंकार्यं।
१-१५ श्वादिस्पर्शेतदाद्यभुक्त्वैवचतूरात्रादिप्रथमादिदिनेभुक्त्वाउपवासोत्तरंत्रिरात्रंचंडालर
जस्वलादिरजकादिसंस्पृष्टस्पर्शनेभुक्त्वैवत्रिरात्रादिप्रथमदिनेभुक्तौप्रत्याम्नायः। सर्व
त्राशक्तौकांचनंदद्यात्। विप्रेभ्योभोजनंवान्यद्वातत्समंकुर्यात्॥ अप्रयत्नेसमुत्पन्नेरजो
दृष्टेत्वेवं। सपत्नीरजस्वलांस्पृष्ट्वारजोदृष्टेसद्यःस्नात्वाशुध्येत्। असपत्नीसवर्णामधिक
वर्णांवास्पृष्ट्वारजोदृष्टेत्वेकंरात्रंनिराहारस्तेहीनवर्णांस्पृष्ट्वावाशुध्येत्। भुक्त्वापंचगव्याश
नं। चंडालादिसूतिकाशवतत्परिवारकादिस्पर्शेरजोदृष्टेत्रिरात्रं। अंत्यजादिस्पर्शोपहतौ २-२५
रजोदृष्टेत्वुपवासः। अप्रयत्नेसमुत्पन्नेरजोदृष्टेसर्वत्रबालाप्रत्याम्नाया अभिषेकेकृते
भुक्तिःस्यात्। पश्चादनशनप्रत्याम्नायः। इतरस्याआशुद्धेरभोजनं। भुक्तौप्रतिभोजनमु

पवासप्रत्याम्नायः॥ कृच्छ्रचांद्रादिव्रतस्थायाःस्नानेनैमित्तिकेप्राप्तेरजोदृष्टेपात्रांतरिततोयेन
स्नानंततोद्भिःसिक्तमात्रावस्त्रपीडनमन्यवस्त्रधारणंवाकृत्वाव्रतंसमाचरेत्। जाताशौचेमृ
ताशौचेवामध्येऋतुदर्शनेस्नात्वाभोजनंरजस्वलायाः। व्रतस्थायारजस्वलाभिभाषणे
तूपवासः। रजस्वलांदृष्ट्वाभुक्त्वारजस्वलास्नानकालंनाश्नीयात्। व्रतस्थायाःपंचगव्यं
नरजस्वलाश्वादिदष्टापंचरात्रंनिराहारापंचगव्येनशुध्येत्। प्रारब्धेदीर्घव्रतेरजोदृष्टे
व्रतलोपोनास्ति। हविष्यभोजनादिकुर्यात्। देवार्चनादिकंनकुर्यात्। शुद्धिकालेतुस्नात्वा
भुक्तौकार्यं। मत्स्याचांद्रांशेषमभक्ष्यभक्षणप्रायश्चित्तेवक्ष्यति। रजस्वलात्वंजनाभ्यंजन
स्नानप्रवासदंतधावननखनिकृंतनरज्जुस्पर्शव्यापारतांबूलमधुमांसगंधमाल्यादि
दिवास्वापग्रहनिरीक्षणादिवर्जयेत्। पाणौमृन्मयेशरावेखर्परेवाभुंजीतेत्यादिनि
यमाश्च॥ ॥इतिरजस्वलाविधिः॥ ॥अथसुतानांविक्रये। देवगृहप्रतिश्रयो
द्यानारामपुष्करिणीसभाप्रपापुण्यसेतुविक्रयेचांद्रादिषेकं। अथवाचैमासिकमा

१..२६ पादितप्तकृच्छ्रः। अत्यंतापदि सांतपनं। पुत्रविक्रये सर्वं द्विगुणं। एकापत्यः पुत्रविक्रये त्रिषवण
स्नाय्यधःशायी चतुर्थकालाशी वत्सरेण शुद्ध्येत्। कन्याविक्रये तदर्द्धेन शुद्धिः। अयाज्य
याजने तत्र व्रात्ययाजकश्च व्रात्योपनेताध्यापकश्च हीनयज्ञयाजकश्च शूद्रांत्येष्टिकर्मया
जकश्च वेदविप्लावी तस्करव्यतिरिक्त शरणागतघाती तस्करत्यागी वा अतिचारी वामत्या का
यादियोग्यं कृच्छ्रत्रयं कुर्यात्। मत्या व्रात्यस्योपनयनाध्यापनयाजनेषु द्वादशकं व्रतं कुर्यात्।
॥ तच्चोक्तं व्रात्यप्रायश्चित्तेषु॥ अतिक्रांतोपनयनकालो व्रात्यः। षोडशादि द्वादशांतो यज्ञो
हीनः। आततायिन्यभिचारिणि दोषमाहुः। ब्राह्मणाद्यंत्येष्टिकर्म सुलोभाद्याजने कामतः तिक्त
कृच्छ्रः तप्तकृच्छ्रः। अभ्यासे द्विगुणं। अत्यंताभ्यासे त्रिगुणं। शूद्राद्ययाज्ययाजने त्वमत्या चांद्रादि
षट्कं। अशक्तौ कृच्छ्रः। मत्या त्रैमासिकं। अभ्यासे द्विगुणादि परिवेदनादियाजने चैवं। स
र्वं चंडालादिश्रोत्रावकाशाद्येनध्यायेष्वध्ययनं वेदविप्लवः। उत्कर्षहेतोरधीयानस्यार्किं
पठसि नाशितं तत्त्वयेत्येवं पर्यनुयोगदानं च विप्लवः। चंडालादिपतति शब्दश्रावणे तू

पवासः मत्या त्रिरात्रं अभ्यासे कृच्छ्रः। अत्यंताभ्यासे कृच्छ्रत्रयं। स्मृतिधर्मशास्त्रादिव्याख्याने तु त
दर्द्धं। वेदपाठे नित्यानध्यायेष्वध्ययने यावदधीतं तावज्जलेऽघमर्षणवत्। स्वाध्यायं जपेत्।
अशक्तौ जले जपेत्। अनघमर्षणवत्। अत्याशक्तौ स्थले जपेत्। तावदन्यं मंत्रं वा जपेत्। म
त्याप्रत्यनध्यायमुपवासः। अभ्युच्चयध्ययने चैवं। नैमित्तिकानध्यायाध्ययने चैवं। उदीषस्य
तदर्द्धं। काककुक्कुटमूषकमंडूकाद्यंतरागमने नक्तं। गवाश्वमहिषादिपशुस्त्रीशूद्रांत्यग
मने तूपवासः। मार्जारसर्पनकुलपंचमजात्याद्यंतरागमने त्रिरात्रं त्रिरात्रस्नानं वा श्वद
कस्तगालश्वानररजकाद्यंतरागमनेऽध्ययने कार्यं। खरवराहोष्ट्रादिचंडालसूतिकोद
क्याशवाद्यंतरागमने कायत्रयं। गोरगवयाजादिब्रह्मोज्झनास्तिकादीमंतरागमने त्रै
मासिकं। शशकमेषश्वपाकादिगमने षाण्मासिकं। गजगंडच्छागव्याघ्रमहापात
कीकृतघ्नादिगमनेऽध्ययने कृच्छ्राद्यं तावत्कालमनध्यायश्चासर्वत्र मत्यांतरागम
ने तदानीमेव स्वाध्यायं विरमेन्न प्रायश्चित्तमित्येके॥ ॥इत्यादि ज्ञेयं॥ ॥

पितृण्यागुरूणामकारणत्यागे चांद्रादिष्वेकं त्रैमासिमधिकं मासंषष्ठान्नकालतासहिताज
पोवाधिकः॥ सुतत्यागे चांद्रादिष्वेकं मासं त्रैमासिकं बांधवत्यागे चैवं। कन्यासंदूषणे सवर्णा
नां चांद्रं त्रैमासिकं वा। असवर्णानां चानुलोम्येन पयोमासं कार्यं। प्रातिलोम्ये तु क्षत्रिय
वैश्ययोः कृच्छ्राब्दं। शूद्रवधः। एवमत्यंताभ्यासे सवर्णस्य कृच्छ्राब्दं। सोमविक्रयी वृषली
पतिः कौमारदारत्यागी शूद्रयाजको गुरोः प्रतिहंता नक्षुरा मद्यपो ब्राह्मणवृत्तिघ्नः कृ
तघ्नः कूटव्यवहारी पतितव्यवहारी मित्रध्रुक् प्रतिवृत्तिघ्नामत्या त्रैमासिकं। मत्या षाण्मासि
कं। अभ्यासे कृच्छ्राब्दं कुर्यात्। देवताराधाधनार्थं गृहीतव्रतलोपेन्यस्मिन्व्रतलोपे मात्मा
र्थपाके च मद्यपस्त्रीनिषेवणे चांद्रादिष्वेकं त्रैमासिकं वा॥ अधीतस्वाध्यायत्यागे व्य
सनासक्त्या कृते ब्रह्महत्यासमवत्। सच्छास्त्राभ्यासाद्यासक्त्या वा त्यागे चांद्रादिष्वेकं।
त्रैमासिकं वा। अत्यंताप‌दि ब्रह्मोज्झस्य कार्यं॥ अथाग्नित्यागे॥ नास्तिक्यादग्नित्यागे मा १०२६
सद्वयं कृत्वा पुनः संधानं। मासत्वलुक्षयेति कृच्छ्रः। षण्मासे पराकः। षण्मासादूर्ध्वं चांद्रादि

ष्वेकं। संवत्सरादूर्ध्वं त्रैमासिकं द्विमासिकं वा आलस्यादिनाग्नित्यागे तु द्वादशाहातिक्रमे त्र्यहं उपवा
सः। मासातिक्रमे द्वादशाहमुपवासः। संवत्सरातिक्रमे मासोपवासः। पयोभक्षणं वा। प्रमादा
दिनाग्नित्यागे वा त्रिरात्रा द्वादश लघुप्राणायामाः। आषड्रात्राच्चतुर्विंशति। रात्रा द्वादशरात्रा
त्पंचाशत्। आविंशतिरात्राच्छतं प्राणायामाः। आत्रिंशद्रात्रादुपवासः। आषष्टिरात्रात्त्रिरा
त्रं। आषण्मासान्मासमासंवत्सरात्कार्यं। अतः परं प्रत्यब्दं च कार्यं। सर्वत्र यावत्कालमहोमी
तावद्द्रव्यं दद्यात् आग्न्याधेयात्। संवत्सरादूर्ध्वमग्निहोत्रत्यागे चांद्रं कृत्वा पुनः संधानं। द्विवर्ष
त्यागे चांद्रं सोमायनं च। चांद्रत्रयं वा त्रिवर्षत्यागे कृच्छ्राब्दं गोदानं चा पुनराधानं वा। स्त्रीजीवने
हिंसाजीवने वश्याद्यर्थौषधजीवने वा हिंसार्थयंत्रविधाने च चांद्रादिष्वेकं। त्रैमासिकं वा।
मृतमृगया दिव्यसने पुत्रेवं॥ अन्ततवाकूमस्करो राजप्रेष्यो रक्षारोपकवृत्तिर्गरदो
ग्निदो रवरगजरथारोहणवृत्तिरंगोपजीवी ग्रामयाजकः। शूद्रोपाध्यायो वृषलीपतिः भां
डिकः क्षेत्रोपजीवी श्वयन्त्रिर्ब्रह्मजीवी किल्बिषिकः कोदेवलकः पुरोहितः कितवो मद्यपः कूटकार

कोपपन्नरपशुविक्रेतारित्यादि अभोज्यान्नास्ते ब्राह्मण्यमिच्छंतो धनं त्यक्त्वा त्रैमासिकं कुर्युः। बद्धका
लेद्रव्यं त्यक्त्वा चतुर्थकालाहारा त्रिकालस्नायिनो वृंदं चरित्वा ते देवपितॄणां तर्पणं गवादिकं द
१०१८ त्वा शुद्ध्येयुः। आगणिकश्रमणजीवीपांडिकस्तूर्यादिजीवी बंधीवा श्ववृत्तिः सेककोब्रह्मजी
वीमूल्येन द्विजकर्त्ता वा।। आत्मविक्रये शूद्रसेवायां च चांद्रादिषेकं त्रैमासिकं वा। बद्धका
लशूद्रसेवायां चतुर्थकालमितभोजी नखिका कस्नायिनः स्त्रीनासनाभ्यां विहरं तत्रिभिर्व
र्षैः शुद्ध्यंति। समुद्रयाने ब्राह्मण्यापहरणे सर्वपण्यव्यवहरणे भूमिहृते नैवं। हीनसख्ये चांद्रा
दिषेकं। त्रैमासिकं वा। अहीनसख्यभेदे तत्पोष्यपयः पारणं।। हीनयोनिनिषेवणे चांद्रादि
षेकं। अनुक्ते चांद्रादिषेकं। त्रैमासिकं वा। तत्र तमत्या ब्राह्मणो राजन्यां पूर्वोढां गत्वा कार्यं
कुर्यात्। वैश्यां पूर्वोढां गत्वा तप्तकृच्छ्रं कार्यं शूद्रां पूर्वोढां गत्वा कृच्छ्रं चातिकृच्छ्रं। राजन्यो वैश्यां पू १०१८
र्वोढां गत्वा अतिकृच्छ्रं। वैश्यः शूद्रां पूर्वोढां गत्वा कार्यं। मत्या चांद्रादिषेकं। ब्राह्मणादिषु यो
ग्यं योज्यं।। साधारणस्त्रीगमने तु पशुवेश्यादिगमने त्वमत्या कार्यं। अभ्यासे चांद्रादि

षेकं। मत्या कुशतप्तोदकं सप्तरात्रं सकृत्पिबेत्। अभ्यासे त्रैमासिकं। अत्र प्रतिनिमित्तनैमित्तिक
प्रायश्चित्तस्य वृत्तिर्नास्ति। किं त्वेवं। मत्या गमनाभ्यासे तु अहर्गणावृत्तिर्मासादर्वाक्। ततो मा
सगुणावृत्तिर्यावदब्दं ततोऽब्दगुणावृत्तिर्यावत्पापमेवं चरेत्। अमत्या गमनाभ्यासे तु सकृत्कृ
ते तुष्यत्सोक्तं त्रिभिर्दिनैः स्त्त त्रिगुणं मासात्परं पंचगुणं। षण्मासादशगुणं। अब्दात्पंचदशगु
णं। त्र्यब्दाद्द्विशतगुणं। ततोऽप्येकं प्रकल्प्यं। एवमुपपातकाभ्यासे सकृत्कृते तु यथोक्तं त
द्वितीये द्विगुणं। तृतीये त्रिगुणं। चतुर्थे निष्कृतिर्नास्तीत्यादि। कसाधारणस्त्रीगमने तु ज
न्मप्रभृत्यनुसंधानानवच्छिन्नाभ्यासे न गुरुतल्पगव्रतं।। अनाश्रमे तु आश्रमासंभ
वे वत्सरेकार्यं कृत्वाश्रममुपेयात्। यद्वा त्रैमासिकं। ततो द्विर्द्वित्रिचतुर्गुणं योग्यं योज्यं।
परपाकरुचित्वे च असच्छास्त्राधिगमने। आकराधिकारित्वे भार्याविक्रये च चांद्रादिषेकं
त्रैमासिकं वा।। ।।इत्युपपातकादिप्रायश्चित्तं।। ।।अथासत्प्रतिग्रहे। तत्र प्रतिग्रह
स्यासत्त्वं जातिदुष्टचांडालादेः कर्मदुष्टपतितादेश्च भवति। कुरुक्षेत्रादिदेशग्रहणादिका।

ध्वेनस्वन्नपतोपिसुरामद्यमहिषीमेषीकृष्णाजिनकाष्ठपुरुषमृतशय्योभयतोमुखील्यादेरसत्वं। तत्र
१-१९ तुपतितादेःमेष्यादिप्रतिग्रहेब्रह्मचर्येवागोष्ठेवसन्त्र्यहंसावित्रींत्रिसहस्रंजपेत्। पयोव्रतेन
मासेनशुध्येत्। न्यायवृत्तिब्राह्मणादेःसकाशान्निषिद्धमेष्यादिप्रतिग्रहेपतितादेरनिषिद्धभू
म्यादिप्रतिग्रहेचचांद्रं। पवित्रेष्टिर्वामित्रांगारेष्टिर्वामित्रविंदेष्टिर्वागायत्रीलक्षजपोवा। अ
भ्यासेमासमप्सुवसन्षष्ठकालेपयोभक्षोमासांतेविप्रान्संतर्प्यशुध्येत्। पतितादेःकुरुक्षे
त्रेग्रहणादौमेष्यादिप्रतिग्रहेचैवं। सर्वत्रानुक्तौदातृदेशकालद्रव्येषुदुष्टेषुक्षादशानिष्क
श्माणद्रव्यप्रतिग्रहेकार्यं। एवंसर्वत्रद्रव्योत्सारेणप्रायश्चित्तवृद्धिर्ह्रासोतादृदेशकालद्रव्ये
षुअन्यतरदोषेप्रायश्चित्तस्यैकगुणानुवृद्धिः। मणिवासोगवादीनामल्पद्रव्याणांप्र
तिग्रहेष्टसहस्रंजपः। ततोल्पेल्पं। भिक्षाभिक्षामात्रप्रतिग्रहेषुपुण्यंमंत्रमुच्चारये १-१९
त्। प्रायश्चित्तंसर्वद्रव्यंलक्षकृत्वैवकार्यं। नद्रव्येविद्यमाने॥ अथाभक्ष्यभक्षणेप्राय
श्चित्तं॥ तत्रस्वभावदुष्टलशुनपलांडुगृंजनछत्राकविड्वराहग्रामकुक्कुटानांषण्मा

सममास्याभक्षणेसांतपनं। अभ्यासेयतिचांद्रायणं। मत्यासकृच्चांद्रं। अभ्यासेतुसुरापानसमत्वं। प
लांड्वादिसमेषुश्लीभेदेषुदारुपत्रपिच्छगंधमहौषधिपरण्यनवतक्रपरारिकयवनाष्ठेषु। छत्राकादि
भेदेकवकवावकादौचैवं। मत्यात्यासेतुचांद्रावृत्तिः। अत्यंताभ्यासेसुरापानसमत्वं। एतेषुबला
त्कारेणभक्षणेतदेकवैधेव। सावित्र्यष्टसहस्रेणाभ्रिसंततजलबिंदुपानेनउपवासेनचसह
शुद्धिः। सर्वत्रछार्दितेउच्चार्द्धं। गंधवर्णरसैर्लशुनादिसमेषुसांतपनं। यतिव्रतिब्रह्मचारिणांत
प्तकृच्छ्रं। खड्गारव्यपक्षिणां। कुसुंभवार्ताकुकुंभीकंशिग्रुंभूस्तृणं। खट्वांडुकवकंकल्मसर्षपतउ
लीयकनालिकानालिकेरीखड्गारुशाकानिकलिंगवार्ताककुंभीशाकेषुष्टमालाबुकरखड्गा
क्षक्षवकशणपुष्पशाल्मलेषुवान्येषुकंडुर्गंधिविड्कंदमूलफलादिषुच। ब्रश्चनोद्भवे
षुलोहितनिर्यासादिषुरेतोविण्मूत्रेषुकरनिर्मथितेदधिनिबर्हिर्वेदिअनृत्विजभ्यपस्तु
पुरोडाशेषुभक्षणेत्वमत्यासकृज्ज्वेदुपवासः। प्राग्वृत्तिरभ्यासेमत्यात्रिरात्रं। अभ्यासे
कार्यं। अत्यंताभ्यासेकृच्छ्रं। पुनरुपनयनंच। अन्यथापतेत्। नीत्या। त्वमत्यासकृद्भक्षणेवां

कृं।अभ्यासेद्विगुणं।मत्यात्रिगुणं।मत्स्याभ्यासेपतनं।अन्यनिर्माल्येत्वनापद्येवं॥ अथज्ञा
१-१२ तिदुष्टेषु।संधिनियमसूत्स्यंदिन्यनिर्दशाभेध्यसेवीमृतवत्सागवामनिर्दशाहमहिष्याश्व
क्षीरेष्वेकशफेषुमहिषीवर्जितारण्यमृगाणांअजावर्जितद्विस्तनांक्षीरपानेदधितत्सं
भववर्जितभुक्तेरमत्योपवासः।मत्यात्रिरात्रं।अविखरोष्ट्रनरवानरविड्वराहश्वापद
क्षीरेष्वमत्यासांतपनं।मत्यातप्तकृछ्रं।अभ्यासेवांदंपुनरुपनयनंच।वपनमेखलाद
डभैक्षव्रतानिसर्वत्रपुनःसंस्कारेनिवर्ततेच।अभ्यासैयनं।ब्रह्मचर्यादेःकृछ्रः।तप्तकृछ्रो।शुक्ते
षुदधिसविकारेभैक्ष्यं।द्विस्तन्येषाजं।आरण्येषुमहिष्यंच।ग्राह्यंकपिला।क्षीरादिषुक्षत्रियादे
स्तथैव।सर्वत्रनिषिद्धक्षीरविकारेषुवामत्यादिरात्रंयावकं।मत्याषड्रात्रं।अभ्यासेतत्कृतद्विगु
णं।विड्वराहग्रामकुक्कुटसमानजातियव्यतिरिक्तंपशुपक्षिमांसादिष्वजामहिषमृगा १-२
णांमृत्क्लोष्टकीटकेशनखपतंगकृमिजलकशरास्थिरक्तमत्स्यकंटकस्यास्थिभक्षणे
रक्तमवनेवाऽमत्योपवासः॥मत्यात्रिरात्रं।मांसभांडपक्वान्नाशनेकृशपक्वपयत्र्यहं

चंतो।केशादोमुखमाचप्रवेशेतत्तत्यक्तं।ब्राह्मीरसंरेवापिबेत्।अन्नभोजनकाकेमक्षिकाकेशा
दिदूषितेनंतरमुपस्पृशेत्।तच्चान्नंभस्मनावामृदावांबुनावास्पर्शयेत्।अस्पृश्यादूषितेन्नेस्ना
नंषत्प्राशनेदंतपातेचैवं।रक्तादिदृष्टोतद्उपवासः।स्वमुखेदृष्टेत्रिरात्रं।शुक्तेब्राह्मीरसेजलेकु
शोदकं।सर्पसरीसृपमूषकमार्जारकृकलासकर्कटनकुलमंडूकशृंगिमयूरक्रव्यादविषाभि
दकुलीरशिशुमारमकरचक्रसर्पमुखमत्स्यविकृतमुखशृंगिपक्षिणांमेध्यत्वेप्यामममांसेच
वृथामांसभक्षणेचानियतकमांसवर्जनेवामत्यात्रिरात्रं।मत्याकृछ्रः।प्रमादेतूपवासः।वम
नेसद्यःस्नानंपंचगव्यंच।विड्वराहग्रामकुक्कुटसमानेक्रव्यादनखान्स्वगोगोमायुच
दंष्ट्रीपंचनखसिंहव्याघ्रश्वापदगजाश्वोष्ट्रखरैकशफानामुभयतोदंतानांककबका
करभासगृध्रपादरक्तविष्किरपुंडरीककपिंजलचक्रपशुपादकुक्कुभबकहंसप्लवक्र
चाककारंडवचटककपोतपारावतपांडुशुकसारिकासारसटिट्टिभोलूककंकरक्तपा

दतित्तिरिचाषलोकिलसहलिकूटचारमंगुकलावकक्रौंचश्येनखंजरीटदार्वाघाटमूलिंगवांरु
१-२१ ल्लादीनांमत्स्यादीनांचमांसानांस्तेनस्थानगतानांशुष्कमांसगतानांचतथाविण्मूत्ररक्तशु
क्लवसामज्जानांतदुच्छिष्टानांचभक्षणेचामत्याकार्यं।अभ्यासेसांतपनंपूर्नं।मत्यातप्तकृ
च्छ्रः।अभ्यासेचांद्रं।अत्यंताभ्यासेपतनं।तथाकर्णविट्प्रभृतिमळषट्केदंकस्थ्यं।ब्रह्मचा
र्यादिमधुमांसादिभक्षणेधिकं।त्रिरात्रंकार्यंवापुनरुपनयनंततोव्रतसमापनं।तदेकवेद्यो
थैगुरूच्छिष्टंभक्ष्यंगवांमूत्रादिमेध्यं।अद्वाभ्वानामुच्छिष्टं॥ अथाशुचिसंसृष्टभ
क्षणे॥ तत्रोच्छिष्टाभक्ष्यभक्षणेतावत्।काकादिकुष्टपक्षिश्वापदश्वपिडाकनकुलो
च्छिष्टंतुयस्यांत्वरसेवजग्ध्वाकेशाद्यवसन्नंदेवद्रोण्यादौऽब्यशुद्धिसंस्काररहितंवा १-२१
पदिचेद्ब्राह्मीसुवर्चलामेकरात्रंपिबेत्।मत्याचेत्त्रिरात्रं।अल्पद्रव्येचैवं।मत्याभ्या
सेकृच्छ्रः।अमत्याभ्यासेपक्षंयावकव्रतं।व्रतस्थब्रह्मक्षत्रियवैश्यशूद्रोच्छिष्टेतुब्रा

ह्मणएकत्रिपंचसप्तरात्राणिपंचगव्यंपिबेत्।अभ्यासेप्येषामावृत्तिः।मत्याभोजनेतुमान्ये
वशुद्ध्याउपवासादिकुर्यात्।मत्याभ्यासेकायातिकृच्छ्रतप्तचांद्रायणानि।क्षत्रादौपादपादह्रा
सयेत्।भांडस्थेन्नेकेशापिपीलिकामेध्यसेविकीटैरुपहतेतावन्मात्रमुद्धृत्यमृद्भस्मता
म्रवैडूर्यहिरण्यरजतादिभिर्गोवालदर्भयुक्तेनवारिणाशेषंप्रोक्ष्यशुद्धेत्।हस्तस्थमेवं
भक्तंत्यजेत्।मुखस्थंनिष्ठीव्यघृतंप्राश्नीयात्।मनुष्यरेतोविण्मूत्रभक्षणेवर्णास्तप्तकृ
च्छ्रातिकृच्छ्रकायत्रिरात्राणिकुर्युः।मत्यातुचांद्रतप्तकृच्छ्रातिकृच्छ्रकायान्पुनःसंस्कारा
श्च।अलेह्यापेयचंडालाद्यन्नेचैवं।चंडालःश्वपचःक्षत्तासूतोवैदेहिकोमागधइत्याद्या
अंत्यजास्तदन्नभोजनेचैवं।अंत्यानांभुक्तशेषंभुक्त्वावर्णायतिकायंचांद्रंतदर्द्धपादंच
कुर्युः।अंत्यानामुच्छिष्टभोजनेतुलक्षणाचांद्रं।अज्ञानेसांतपनंषड्रात्रंत्रिरात्रंचकुर्युः।
मत्याभ्यासेऽत्यंताभ्यासेवद्दित्रिचतुर्गुणंनिरंतरेपतनं।आमग्रहणेत्वर्द्धं।तदुच्छिष्ट
भोजनेद्विगुणं।सहभोजनेत्रिगुणं।अत्यंताभ्यासेपतनं।दीपोच्छिष्टंतैलंराचोरथ्या

१-२२ हतं वास्यं गशिष्टं भुक्त्वा नक्तं चरेत्। पीतावशिष्टे मुखनिर्गते मत्या चांद्रं पराकं वा कुर्यात्। पीता
वशिष्टपात्रे तु पाने वामहस्तेन तु पाने तदर्द्धं॥ अथाशुचिद्रव्यसंस्पृष्टभक्षणे तु। तत्र के
शकीटाद्यवसन्ने नीलीलाक्षास्नाय्वस्थिचर्मरक्तमांसमस्रावगोसुराश्मशुक्लविण्मूत्र
संस्पृष्टे महापातक्यंवेक्षिते दुष्टं तयुच्छिष्टे विड्वराहाद्युच्छिष्टे गवाघ्राते भुक्ते पर्युषिते
रथापक्केपि त्रर्थान्ने होमार्थं हविष्यमत्याभक्षणे पाने चोपवासः। पंचगव्यं वा। सर्वत्र म
त्या पादकृच्छ्रः। अविज्ञातजात्यस्थ्यादिदूषितेन्ने तदर्द्धं। कर्णविड्डादिमलषट्के दर्द्धं च।
एतदल्पसंसर्गे। महासंसर्गे वृद्धिगुणं। तत्रापि दूषणाज्ञाने तप्तकृच्छ्रः। सर्वत्र पुनः
संस्कारश्चासंसर्गे दुष्टे क्रियादुष्टे स्वभावदुष्टे चांडालाद्यंत्यसूतिकारजस्वलापतित
शवदाहकषंढदेवलकपतितात्मिशास्त्राद्या वैश्वचंडालाद्याः श्वविड्वराहखरोष्ट्रश्वापदा १-२२
द्याः पंचमश्चयूपशवाद्याश्च चंडालादीन्भुंजानो दृष्ट्वा ग्रासं समुत्सृज्य स्वबाह्यमु
खलेपान्प्रक्षाल्य स्नायात्। किंचिन्मात्रनिरणे गाष्टशतजपश्चात ग्रासभोजने

पक्षिण्युपवासः। समस्तभोजने त्रिरात्रं। जलपाने तदर्द्धं। श्वादिदृष्ट्वा वमनं कार्यं। भुक्त्वा पीत्वा
तदर्द्धं। चंडालादिखमज्ञातो भुंजानः कृत्वाभोजनं विरवं भुक्त्वेत्। भुक्तौ स्नात्वाष्टशतज
पमुपवासो वा॥ चंडालाद्युच्छिष्टस्पृष्टे कांस्यभोजने कृच्छ्रः। मन्मयेति कृच्छ्रः। रजका
द्युच्छिष्टस्पृष्टे तदर्द्धं। चंडालादिस्पृष्टान्नभोजने त्रिरात्रं। चंडालादिदृष्टान्ने तूपवासः
पंचगव्यं वा। चंडालादिहस्तगतमांसभोजने कार्यं चांद्रं वा चंडालादिबकालकारे चांद्रं। चं
डालादिहस्ते मद्यपाने चांद्रद्वयं। पराकश्च। चंडालादिसंस्पृष्टभोजने चांद्रत्रयं पराकश्च
चंडालादिस्त्रीगमने पराकं कार्यं च। चंडालादिसंकरगमने पर्णकृच्छ्रं च। चंडालादिह
स्तभोजने कार्यं चांद्रं वा। चंडालादिहस्तभोजने द्विगुणं। चंडालाद्युच्छिष्टभोजने
चतुर्गुणं। चंडालादिहस्तनिर्मुक्तं बुपाने तूपवासः। तत्स्पृष्टाविषये तत्तदर्द्धं। चंडा
लादीनुच्छिष्टो दृष्ट्वोपवासेन। दृष्ट्वा त्रिरात्रं। हीनवर्णी रजस्वलां दृष्ट्वा नाश्नीयात्।
।आशुद्धेः। सवर्णामधिकवर्णां वा स्पृष्ट्वा तस्मिन्नेवाहनि स्नात्वाश्नीयात्। रजस्व

१..२३ लाकादिभिः अन्यया शरजस्वलया स्पृष्टा चेदुपवासः पंचगव्यं चामत्या चेदाशुद्धेरुपोष्य स्ना
त्वा घृतप्राशनाच्छुद्धिः। रजस्वला चंडालाद्यंत्यजैः स्पृष्टा नाश्नीयात्। आशुद्धेः। भुक्ता चेन्मत्या त्र्य
हात्यतिक्रम्य शुद्धौ प्रायश्चित्तं कुर्यात्। प्रथमेऽह्नि त्रिरात्रं। द्वितीयेऽह्नि द्व्यहं। तृतीये त्र्यहोरात्रं। पर
तो नक्तं। मृतसूतकसंपर्के तु तद्दशाहं आस्नानकालं नाश्नीयात्। मत्या भुक्त्वा चांद्रं। चंडा
लादिसंकरे भुक्त्वा पक्षं गोमूत्रयावकं कुर्याद्वा। चंडालादिर्यस्य गृहे लज्ञातस्तिष्ठति तस्या
न्नममत्या भुक्त्वा कार्यं मत्या पराकः। चंडालादिस्वीकृततीर्थतडागनदीष्वमत्या पीत्वा पं
चगव्यं पिबेत्। चंडालाद्यंबुपाने कार्यं तदर्धं वा। चंडालादिभांडसंस्पृष्टांबुपाने गोमूत्र
यावकं त्रिरात्रं। भुक्तोच्छिष्टः चंडालादिस्पर्शने कार्यं। यद्वा गायत्र्यष्टसहस्रं द्रुपदाश
तं वा स्नात्वा त्रिरात्रं तेन पंचगव्यं पिबेत्। आमभक्षोच्छिष्टे पादं अधस्तनोच्छिष्टे चंडाला १..२३
दिस्पृष्टः पादं। चंडालादिस्पृष्टो मूत्रोत्सर्गे त्रिरात्रमुपोष्य जातवेदसं वा जपेत्।
अमत्या शक्तस्याप्युपवासः। भोजने षड्रात्रं। आमभक्षे त्रिरात्रं। प्राणायामशतं वा।

रजकादिविषये चंडालाद्युक्तार्धं ज्ञेयं। उच्छिष्टस्यादीन्यमेध्यान्यस्पृश्यस्पृष्टोऽप्युपोष्य पंचगव्यं
पिबेत्। रजस्वलासूतिकामेध्यपतितचंडालपुल्कसावधूतकुष्ठिकुणिकुनखस्पृश्याशौ
चसंस्पृष्टानि मत्या भुक्त्वा कायममत्यार्धं। अशक्तस्त्वेषु केशादयो व्यन्नेषु शंखपुष्पीकषा
यं ब्राह्मीं वा पिबेत्। शूद्रेणावामेध्यसेविकीटोपहते वा भाजने शूद्रस्पर्शे वा नखेऽनासह पंक्तौ वा
भुंजानेवायं त्वोच्छिष्टं प्रयच्छेद्वा वमेद्वा कुत्सितवाचा यत्रान्नं दद्यात्। उच्छिष्टपंक्तौ वा तत्र भु
क्त्वोपवासं पंचगव्यं च। मत्या सांतपनं। वामहस्तविमुक्तपात्रान्नभुक्तौ त्वेकपंक्तौ वैकस्मि
न्भुक्तिलेपश्चाद्भुक्तौ सांतपनं। मृतपंचनखभस्मखरविड्वराह। दिशावमृतक्तकूपादौ विण्मू
त्रादि शिरस्यं तोयहते वपाने स्नाने च वर्णा स्त्रियो द्वे कोपवाहनक्तानि कुर्युः पंचगव्याशनं
च। शवक्लिन्ने भिन्नशवयुक्तेंबुपाने मत्यातिकृच्छ्रः। तादृशानुषशवक्तोपहते म
त्या चांद्रायणं। चंडालादिसंबंधकूपाद्यल्पजलाशये शुष्कांबु पीत्वा स्नात्वा तत्र कांडस्थं वा
मत्या सर्वा महासांतपनं कार्यं तदर्धं पादं क्रमात्त्वरेयुः। अमत्या तत्रतदर्धं। अशक्तः पंचग

व्यंपिबेत्॥ महाजनकाशयेनदोषः। कदपुष्करिण्यादिषु जानुदघ्नेनदोषः। ततोधस्तनेत्वस
१२४ स्नानत्कंमत्योपवासंविप्रः कुर्यात्। रजकाद्यंत्यजकूपभांडस्थांबुपयोदधिपानेत्वमत्या
द्विजाब्रह्मकूर्चेनत्रिध्येकोपवासान्कुर्युः। शूद्रस्यत्वपवासः शक्त्यादानंचामत्याद्वि
गुणं। अंत्यजैः खानीतवापीकूपतडागादिषुस्नानेपानेचोपवासः। मत्याभ्यासेकार्यं।
मध्यमेषुपंचगव्यं। महत्सुनदोषः। प्रपास्वरण्यघटेसैरङ्कोणपाजकोशाविनिसृतं
चपीत्वापंचगव्येनाशक्तः शुद्धः। शक्तस्तूपवासेन॥ अथभावदुष्टभक्षणे। तत्रनि
जवर्णादिरहितंभावदुष्टं। वाग्दुष्टेन्नेभावदुष्टेभोजनेचमत्यात्रिरात्रममत्यार्द्धं। त
छर्दनेघृतप्राशनंभक्ष्याभक्ष्यशंकितभक्षणेलक्षारलवणत्यजनं। तक्षांब्राह्मीसुव
र्चलांपिबेत्त्रिरात्रं। शंखपुष्पीवापयसासहविप्रः। कुशपभोदुंबरपलाशैः बिल्वप १२४
त्रांबुपकंवापिबेत्। संवत्सरस्यत्रीन्द्वावेकंवाकृच्छ्रंचरेत्। शंकायाः विज्ञातेनेत
द्विगुणंद्विजश्चरेत्॥ ॥अथकाकदुष्टभक्षणे॥ ॥तत्रकाकदुष्टपर्युषितं

शल्कमनिर्दशगोक्षीरादितत्रामत्योपवासोमत्यात्रिरात्रंयावकव्रतं। यवगोधूमपयोदधिपिष्टविकारस्ने
हपक्वस्नेहाक्तान्नमांसादौनदोषः। दुष्टानामस्थिशृंगदंतजैः पात्रैः कंदशालूकशंखशुक्तिकपर्दिकै
श्चपीत्वानवोदकंचपीत्वास्वकालेत्र्यहादर्वाग्गवांदशाहादर्वाक्पीत्वापंचगव्यंपिबेत्। मत्योपवा
सः। सग्रहेभोजनेनवश्राद्धेचयामयामकाल्नेचचांद्रे। ग्रहणनिमित्तेनिषिद्धकालेसंध्याकालेचाति
प्रातरितिसायमित्यादौचधानादधिसक्तूनांचरात्रौतिलसंबंधान्नभोजनेस्नानेचैवमादिष्वना
दिष्टप्रायश्चित्तेषुप्राणायामशतंमत्योपवासः। अथगुणदुष्टशुक्तादिभक्षणे॥ तत्रगुणदुष्टं
शुक्तादिकषायाणांचान्योन्यदुष्टानाममेध्यानिचामत्यापीत्वाभुक्त्वाचोपवासेत्। मत्यात्रिरात्रंया
वकव्रतं। आमलकादिफलयुक्तकांजिकायांनदोषः। अभिषारेणचउध्वृतसारविलपनपिण्या
कमथितादिष्वन्नविकारेषुचमत्यात्रिरात्रंयावकममत्यार्द्धंछर्दित्वाघृतंपिबेत्। प्राक्संचनखेष्यः
प्राणिषुचैवंवैश्वदेवाद्यादिरहितान्नभोजनेवृथापाकसररसंयावपायसापूपकशष्कुलीस्त्रीमधुमां
सानांचामत्योपवासोमत्यात्रिरात्रंयावकं। आहिताग्निस्तुमत्यात्रिरात्रंकार्यंवाकुर्यात्। शू
द्रभाजनेभिन्नभांडभाजनेभोजनभांडेषुभुक्त्वाचोपवासः। पंचगव्यंचमत्यात्रिरात्रं। भिन्नकां

स्येकार्यं।भिन्नक्षांउन्नभोजनेपंचगव्यंघृतंवाब्राह्मीयापिबेत्।वटकाश्वत्थकुंभीतिंडककोविदार
१०२५ कदंबुपत्रेषुभुक्त्वाचांद्रं।लतापलाशपद्मवृक्षपत्रेषुभुक्त्वाचांद्रंचरेत्।वनस्थोयतिश्चभुक्त्वाचां
द्रफलंलभेते।नान्यःपद्मपशाशेषु॥ अथहस्तदानादिक्रियादुष्टाभोज्यभोजने।तत्रहस्तभोज
नेवाब्राह्मणसमीपेभोजनेदुष्टपंक्तौचषट्कार्द्।पंक्त्यर्थेचस्थूद्रहस्तेनचभोजनेचामल्यानक्तंम
कौमत्योपवासः।पंचगव्यंच।माक्षिकशाकगोरसलवणघृतेषुहस्तदानेतथैव।आसनारूढ
पादोवस्त्रार्द्धप्रावृतोपिवामुखेनधमितंभुक्त्वाकृच्छ्रंसांतपनं। अथश्राद्धेभोजनेपित्राद्युद्दे
शेनत्यक्त्वान्नेतु।तच्चश्राद्धानित्रिविधानि।तत्रांतर्दशाहाद्येकादशाहेचनवश्राद्धानि।एकाद
शाहदूनाब्दांतानिनिषोडशैकोद्दिष्टानि।नवमिश्राणि।सपिंडीकरणंमिश्रं।ततःपुराणानि
।एकादशाहश्राद्धंनवेषुमिश्रंतत्रप्रायश्चित्तगौरवलाघवंदोषगौरवंवास्ति।अंद्येकोद्दिष्टंस्वतं
त्रमित्येके।तत्राप्युभयधर्मप्रायश्चित्तदोषदंडाःस्युः।तत्रापदिसूतकसंबंधेषुनवमिश्रेषु १०२५
भोजनेकार्यं।एकादशाहेकोद्दिष्टेकार्यं।पादोनंकार्यंचद्वादशाहेचोनमासेवापादोनमेके
कार्यंचकुर्यात्।द्विमासेत्रिपक्षेचोनषण्मासेचोनाब्दिकेचार्द्धकृच्छ्रं।त्रिमासाद्यब्दमोक्तांतेषु

सपिंडनेचाद्याब्दिकेचोपवासः।पादकृच्छ्रोवाप्रत्यब्देपुराणेचव्रतेपारणेचनक्तं।गुरुविषयेइत्यार्थेन
वश्राद्धत्रिरात्रमाद्येत्रिरात्रं।द्वादशाहादौद्विरात्रंद्विमासाद्यावुपवासः।त्रिमासादेनक्तं।पंचग
व्यंवाप्रत्यब्दंवान्यपुराणेषुषट्प्राणायामाः।कृच्छ्रोत्रयःप्राणायामाः।तत्रैवनिस्पृहभोकुर्जप
शीलिनोवातत्तदर्द्धं।क्षत्रियादिश्राद्धेषुद्वित्रिचतुर्गुणानिक्रमात्कार्याणि।अनापदितुनव
श्राद्धेचांद्रं।चाद्यमासिकेचांद्रंकार्यंच।द्वादशाहादौपादोनंत्रिमासाद्यब्दांतेषु।सापिंड्येवैच
त्रिरात्रं।अर्द्धकार्यंवा।आब्दिकेपादकार्यं।प्रत्याब्दिकेतूपवासः।क्षत्रियस्यतुनवश्राद्धेचांद्रं।
आद्यमासिकेचांद्रंपराकश्च।द्वादशाहादौपराकएव।द्विमासत्रिमासादौमहासांतपनं।त्रि
मासादौकार्यं।आब्दिकेपादोनं।प्रत्याब्दिकेलर्द्धं।पुराणेपादं।वैश्यस्यत्वेतान्येवव्रतानि
श्राद्धानिशूद्रस्यतुद्विगुणानि।यद्वानवश्राद्धेचांद्रद्वयं।आद्यमासिकेचांद्रद्वयं।सार्द्धचां
द्रं।वाद्वादशाहादौसार्द्धचांद्रमेव।द्विमासत्रिपक्षौचांद्रं।त्रिमासादौपराके।महासांतपनं।
प्रत्यब्देमहासांतपनं।चंडालोदकसर्पब्राह्मणपशुदंष्ट्रिवैद्युतप्रपतनविषोद्बंधनत्ना
शकैर्मृतानांपतितानांचस्तेनपतितादयोभोज्यान्नेनांचश्राद्धेषुतुनश्राद्धेचांद्रमाद्यमासि

केचांद्रंपराकश्च।द्वादशाहाद्येपराकएवाद्विमासत्रिपक्षादावतिकृच्छ्रः।त्रिमासादेौकायः।आह्निके
१..२६ पादः।प्रत्याह्निकेतूपवासः।सम्यग्विषयेपिद्व्यार्थमोजिनश्चैव।अपांक्ते यानामे दशाहेभ्या
द्वेशिशुचांद्रे।यतिव्रतिब्रह्मचारिणः।सूतकान्नंनवश्राद्धमासिकादौभुक्त्वोक्तंकृ त्वाधिके
त्रिरात्रमेकोपवासंत्रिः।प्राणायामाः।घृतप्राशनंचकृत्वाव्रतशेषंसमापयेत्।अ नापदितु
कार्यंत्रिरात्रमेकरात्रोपवासंषट्प्राणायामान्पंचगव्यप्राशनमधिकमभ्यासेतुतप्तकृच्छ्रा
दिद्विगुणं।आमहेमश्राद्धंसंकल्पितश्राद्धेतुउपवासंत्रिरात्रंच।तदेवसूतकव्यवहितेषुतुब्राह्म
णक्षत्रियवैश्यशूद्रश्राद्धेषुकोद्दिष्टेषुकृच्छ्रातिकृच्छ्रतप्तकृच्छ्रचांद्रायणि।द्वादशाहाद्येषुपादं
पादंह्रासयेत्।अतिव्यवहितेषुतुत्रिरात्रादिकं।गुरुविषयेतूपवासनक्तंषट्प्राणायामाः।
अनापदिद्विगुणं।सर्वत्रअतिश्रोत्रियः।पुराणेषुअनुक्तप्रायश्चित्तेषुगायत्र्याःदशकलापः १..२६
पीत्वाशुद्ध्यति।ततःसंध्योपासनंहोमंचयथोक्तंकुर्यात्।निवृत्तेचूडाहोमेच प्राङ्नाम
करणाच्चजातकर्माणिचांगश्राद्धेसूतकेप्यसूतकेचनामश्राद्धेचूडाहोमांतेचौ लश्राद्धेसी
मंतेसोमेचाधानेब्रह्मौदनेचामत्याचापदिचशुद्ध्यासांतपनं।मत्यानापदिचांद्रं।अन्येषु

संस्कारेषुतूपवासोनित्यः।त्रिरात्रंचानापदि।अन्यदत्ताकन्यान्यस्मैपुनर्दत्तायासापुनर्भूः।असं
स्कृतेपूर्वगर्भैर्थसहतेद्वितीयेगर्भसंस्कारेसापुनरेता।कृत्वादिदशाक्षात्पश्चादेवयागर्भिणीसा
रेतोधाः।भर्तृशासनोल्लंघिनीकामचारिणी।आसांगर्भेपूर्ववत्सांतपनं।चांद्रंवासर्वप्रथमग
र्भेचअथपरियत्राशुचिद्विष्टभोजने।तत्रश्रोत्रियकृतेयज्ञेग्रामयाजककृतेस्त्रीकृतेचान्ने क्लीब
कृतेचान्नेभोजनेवाराजपुरोहितेराजसत्यवैश्यशूद्राणांक्लीबाजाविकमाहिषिकश्वास्थीनि
कभूमिपानांस्नेहगायनतक्षवार्धुषिकदीक्षावस्थितानांकदर्यबद्धनिगडाभिशस्तषंढानांपुं
श्चलीदांभिकवैद्यकुणिसांवत्सरिकाणांमत्तकुद्धातुरगणगणिकानांचकर्मारवरस्त्रीमृगजी
विनांसर्वोछिष्टभोज्यग्रपतितपिशुनानांशैलूषतंतुवायनुन्नवामयकिरातप्रव्रजितानां
कामचारिघोषतरुवाहकवाजिकानांधृतक्षीरतिललवणगुडविक्रयिणामग्निदनित्यरोगि
णांदिकविषशस्त्रकारकोविप्रगोदेववृत्तिघ्नानांचेणापपापिवेश्यापाषंडजीवीशूद्रादिप्रतिलो
मजानांकर्मारकृतघ्नपुण्यसोमात्मकर्मणांशस्त्रविक्रयिणांविषदद्धषिरंगीवतारिस्वुवर्णका
रान्नतिनाशौंडिकवस्त्रनिर्णेजकरजकवेनश्चवतांकुटंनटनर्तकवृषलीतत्पतीनांनृशंसोप
पतीतिराजकमूर्खवस्त्री।जितकितवानांशूद्राध्यापकयाजकोपपतिकैमेषिकपुत्राघर्मीयतिस्त्री

पां ग्रामयाजिरथकीअवणिक्कांडपृष्ठसेवकानां पर्याहितपरीक्षिपरिवित्तिपरिविंदानां पुंश्चूनर्भूजाग्रे
१-२८ दिधिषूपपतिनकतैलोषधवधजीविनां भगवद्धत्तिपक्षिरक्षिसमुद्रतारकहीनांगातिरिक्तांगा
नांमातपितृस्कृतगुर्वग्नित्यागिनां कूटमानकूटकसूनकान्याखत्रीसस्यविक्रयिणां सीसकारगो
धल्लोहकारसूचिकापुत्रब्रह्मचारिणां कुंडाशीवीरहगुरुगुल्मिर्वागरदरूपाजीविनां सूतिकशौ
निकपौर्णाककुलालचित्रकर्मणां योनिसंकरिकाश्रमभेदतस्करवृथाश्रमवृथाहोतृणामि
त्यादिपापिनां मार्गेतिष्ठतांभैक्षान्नेवांद्रं। एषामकृतानिष्कृतीनामन्नभोजनेयानेनेप्रतिग्रहेच
तथाकुनखिक्लृप्तउदंतकुक्षीब्राह्मणान्नादभूद्रम्लेच्छान्नादब्राह्मणानामभोज्यान्नानांचप्रपा
सचेसामरकादशाहेश्राद्धदुष्टान्नं दुष्टावघ्रकृष्टविदुषागजुगुप्सितं महापाप्यवेक्षितं शुनास्पृष्टो
दक्यादिसंस्पृष्टमवघ्रातं पक्ष्यवलीढमसत्कृतवक्रयाविलसंसरोषसविस्मयान्नंचपदास्पृष्टामव
ज्ञातमनर्चितंपर्याचांतस्त्रीशूद्रोच्छिष्टवृथामांसजातमृतसूतकसूतिकाशौचान्नचालुंचिक १-२८
रंचातोन्यतमस्यान्नंभुक्त्वादत्वारेतोविण्मूत्रभक्षणेचामत्याविरात्रंअभ्यासेकृच्छ्रं॥ मत्याति
कृच्छ्रंमत्याभ्यासेतिकृच्छ्रं॥ ब्रह्मचार्यादेःकायातितप्तकृच्छ्रं चांद्रायणिपुनःसंस्कारश्च। यद्वात्रिष
ट्नवद्वादशरात्राणिपयसा। अभ्यासेचांद्रं। अत्यंताभ्यासेचांद्रद्वयं॥ आपद्येकंद्वित्रिचतुरु

पवासाः॥ अत्यंतापदिद्विषड्नवद्वादशप्राणायामाः। आमेषुस्नानं। पक्कैभुक्ते एकभक्तं। अनाचारे
दुराचारेनक्तं। ब्राह्मणादुष्टेस्नानमष्टशतजपः। गुर्वीचार्याग्निधर्मशास्त्रगोब्राह्मणद्वेष्यान्नेशा
स्त्रखंडान्नेचैवं। बलाद्दासीकृतानां चम्लेच्छचांडालदस्युभिः। अशुभंकारितास्तेनगवादिप्रा
णिहिंसनं। इतियोगीश्वरस्मरणात्। तथाचपुष्पस्यापिशास्त्रम्लेच्छचंडालदस्युभिर्बलाद्दा
सीकृतानांगवादिप्राणिहिंसनेतदुच्छिष्टमाजनेभोजनेखरोष्ट्रविड्वराहभक्षणेतत्स्त्रीभिः
संगमेभोजनेचमासोषितद्विजस्यकार्यमाहिताग्नेश्चांद्रंपराकोवासंवत्सरोषितद्विज
स्यचांद्रंपराकश्च॥ ॥ अथज्ञातमृतारोशौचान्नभोजने॥ तत्रद्विजाशौचेसवर्णाना
मुपवासस्त्रिरात्रंवा। विप्रक्षत्रवैश्यशूद्राशौचेष्वमत्याविप्रोभुक्त्वानक्तैकद्वित्र्युपवासा
न्कुर्यात्। अभ्यासेतैकद्वित्रिपंचसप्तोपवासान्। यद्वाभ्यासेद्वादशत्रिंशत्। षष्टिशतप्रा
णायामान्कुर्यात्। मत्याचेत्सांतपनंकार्यंमहासांतपनंचांद्रायणं। सर्वंचपंचगव्यंचाएकद्वि
त्रिचतुःकार्याणिवा। मत्याभ्यासकायातिकृच्छ्रतप्तकृच्छ्रंचांद्रायणि। यद्वाभ्यासेतैक
द्वित्रिषण्मासानियावकव्रतानि। अत्यंतापदिद्वादशत्रिंशत्षष्टिशतप्राणायामाः।
क्षत्रियस्यवैश्यशूद्राशौचेवैश्यस्यशूद्राशौचेचैवं। विप्राशौचेक्षत्रवैश्ययोरष्ट

पतञ्जपो नक्तं प्राक्षत्राशौचे वैश्यस्यैवं। दिनाशौचे शूद्रस्य स्नानं। पंचगव्यं च। शूद्रसंस्पर्शे वपने
१-२८ स्नानं। पाने पंचगव्यं च। ब्रह्मचार्यादेरुपवासः। शतजपः पंचगव्यं च त्रिरात्रं। सहस्रजपः पंचगव्यं चाधि
कं नाशाशौचे कृत्स्नयुयोऽग्निसंसेके। आहिताग्न्याशौचे चैवं॥ आशौचे तु भुक्त्वैतं न स्पृशेत्।
आपुरीषसर्गात्। तत्प्रायश्चित्तं तदाशौचे गते कार्यं। सकृद्भोजनमात्रेण भोक्तॄणां च तावदाशौ
चित्वादनधिकारात्। तद्गृहान्नभोजने नक्तमुपवासो वा। कापालिकान्नपाने च कृच्छ्रमात्रं कार्यं तद
र्द्धं च अभ्यासे द्विगुणं मत्या त्रिगुणं। अभ्यासे चतुर्गुणं। मत्याभ्यासे द्विचांद्रं। तदर्द्धं चान्तर्वत्नीगम
ने चैवं। अत्यंताभ्यासे कृच्छ्रं॥ पतितान्नेद्रव्ये च सति तत्समुत्सृज्य त्यातिकृच्छ्रं कुर्यात्। अन्नस
त्रप्रवृत्तस्याग्निहोत्रिणश्चामेन दोषः॥ पक्कान्ने त्वेकरात्रं। त्रिरात्रं वा यावकं। द्वादश चतुर्विंशति
र्वा प्राणायामाः॥ गृहीत्वाग्निं समारोप्य पंचयज्ञान्न कुर्वन्। परपाकरतः। पंच यज्ञान्कृत्वा
निस्यं परान्नोपजीवी परपाकरतः। दानवर्जितोऽपचः। पक्षे मासे वा देवपित्र्यन्नमभोजयन्नश्रा १-२८
द्धदस्तेषामन्नाशनाभ्यासे चांद्रं। पर्वपरगणितमतिरिक्तं निषिद्धाचरणाशीलान्नभोजने तूपवा
सो दिनं। संवत्सराभ्यासे पराकः। अत्रादिष्टं विप्रस्यैव तत्क्षत्रस्य पादोनं वैश्यस्यार्द्धं शूद्र
स्य पादः॥ ॥इति भक्ष्याभक्ष्यप्रायश्चित्तं॥ ॥अथ जातिभ्रंशकरादिप्रायश्चित्तं॥ ॥

जातिभ्रंशकरेष्विच्छया सांतपनं अमतिकृच्छ्रं वा कार्यं। संकरीकरणे यावकं। पुमान्स यावकं कृच्छ्रातिकृच्छ्रं वा।
अपात्रीकरणेषु तप्तकृच्छ्रः। अतिकृच्छ्रं वा मलिनीकरणेषु महासांतपनं तप्तकृच्छ्रं। ब्राह्मणस्य रुजः कृत्वा
रास तस्य प्रमाणं च निंदितार्थधनदानं कृत्वा कृच्छ्रार्द्धं चरेत्। अचस्त्रीणामर्द्धं। रजस्वलानां तत्तत्रोक्त
मेव कार्यं॥ ॥इत्युपपातकप्रायश्चित्तं॥ ॥अथ प्रकीर्णप्रायश्चित्तानि॥ खरयानमुष्ट्रयानं वा या
नमारुह्याध्वानं गत्वा नग्नः स्नात्वा च स्वस्त्रियं दिवा गत्वा सवस्त्रोऽपोऽवगाह्य प्राणायामेन शुद्ध्येत्। अमत्या
स्नानमात्रं। मत्या साक्षात्खराद्यारोहणे तु द्विगुणं। गुरुं त्वंकृत्य हुंकृत्य विप्रं त्वंकृत्य वादेन वा निर्जित्य वा
स सा बध्वा वा शीघ्रं प्रसाद्योपवसेत्। अभ्यासे त्रिरात्रं। विप्रं हन्तुं दंडोद्यमे कृच्छ्रः। ताडने तु कृच्छ्रः रक्त
स्रावे कृच्छ्रातिकृच्छ्रौ। अंतरक्ते त्वग्भेदे कृच्छ्रः। अस्थिभेदे नेत्रकृच्छ्रौ अंगकर्तने पराकः॥ पादेन प्रहृत्योपोष्य स्ना
त्वा प्रसादयेत्। पादेन स्पर्शने तु प्रसादनं। अथ संनात्वा अग्निं निधाय वस्तु वाग्नौ वार्ती विण्मूत्रनिषे
धणे सचेलो जलं माप्लुत्य गां स्पृष्ट्वा शुद्ध्येत्। मत्योपोष्य सचेलं स्नायात्। अभ्यासे चार्तस्य चत
प्तकृच्छ्रः। श्रौतस्मार्तकर्मलोपे तूपवासः। पश्चात्यतितदोषेण्वादर्शं। सूर्योदये स्वपंश्चेन्मत्या सुप्तो
ऽह्नि तिष्ठन्सावित्रीं जपन्नुपवसेत्। सूर्यास्तमये सुप्तो रात्रौ तिष्ठन्सावित्रीं जपन्न्यायात्। स्नाता

दिकर्मलोपेत्पवासोष्टशतजपो वा। जीर्णमलवद्वस्त्रधारणादिस्नातकव्रतलोपे चोपवासोष्टशतजपो वा। पंच
महायज्ञेष्वन्यतमलोपे त्वनातुरस्योपवासो धनिनः कृच्छ्रार्द्धं। आहिताग्नेः पर्वण्युपवासस्थानलोपे चै
१०२९ वं। ऋतौ भार्यागमनलोपे चैवं। प्रथमायां भार्यायां जीवंत्यां द्वितीयायां भार्यायां वैतानिकाग्निदह
ने सुरापानसमवत्। स्वभार्यां क्रोधादवमन्यते नरश्चेद्दूर्णानां कृच्छ्रं नव षट् त्रिरात्राणि। अस्नात्वाशो
जनात्वेत्पवासो दिनजप्यं च। एकपंक्त्युपविष्टानां स्नेहादिविषमदाने दापने च कार्यं। उदकावलरणा
मार्गहंतुः कन्याविघ्नकरस्य च समेषु विषमेषु पूजादिकर्तुश्च सैक्षाल्येन सह चांद्रं। सुरापस्य गंधमाघ्रा
यसोमपो ब्राह्मणोऽप्सु निमग्नः त्रिः प्राणायामान् त्रिरघमर्षणं वा कृत्वा घृतप्राशनं च कुर्यात्। असो
मपो नाप्सु इतरस्यामंत्रकः प्राणायाम एव। मद्यपगंधे तु तदर्द्धं। साक्षात्सुराघ्राणात्सुरापानसमवत्
। अमत्या प्राणे त्रिः प्राणायामाः। मद्यघ्राणे विण्मूत्रक्रव्यादपूतिगंधघ्राणे त्रिः प्राणायामाः। दर्शने प्रा
णायामः। स्पर्शने स्नानं घृतप्राशनं च। सुरास्पर्शने स्नानं पंचगव्यं च। शवगंधाघ्राणेऽप्सु प्राणाया १०२९
माः। असोमपस्त्वानप्सु इतरस्यामंत्रकः प्राणायामः। शुष्कसुराभांडस्थापः पीत्वाक्षयं यावकं।
सुराभाजनाप्सु शंखपुष्पीपंचकं पयः पंचरात्रं। पर्कबिन्ताप्सु शंखपुष्पीपयः षडहं। शुष्कमद्यभांड

स्थाप्सु सप्तरात्रं यावकं। अन्यत्र पूर्वोक्तचांद्रं। सुरामद्ययोः स्नातस्तम्यंकु स्यं। वमने चांद्रं कार्यं च। मूत्रपुरी
षादिदूषितापः पीत्वा सांतपनं त्र्यहं। रसोपलक्षोपादकृच्छ्रः। मद्यविण्मूत्रे विप्रादिभिः संस्पृष्टे सुरां दत्वा
स्पृष्ट्वा प्रतिगृह्य च स्नात्वा सकुशांबु त्र्यहं॥ ॥संक्रांत्यादिनिमित्तस्नानं होममकृत्वांबु पीत्वाष्टस
हस्रं जपेत्। शूद्रादिस्पर्शनिमित्ते तूपवासः। चंडालादिस्पर्शनिमित्ते त्रिरात्रं कार्यं वा तदुपस्पृष्टस्पर्शे तू
पवासस्त्रिरात्रं वा॥ नित्यस्नानमकृत्वा भुक्त्वा चोपवासस्त्रिरात्रं वा नैमित्तिके स्नाने सर्वत्राष्टस
हस्रजपो द्वादशप्राणायामोऽधिकः। अमेध्येऽश्वाद्यस्पृश्यस्पर्शने त्वस्नात्वा भुक्तौ गृहस्थादेस्त्रिरा
त्रं। मत्या त्रिरात्रं। यतिनः कार्यं चांद्रं वा। चंडालादिस्पर्शने त्वस्नात्वा भुक्तौ चांद्रं मत्या भुक्तौ कार्यं।
रजकाद्यंत्यस्पर्शे त्वस्नात्वा भुक्तौ मत्या त्रिरात्रं कार्यं वा। प्रत्यंते स्नाने भुक्त्वापि त्वा त्रिरात्रं। सांतप
नं वा। अनाचम्य भक्षणे पाने चाष्टशतजपः। भोजने तूपवासः। भोक्तुकामस्यापोशानात्पश्चा
दप्यबहारान्मूत्रपुरीषविनिर्गमे सचैलो बहिः स्नात्वा षट् प्राणायामाः। भुंजानस्य गुदस्रावणे
शौचं कृत्वा स्नात्वा पंचगव्यं स भुंजानस्याशुचिलितं ग्रासं भूमौ क्षिप्त्वा स्नायात्। तद्ग्रा

१…३० साशनेतूपवासः। सर्वान्नाशनेत्रिरात्रं। भुंजानस्य मस्तके विण्मूत्रादिपतने ऽन्नं त्यक्त्वा नद्यां स्नात्वा त्रिप्रा
णायामाः। भुंजानस्य स्वगोत्रस्पर्शने ऽन्नं त्यजेदुदकं स्पृष्ट्वा शुद्धिः। भुंजानस्यासगोत्रस्पर्शने भोजनं वि
सृज्यैव शुद्धिः। भुंजनयोः सवर्णयोः स्पर्शे च विसृज्यैव शुद्धिः। भुंजानस्योच्छिष्टक्षत्रियस्पर्शे स्नानं जपं
च कृत्वा दिनांते घृतप्राशनं। भुंजनस्योच्छिष्टवैश्यस्पर्शने चैवं। त्रिषवणस्नानादिकं। भुक्तोच्छिष्ट
स्पृष्टो सवर्णे स्नानं शतजपो वा। असवर्णे तूपवासः। सहस्रजपो वा। भुक्तोच्छिष्टस्य शूद्रादिकस्पर्शे तू
पोष्य पंचगव्यं। रजकादिस्पर्शे त्रिरात्रं। ऊर्ध्वोच्छिष्टस्य चंडालादिस्पर्शने कार्यं। अधरोच्छिष्टस्य त
दर्द्धं। उच्छिष्टो द्विज उच्छिष्टं द्विजं स्पृष्ट्वा शूद्रश्वादीन्वा स्पृष्टोपोष्य पंचगव्यं पिबेत्। उच्छिष्टो द्विजश्चं
डालादि स्पृष्ट्वा त्रिरात्रं कुर्यात्। रजकादिस्पर्शे तदर्द्धं पंचगव्यं च। अनुच्छिष्टापस्पृष्टो यत्र स्नानं वि १…३०
हितं। तत्रोच्छिष्टस्पृष्टो त्रिरात्रं कार्यं वा। उच्छिष्टस्पृष्टो स्नानमात्रं विहितं। उच्छिष्टोच्छिष्टस्पृष्ट्वा
वेकृण्व दुष्यति। तत्स्पृष्टिनो न दुष्यंति। येन केन चिदुच्छिष्टः परस्पृष्टः सद्य आप्लुत्य प्रायश्चित्तं
सर्वत्र कुर्यात्। विण्मूत्राद्युत्सर्गे भुक्त्वा पीत्वा वा त्रिरात्रमुपवासस्त्रिरात्रं वा गोमूत्रयावकेन।

अशक्तो यावकं। जलपानेतूपवासः। पंचगव्यं च। कंजिकादिनाशो वंदकृत्वा भुक्त्वा पुनर्जलेन शुद्धिं कृत्वो
पोष्य पंचगव्यं पिबेत्। नीलीवस्त्रादिधारणे केशानि र्मितो धर्ववस्त्र धारणे चोपवासः पंचगव्यं घृतं हि
रण्योदकं वा पिबेत्। नीलीमध्यगमने स्नात्वा त्रिः प्राणायामाः। नीलीविक्रयन्पालयन्नीलीवृत्त्याजी
वंश्च मतिविरक्तः कृच्छ्रैस्त्रिभिः कृच्छ्रैः शुद्ध्यति। नीलीवस्त्रधारणेऽपि स्नानदानजपहोमस्वाध्यायदेवता
र्चनादि सर्वं निःफलं। नीलीक्षेत्रोत्पन्नं भुक्त्वा चांद्रं। नीलीक्षेत्रे नीलीमुत्पाद्य द्वादशाब्दात्परं शुद्धे
त्। नीलीजग्धो चांद्रं। नीलीध्रुतामैथुने श्गास्थांडालो जायते। नीलीधृतास्ततः षष्टिवर्षसह
स्रं विष्ठाकृमिः स्यात्। म्लेच्छस्पर्शरिपन्न्यानीलीधृता चेत्तत्र नरके शाश्वती वसेत्। नीलीधृता यदन्नं
दीयते तत्र दातुर्भोक्तुश्च सांतपनं। नीलीदारुभेदे रक्तदर्शने चांद्रं। कंबले पट्टसूत्रे च नीलीदो
षो नास्ति। इंद्रचापं पलाशाग्निं चान्यस्य प्रदर्श्योपोष्य क्रमाद्धेनुं दंडं च दक्षिणां दद्यात्॥ ॥
पतितम्लेच्छाशुद्धाधार्मिकसंभाषणे पुण्यकृतो ध्यायेत्। ब्राह्मणेन वा सह संभाषयेद्विनायज्ञोप
वीतेनोच्छिष्टेन वा मत्यापसंभाषणे चं। जलपाने च त्रिप्राणायामाः। भोजने नक्तं विण्मूत्रे द्विप्राणाया
माः। मद्यासवेक्षुरसपाने विण्मूत्रे शतजपो ऽशक्तो ऽनेनतूपवासः। भुक्त्वा नाचम्योत्थाने सद्यः स्नानं

दंडेनोराधकसर्गेयात उपवासः।पुरोहितस्य त्रिरात्रं।अदंड्य दंडने राज्ञस्त्रिरात्रं।पुरोहितस्य कृच्छ्रः स्ने
१॰३१ हेन पतितादि पांक्तेय पंक्तिभोजने तूपवासः पंचगव्यं च।पलाश खट्वाशयनासनपादुकारोहणे
त्रिरात्रं यावकं।फलवृक्षछेदने द्वे व्रते।पलायने नृपस्य चैवं।विप्रयोरग्निविप्रयोर्गोविप्रयोर्दं
पत्योश्च मध्ये गंतुः सांतपनं।होमकाले गवां दोहे साम्नाय्यं गेस्वाध्याये विवाहे च।मध्ये गंतुः सा
तपनं।अभ्यासे चांद्रं।दुःस्वप्नदुरिष्टदर्शनादोषघ्नं हिरण्यं वदद्यात्।अतीर्थार्थिनः सिंधुसौवी
रसौराष्ट्राद्वि प्रत्यंगांगवंगकलिंगोग्रदेशोगमने पुनः संस्कारः।तीर्थार्थिने दोषः।प्रत्यर्कादि मे
हने चात्मशालक दर्शने सूर्यं विप्रं गां वा पश्येत्।वक्रेरथः करणे पादप्रतापने कृच्छ्रः पादप्रमार्जने
चोपवासः।यावकं वा।क्षत्रवैश्ययोरभिवादने शय्यापादुकोपानद्रूढोधिकारस्थः श्राद्धकृद्धो
मकृज्जपदेवपूजारताः समित्पुष्पकुशाग्न्यंबु गंधाक्षतान्नपाणिन एतेषां चाभिवादने चैते १॰३२
नाभिवाद्याः सर्वे त्रिरात्रं कुर्युः।अन्यच्च निमंत्रितस्याप्यन्यत्र भोजने प्येवं॥ इत्यादि देश
कालवयोव्यवस्थया शक्त्या प्रायश्चित्तं ज्ञेयं।अनुपदिष्टेषु दंडार्थवादिस्मृतिनिंदाभिः
कल्प्यं।स्त्रीबालवृद्धातुराणां च योग्यं प्रोज्य देयं॥ ॥इत्यादि संकीर्णप्रायश्चित्तं॥ ॥